आचार्यश्रीविजयवीरशेखर सूरिरचितं

# स्वोपज्ञ-प्रेमप्रभावृत्तिराजितं

# कर्मप्रकृति-कीर्तनं

दशपरिशिष्टयुतम्

अथ

आचार्यश्रीविजयवीरशेखरसूरिकृतं

स्वोपज्ञ-

प्रेमप्रभावृत्तिराजितं

# कर्मप्रकृति-कीर्तनं

दशपरिशिष्टयुतम्

श्रीशङ्खेश्वरपार्श्वनाथाय नमः
श्री विजयानन्द-कमल-वीर-दान-प्रेम-रामचन्द्र-हीरसूरीश्वरसद्गुरुभ्यो नमः
भारतीय-प्राच्यतत्त्व-प्रकाशन-समिति-पिण्डवाडा-संचालितायां

# आचार्यदेवश्रीमद्विजयप्रेमसूरीश्वरकर्मसाहित्यजैनग्रन्थमालायाः

14 6654

एकषष्ठो (६१) ग्रन्थः

**प्रेरका मार्गदर्शकाः संशोधकाश्च** : कर्मसाहित्यनिष्णाताः सिद्धान्तमहोदधय
आचार्यभगवन्तः श्रीमद्विजयप्रेमसूरीश्वराः

**ग्रन्थकारपरिचय** : प्रवचनकौशल्याऽऽधार-सिद्धान्तमहोदधि-सुविशालगच्छाऽधिपति-परमशासनप्रभावक-कर्मसाहित्यनिष्णात-पूज्यपाद-स्वर्गताऽऽचार्यदेवेश-श्रीमद्विजयप्रेमसूरीश्वर-विनीताऽन्तवासि-निःस्पृहतासलिलनिधि-परमगीतार्थ-गच्छहितचिन्तक-विशुद्धसंयमि-पूज्यस्वर्गताऽऽचार्यदेव-श्रीमद्विजयहीरसूरीश्वर-विनेयरत्वाऽऽचार्यदेवश्रीमद्विजयललितशेखरसूरीश्वर-शिष्यरत्नाऽऽचार्यदेवश्रीमद्विजयराजशेखरसूरीश्वर-शिष्य

## आचार्यश्रीविजयवीरशेखरसूरिः


**आर्थिक सहयोग** : अशोक नगर, जैन संघ (भीवंडी)

**प्रकाशिका** : भारतीय-प्राच्यतत्त्व-प्रकाशन-समितिः, पिण्डवाडा ।
प. पू. आ. दे. श्रीमद्विजयवीरशेखरसूरीश्वर ज्ञानभंडार ट्रस्टः, विरार ।

**द्वितीयवृत्ति** : ५०० वीरसंवत् २५३४ / विक्रमसंवत् २०६४

**मुल्यम** :

**-: प्राप्तिस्थान :-**

प. पू. आ. दे. श्रीमद्विजयवीरशेखरसूरीश्वर ज्ञानभंडार
६, न्यु. श्रीहरि को. हा. सो. सुमनकोम्प्लेक्ष पाछळ,
डॉ. देसाई होस्पीटलना खाचामां, विजया बेंक नी सामे,
अगासी रोड, विरार (वे.), ४०१ ३०३

मुद्रक : त्रिशला प्रिंटर्स - फोन : ६५ ९१ ३९ ८४ / ९८१९ ७७ ८४ ०४
डिझाइन : दिपाली जवेरी - फोन : ९८१ ९१ ९० २७५

ATHA

AACHARYASHRIVIJAYVEERSHEKHARSURI-KRUTAM

# Svopagn-

PREMPRABHAVRUTIRAJITAM

# Karmaprakruti-kirtanam

DUSPARISHISHTYUTAM

Shri Shankheshwar Parshvnathay Namah
Shri Vijayanand-Kamal-Veer-Dan-Prem
Ramchandra Hirsurishwar Sadgurubhyo Namah

Swopagn

# Karmaprakrutikirtanam

## KARMA-SAHITYA-GRANTHMALA
## ACHARYA DEVA SHRIMAD VIJAYA PREMSURISHWARJI




GRANTH NO. : 61

AUTHOR : Acharya Shri Vijaya Veershekharsuri.

ECONOMIC SAHYOG : Ashok Nagar Jain Sangh (Bhivandi)

PUBLISHED BY : 1. Bharatiya Prachya Tattva Prakasana Samiti Pindwada (INDIA).
2. Param Pujya Acharyadevshrimad Vijaya Veershekharsurishwarji Gyan Bhandar

FIRST EDITION : 500 Copies 2007 A.D.

PRICE :

AVAILABLE AT :

PARAM PUJYA ACHARYADEV
SHRIMAD VIJAYA VEERSHEKHARSURISHWARJI GYAN BHANDAR
6, New Shri Hari Co-op. Hsg. Society, Suman Complex, Opp. Vijaya Bank,
Agashi Road, Virar (West), Thane - 401 303. (INDIA)

Printer & Composer : TRISHLA PRINTERS - Ph. 6591 39 84 / 9820 77 84 04
Designed By : Deepali Jhaveri - Ph. 981 91 90 275

# प्रकाशकीय निवेदन

अमने जणावता अति आनंद थाय छे के सिद्धान्त महोदधि, कर्मसाहित्य निष्णात, सुविशालगच्छाधिपति, स्वर्गत, पूज्यपाद आचार्यदेव श्रीमद् विजय प्रेमसूरीश्वरजी महाराजानी परमकृपा दृष्टिथी अेओश्रीनी ज जन्मभूमि तरीके प्रख्यात पिंडवाडानी पावन धरा पर ''भारतीय प्राच्यतत्त्व प्रकाशन समिति'' नो जन्म थयो.

आ समितिनो मुख्य उद्देश स्वर्गत पूज्यपादश्रीजीनी प्रेरणाथी कर्मसाहित्यना अनेक ग्रंथोनुं अे वखते संस्कृत-प्राकृतमां नवसर्जन थतुं हतुं ते ग्रन्थरूपे प्रकाशित करवानो हतो अने ते उद्देश मुजब आ समिति अे आज सुधीमां कर्मसाहित्यना अनेक दलदार महान ग्रन्थोनुं प्रकाशन करी चूकी छे.

अमारी आ समिति उपर सिद्धान्तमहोदधि स्वर्गत पूज्यपाद आचार्यदेव श्रीमद् विजय प्रेमसूरीश्वरजी महाराजानी अनराधार कृपा जेम वरसी छे तेम तेओश्रीना समुदायना महात्माओनी कृपा पण पूर्वे आ समितिने मळी छे अने आजे पण मळी रही छे. तेथी अमो तेओना अत्यन्त ऋणी छीअे. ते सिवाय हाल तेज कार्य प. पू. आ. भ. श्रामद् विजय वीरशेखरसूरीश्वर ज्ञान भंडार ट्रस्ट पण करी रहेल छे. तेथी तेना अमे अत्यन्त ऋणी छीअे.

आजरोज सुविशालगच्छाधिपति पूज्यपाद आचार्यभगवंत श्रीमद् विजय प्रेमसूरीश्वरजी महाराजाना परम कृपापात्र अने कर्मसाहित्यना प्रखर अभ्यासी, ज्ञानयोगी, पूज्यपाद आचार्यदेव श्रीमद् विजय वीरशेखरसूरीश्वरजी महाराज द्वारा रचित

''**कर्मप्रकृति कीर्तनम्**'' नामनो महान मूळग्रन्थ प्रकाशित करता अमो आनंद अनुभवीअे छीअे. अने अमे अेमना आ महान उपकारना ऋणी छीअे.

आ ग्रन्थना प्रकाशनमां आर्थिक लाभ लेनार **अशोक नगर, जैन संघ (भीवंडी)** तरफथी श्रुतभक्तिथी लीधेल छे. तेथी अमो तेना ऋणी अने आभारी छीअे.

छेवट सुधी प्रुफ सुधारी अत्यन्त चीवट अने झडपथी आ काम करी आपनार त्रिशला प्रेसना मालिक पंकजभाई हिमंतलाल झवेरी आदिनो पण अमो आभार मानीअे छीअे.

तदुपरांत आ ग्रन्थना प्रकाशनमां प्रुफरीडींगथी मांडीने प्रेस प्रिन्टींग सुधीमां सहायक बननार नामी अनामी अनेक महानुभावोनो अमे हार्दिक आभार मानीअे छीअे.

# अष्टारचक्रबन्धः




✱ श्लोक - १ - २

जिनसामान्यस्तुतिः

# अष्टदलकमलबन्धः




✱ श्लोक - १०

वीरप्रभुस्तुति

## षोडशदलकमलबन्धः




✱ श्लोक - ११

वीरप्रभुस्तुतिः

✱ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामिमे श्लोकाः

# गोमूत्रिकाबन्धः




अथवा




## श्लोक-११ वीरप्रभुस्तुतिः

## खड्गबन्ध




## श्लोक-१२-१३ जिनवाणीस्तुतिः

सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामिमे श्लोकाः



श्री सिध्दाचलमण्ड़न श्रीआदिनाथ




## श्री आदिनाथस्तुतिः

शंराज्ये राजराजो, भुवनवरवपु, रोषतोषप्रुषस्सः
वैराग्यारात्यरातिः, शमदमरमणः, त्यागयोगप्रगल्भः।
मारागारारिरादिः, स्थिरतरचरणो- ऽर्हन् विभुर्विश्वविश्वेः
पापान्नः पातु पाप-व्रजभजनजनि-र्नीतिरीतिस्थितिज्ञः ॥३॥

सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोक



श्री शांतीनाथ भगवान




**श्री शान्तिनाथस्तुतिः**

जीवभीवाटवादी, शिवयुवतिवरो- ऽर्हन् दयादत्तिदक्षः:
पापाकूपारपारः, स्मरशरविरतः, शान्तिरर्तिप्रतिघ्नः ।
भोगत्यागप्रगल्भो, भवदवहवनो, धीरवीरस्थिरस्सः
त्यागात्तागा मृगाङ्कोऽप्यवतु वरवचा, निष्कलङ्क प्रकर्षः ॥४॥

* सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीरैवतगिरिमण्डननेमनाथः




श्री नेमनाथस्तुति

मारागाराङ्गराजी - नवभवनिवह - स्नेहमोहप्रहर्ता:
भाविप्राविज्ञविष्णो-र्मदमदविदरो-ऽर्हन् विपद्विघ्नविद्विद् ।
ज्ञानेशो नेमिनेता, हतविततमो, भोगरोगप्रगर्व:;
शं रातौ रातु राता, दुरितरिपुरिपु-र्ज्ञानदानस्वनन्य: ॥५॥ ✱

✱ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोक:



श्रीशङ्खेश्वरमण्डनपार्श्वनाथः

# मालाबन्धः काव्यम्

## श्री पार्श्वनाथस्तुतिः

संदग्धो दर्पदर्पः, कमठमदमदः, संहतो हर्षहन्त्राः
येन ज्ञेन प्रनष्टो, विकविकलकरः, पापतापप्रपञ्चः ।
मोहद्रोहप्रहर्ता- ऽतुलबलनिलयो–ऽशेषदोषप्रुषस्सः
श्रीपार्श्वः पापपाती, दिशतु शमिशमं, सर्वभावज्ञवर्यः ॥६॥ ✷

स्रग्धरा

✷ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीनांदियामण्डनमहावीरस्वामी

# मालाबन्धः काव्यम्

## श्री महावीरप्रभुस्तुतिः

संकष्टैक:कुकर्म— क्षयनियमयशो– नीरपूरप्ररम्यो;
माराकाराभिरामो, रतिपतिहतिकृत्, क्रोधयोधप्रधर्षः ।
लोकालोकावकाशी, समकुमहिमणिः, तीर्थनाथप्रथस्स;
वीरो धीरो नरोद्धो हरतु रतिरयं, सर्वशंवल्लिवप्ता ॥७॥ ✸

स्त्रग्धरा

✸ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः






### श्री गौतमस्वामिस्तुतिः

सर्वज्ञो वर्णवर्थी, शीवदवसुवणिक्, सो-ऽवताद् वल्गुवर्ष्मा;
गर्वग्रावघ्नवज्रः, प्रवरवशिवचाः, कर्वगर्वद्रुवह्निः ।
ध्वस्ताधो-ऽतार्यतारी, कुतविततपा, ज्ञातसंतथ्यतत्त्वः;
संतापाताहिताक्ष्यः, क्षतकुतमतति- गौतमस्तष्टतर्षः ॥१५॥ ✱

✱ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्री सुधर्मस्वामि

# मालाबन्धः काव्यम्

## सुधर्मस्वामिस्तुतिः

सो-ऽवर्ण्यो वर्ण्यवर्णो, भवतु वरवपुः, सर्वविद् वन्द्यवन्द्यः;
तुङ्गाघागापगा यः, प्रगतगदगहो, रागरोगघ्नगल्भः ।
पूतात्मा तातातायी, धुतविततमाः, पीतसंतर्षतर्षो:
बुद्धस्सिद्धस्सुधर्मा, सुधनधवधवो, दग्धदग्धव्यधर्ष ॥२७॥ ✱

स्रग्धरा

✱ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीमद्विजयाऽऽनन्दसूरीश्वरमहाराजा

X-373

# मालाबन्धः काव्यम्

## श्री विजयानन्दसूरिस्तुतिः

निर्ग्रन्थो ग्रन्थ'ग्रन्थो, जयतु यतियमी, प्रस्तदुस्तर्कतङ्कः ;
सूरी सूरी निरीह- श्चरणरमरतः, स्फीतपूतप्रतत्त्वः ।
आनन्दो नम्यनम्रः, कुमतिमतरमः, क्षामकामप्रमत्तः;
सन्मानामानमाला- समरमणमना, बन्धबन्धघ्नधर्मा ॥३५॥*

१ रेफसंयोगत्वेनेह पूर्वतर्ती स्वरो गुरुर्न गण्यते ।*

स्रग्धरा

* सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीमद्विजयकमलसूरीश्वरमहाराजा




# मालाबन्धः काव्यम्

## श्री विजयकमलसूरिस्तुतिः

ज्ञाता ध्याता प्रतापी, द्युतविततनुः, पातकातङ्कनन्त्रंः
क्षामाघो मारमारी, शमिदमियमिपो, भीमसोमक्षमस्स ।
शंदाता दातु दाने, [1]शर्म मम कमलः, सूरिपो रिक्तरिक्थोः
यो मारोन्मादमाला– हरवरवरदो, बन्धबाधप्रधर्ष ॥३६॥ *

१ रेफसंयोगत्वेनेह पूर्ववर्ती स्वरो गुरुर्न गण्यते ।✷

## स्रग्धरा

✷ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोक



શ્રીમદુપાધ્યાયવીરવિજયજીમહારાજા

## मालाबन्धः काव्यम्

### श्री वीरविजयोपाध्यायस्तुतिः

वीराह्वं रागरापं, भज भज <u>विजयं</u>, <u>वाचका</u>-ऽऽश्चर्यचर्यः
भावास्था-ऽऽचार्यवाणिं, सुगुणिगुरुगुण-व्यासग्रासप्रसक्तम् ।
निन्दालीदावदावं, व्रतदतततरुं, कर्मयुध्मस्थमल्लं:
संतप्तातथ्यतत्त्वं, मदनदवदकं, त्यागरागप्रगल्भम् ॥३७॥ ✹

स्रग्धरा

✹ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीमद्विजयदानसूरीश्वरजीमहाराजा

# मालाबन्धः काव्यम्

## श्री दानसूरिस्तुतिः

जीयान्मायाक्रियाघ्न- श्चरणरतिरतो, ज्ञातपातघ्नतत्त्वो:
ज्योति:शास्ति प्रतिष्ठः, सुरतरतिरदी- कृत् कलौ कक्षकर्त्तः ।
ज्ञानी ध्यानी मुनीशो, कुमतिमतिमद- ग्रावसंवक्तृवज्रो:
दानाख्योऽनाथनाथो, विमलमतिमतो, निष्कलङ्कस्सुकर्मा ॥३८॥ ✱

स्रग्धरा

✱ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोक:



श्रीमद्विजयप्रेमसूरीश्वरजीमहाराजा

# मालाबन्धः काव्यम्



## श्री प्रेमसूरिस्तुतिः

बोधागाधाब्धिधारो, विरतिरतिरतो, ज्ञानदानर्भ्विनद्रुः;
प्रेमाब्धिर्मारमारो, गुणगणगणभृद्, ग्लानपानस्वनन्यः
शामश्रामण्यमग्नो, द्युतिधृतिमतिभाक्, कर्ममर्मभ्रमज्ञः;
प्रेमारव्यो मान्यमान्यः, प्रगुरुगुरुगुरुः, सूरिसूरिस्स्वरिज्यः ॥४०॥ ✷

स्रग्धरा

✷ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीमद्विजयरामचन्द्रसूरीश्वरजीमहाराजा

# मालाबन्धः काव्यम्

## श्रीरामचन्द्रसूरिस्तुतिः

व्याख्यानाऽऽख्यानयायी,कुमतिमतिमद - ग्रावसंवक्तृवज्रः ;
शं राता रातु राने, गुणगणगणधृद्, रामनामप्रमल्लः ।
धर्माऽऽरामाऽवमाली , द्युतिधृतिमतियुक्, चन्द्रवद्रम्यरम्यः ;
सन्मानाऽमानमाला - समरमणमनाः , सूरिपोऽरिष्टरिष्टः॥ ॥

### स्त्रग्धरा

सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः


श्रीमत्पन्न्यासहेमन्तविजयगणिमहाराजा



# मालाबन्धः काव्यम्

## श्री पन्न्यासहेमन्तविजयगणिस्तुतिः

रव्याता गीतार्थतायां, धृतहितमितगु- र्दातु शं तुष्टतुण्डः;
<u>पन्न्यासो</u> याज्ययाज्यः, सुयतियमयतो, हेयहायप्रयत्नः ।
<u>हेमन्तो</u> मन्त्रिमल्लो- ऽशंमदमदमद- घ्नो मलोन्मन्थमग्नो;
रागत्यागप्रगल्भः, प्रगतगयगदो, यो <u>गणी</u> गद्यहृवः ॥४५॥ ✹

स्त्रग्धरा

✹ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं श्लोकः



श्रीमद्विजयहीरसूरीश्वरजीमहाराजा

# मालाबन्धः काव्यम्




## श्री हीरसूरिस्तुतिः

यो मन्त्री मर्ममन्त्रे, शमदमयमयुक्, शाममर्मप्रमन्थोः
धर्मारामावमाली, कमनमदमरो, धर्मकर्मज्ञमस्तः ।
सूरिस्सो - ऽरिष्टरिष्टो-ऽविरतिरतिरदी-कृद् रमारङ्गरङ्कोः
हीराख्यो रागराहुः, परचरणरमो, हीरतीरप्ररक्तः ॥४५ A॥* ✸

स्रग्धरा

✸ सत्ताविहाणसम्बन्धिस्वोपज्ञप्रेमप्रभावृत्तिसत्कप्रारम्भिकमङ्गलाऽऽचरणश्लोकानामयं. श्लोकः

સચ્ચારિત્ર ચૂડામણિ કર્મસાહિત્યનિષ્ણાંત સુવિશાલ ગચ્છાધિપતિ
સિદ્ધાન્ત મહોદધિ પૂજ્યપાદ સ્વર્ગીય આચાર્યદેવ



શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા

# સમર્પણ

જેઓશ્રીએ આ સંસારરૂપી અટવીમાંથી ઉદ્ધાર કરી મને મોક્ષરૂપી નગરીમાં જવા માટેના સંયમરૂપી સન્માર્ગમાં ચઢાવીને ગ્રહણશિક્ષા અને આસેવન શિક્ષા દ્વારા સતત બાર બાર વર્ષ સુધી ભોમિયાપણું બજાવ્યું,

જેઓશ્રીની અપાર વાત્સલ્યમય કૃપાદષ્ટિથી જ હું અતિગહન અને ગંભીર એવા કર્મ સાહિત્યનું સર્જન સમ્પાદન અને પ્રાચીન કર્મસાહિત્યનું સમ્પાદન કરી શક્યો છું,

તે પરમ પૂજ્ય પરમોપકારી પ્રાતઃ સ્મરણીય પરમ શાસન પ્રભાવક કર્મસાહિત્ય સૂત્રધાર, સિદ્ધાન્તમહોદધિ સુવિશાલગચ્છાધિપતિ પરમારાધ્યપાદ સ્વર્ગત

**આચાર્ય ભગવંત**

**શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી**

**મહારાજા** ની પરમ પવિત્ર સ્મૃતિમાં



આપનો કૃપાભિલાષી

**આચાર્ય શ્રીવિજય વીરશેખર સૂરિ**



પરમશાસનપ્રભાવક સુવિશાલગચ્છાધિપતિ વ્યાખ્યાનવાચસ્પતિ
પૂજ્યપાદ સ્વર્ગીય આચાર્યદેવ શ્રીમદ્વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા

પરમશાસન પ્રભાવક સુવિશાલગચ્છાધિપતિ વ્યાખ્યાનવાચસ્પતિ

પૂજ્યપાદ સ્વર્ગીય

## આચાર્ય ભગવંત

## શ્રીમદ્ વિજય

## રામચન્દ્રસૂરીશ્વરજી



મહારાજા

ની પવિત્ર

સ્મૃતિ માં

# શ્રદ્ધાંજલિ

ભવદીય ગુણગણાનુરાગી

આચાર્ય શ્રીવિજય વીરશેખર સૂરિ

ગીતાર્થમૂર્ધન્ય નિઃસ્પૃહશિરોમણિ
ગચ્છહિતચિન્તક પરમપૂજ્ય
સ્વર્ગીય

# આચાર્ય ભગવંત
# શ્રીમદ્ વિજય
# હીરસૂરીશ્વરજી





ગીતાર્થમૂર્ધન્ય નિઃસ્પૃહશિરોમણિ
ગચ્છહિતચિન્તક પરમપૂજ્ય
સ્વર્ગીય

## આચાર્ય ભગવંત
## શ્રીમદ્ વિજય
## હીરસૂરીશ્વરજી

મહારાજા
ની
પવિત્ર સ્મૃતિ માં

# શ્રદ્ધાંજલિ

ભવદીય ગુણગણાનુરાગી **આચાર્ય શ્રીવિજય વીરશેખર સૂરિ**

# ग्रन्थकारस्या-ऽऽचार्यपदवीसत्क



आचार्यपदप्रदानक्रियाविधिः



नाणसमक्षप्रदक्षिणा



पूज्यपादेन बृहन्नन्दीश्रावणम्



पूज्यपादेना ऽऽशीर्वादप्रदानम



पूज्यपादेनाऽऽसनादिप्रदानम्



आसनादिना सह पूज्यापादानां प्रदक्षिणा

# विशिष्टप्रसङ्गस्मृतयः



पूज्यपादेन केशरेण कर्णाऽर्चनम्



लग्नवेलायां पूज्यपादेन सूरिमन्त्राऽर्पणम्



पूज्यपादेन मुख्याऽऽसने स्थापनम्



पूज्यपादेन चतुर्विधसङ्घेन सह वन्दनम्



आचार्यपदाऽनन्तरं पूज्यपादानां कमलरत्नाऽऽद्यर्पणम्



नूतनाऽऽचार्याणां कमलरत्नाऽऽद्यर्पणम्

# विषयानुक्रमः

## कर्मप्रकृतिकीर्तनम्


| विषयः | पृष्ठाङ्कः |
|---|---|
| वृत्तिकृन्मङ्गलश्लोकाऽऽदि | १-२ |
| मूलग्रन्थाऽऽरम्भमङ्गलाऽऽदिसूचिकाऽऽद्यगाथा | २ |
| वीरशब्दव्युत्पत्तिः | २-३ |
| मङ्गलस्य चतुर्विधता | ३-४ |
| मङ्गलचर्चा | ४-६ |
| मङ्गलत्रयकरणाऽऽदिचर्चा | ६-८ |
| मङ्गलशब्दव्युत्पत्तिः | ८ |
| अभिधेयाऽभिधानम् | ९ |
| पञ्चकारणतावादः | ९-११ |
| कालवादिमताऽऽक्षेपनिरासौ | ९ |
| स्वभाववादिमताऽऽक्षेप-निरासौ | ९-१० |
| नियतिवादिमताऽऽक्षेप-निरासौ | १०-११ |
| पुरुषकारवादिमताऽऽक्षेप-निरासौ | ११ |
| केवलकर्मवादिमताऽऽक्षेप-निरासौ | ११ |
| कालाऽऽदिसमुदितपञ्चकस्य कारणतायाः स्वीकारश्च | ११ |
| कर्मप्राधान्यमाश्रित्य प्रकृतनिरूपणम् | ११ |
| कर्मविचारः | ११-१७ |
| कर्मजन्यजगद्वैचित्र्याऽऽदिकथनम् | ११ |
| कर्मणो मूर्तत्वाऽऽदिप्रतिपादनम् | १२-१३ |
| दर्शनान्तरीयनामान्तरकर्मस्वीकारः | १४ |
| मूर्तकर्मा-ऽमूर्ताऽऽत्माऽनादिसम्बन्धाऽऽदिविचारः | १४-१५ |
| कर्मणः प्रकृत्यादिभेदप्ररूपणम् | १५-१६ |
| कर्मप्रकृत्यादिभेदे मोदकदृष्टान्तः | १७ |
| कर्मप्रकृत्यपेक्षया प्रकृत्यादिलक्षणं | १७ |
| प्रयोजनप्रदर्शनम् | १७-१८ |
| सम्बन्धवर्णनम् | १८-१९ |
| पुनरप्यभिधेयाऽऽदिविशेषचर्चा | १९-२० |
| भगवदतिशयचतुष्कसूचनम् | २० |
| मूलकर्मप्रकृतयः | २१-२५ |
| ज्ञानावरणकर्म | २१ |
| दर्शनावरणकर्म | २१-२२ |
| वेदनीयकर्म | २२ |
| मोहनीयकर्म | २२ |
| आयुष्ककर्म | २२-२३ |
| नामकर्म | २३ |
| गोत्रकर्म | २३ |
| अन्तरायकर्म | २४ |
| ज्ञानावरणाऽऽदिक्रमोपन्यासहेतुकथनम् | २४-२५ |

| विषयः | पृष्ठाङ्कः |
|---|---|
| मूलकर्मप्रकृतिसङ्ख्याप्रकटनपूर्वकोपसंहारः | २५ |
| उत्तरकर्मप्रकृतिसङ्ख्याप्रदर्शनम् | २५ |
| उत्तरकर्मप्रकृतयः | २६-१०२ |
| ज्ञानावरणोत्तरप्रकृतिपञ्चकदर्शनम् | २६ |
| आभिनिवोधिकज्ञानं तदावरणञ्च | २६-२९ |
| श्रुतज्ञानं तदावरणञ्च | २९-३० |
| अवधिज्ञानं तदावरणञ्च | ३०-३१ |
| मनःपर्यवज्ञानं तदावरणञ्च | ३२ |
| केवलज्ञानं तदावरणञ्च | ३२-३३ |
| मतिज्ञानावरणादिपञ्चकक्रमोपन्यासहेतुः | ३३-३६ |
| दर्शनावरणोत्तरप्रकृतयः | ३६-३८ |
| दर्शनचतुष्कं तदावरणञ्च | ३६ |
| निद्रापञ्चकम् | ३७-३८ |
| वेदनीयोत्तरप्रकृती | ३८ |
| मोहनीयोत्तरप्रकृतयः | ३८-५७ |
| दर्शनमोहोत्तरप्रकृतयः | ३८-४३ |
| सम्यक्त्वमोहनीयम् | ३९ |
| मिश्रमोहनीयम् | ३९ |
| मिथ्यात्वमोहनीयम् | ४०-४३ |
| मिथ्यात्वस्य १-२-३-५-३६३ अपरिमिता-ऽऽदिविधतादर्शनम् | ४०-४२ |
| आभिग्रहिकाऽऽदिपञ्चविधता, एकान्ताऽऽदिपञ्चधा वा ३६३ विधता | ४०-४२ |
| अपरिमितता | ४२ |
| चारित्रमोहनीयोत्तरप्रकृतयः | ४३-५७ |
| षोडशकषाय-नवनोकषायरूपद्विविधतादर्शनम् | ४३ |
| कषायाः | ४३-५४ |
| कषायशब्दव्युत्पत्तिः | ४३-४४ |
| क्रोध-मान-माया-लोभाः | ४४-४८ |
| क्रोधाऽऽदिक्रमोपन्यासहेतुः | ४८ |
| अनन्ताऽनुवन्ध्यादिभेदाः | ४८-५४ |
| नोकषायाः | ५५-५७ |
| हास्यषट्कं | ५५-५६ |
| स्त्री-पुरुष-नपुंसकवेदाः | ५६-५७ |
| आयुष्कर्मोत्तरप्रकृतयः | ५७-५८ |
| नामकर्मोत्तरप्रकृतयः | ५८-९९ |
| पिण्डप्रकृतयः | ५८ |
| गतिनाम | ५८-५९ |
| जातिनाम | ५९-६० |

# विषयानुक्रमः


| विषयः | पृष्ठाङ्कः |
| --- | --- |
| शरीरनाम | ६० |
| अङ्गोपाङ्गनाम | ६०-६१ |
| बन्धननाम | ६१ |
| संघातननाम | ६१-६३ |
| संहनननाम | ६३ |
| संस्थाननाम | ६३ |
| वर्णनाम | ६३ |
| गन्धनाम | ६३ |
| रसनाम | ६३-६४ |
| स्पर्शनाम | ६४ |
| आनुपूर्वीनाम | ६४-६५ |
| विहायोगतिनाम | ६५ |
| पिण्डप्रकृतिसङ्ख्या-पिण्डाऽऽदिभेदचर्चा च | ६६-६७ |
| अप्रतिपक्षप्रत्येकप्रकृतयः | ६८-७२ |
| अगुरुलघुनाम | ६८-६९ |
| उपघातनाम | ६९ |
| पराघातनाम | ६९-७० |
| उच्छ्वासनाम | ७० |
| आतपनाम | ७१ |
| उद्योतनाम | ७१ |
| निर्माणनाम | ७२ |
| तीर्थकरनाम | ७२ |
| अप्रतिपक्षप्रत्येकप्रकृतिसङ्ख्या | ७२ |
| अप्रतिपक्षप्रत्येकप्रकृतिक्रमहेतुः | ७३ |
| सप्रतिपक्षप्रत्येकप्रकृतयः | ७३-८२ |
| त्रसदशकम् | ७३-८० |
| त्रसनाम | ७३ |
| बादरनाम | ७३-७४ |
| पर्याप्तनाम पर्याप्तयश्च | ७४-७७ |
| प्रत्येकनाम | ७७-७८ |
| स्थिरनाम | ७८ |
| शुभनाम | ७८-७९ |
| सुभगनाम | ७९ |
| सुस्वरनाम | ७९ |
| आदेयनाम | ७९ |
| यशःकीर्तिनाम | ७९-८० |
| स्थावरदशकम् | ८०-८२ |
| स्थावरनाम | ८० |
| सूक्ष्मनाम | ८० |
| अपर्याप्तनाम | ८१ |
| साधारणनाम | ८१ |

| विषयः | पृष्ठाङ्कः |
| --- | --- |
| अस्थिरनाम | ८२ |
| अशुभनाम | ८२ |
| दुर्भगनाम | ८२ |
| दुःस्वरनाम | ८२ |
| अनादेयनाम | ८२ |
| अयशःकीर्तिनाम | ८२ |
| त्रसाऽऽदिद्विकाऽऽदिसङ्ख्याप्रदर्शनम् | ८२-८३ |
| पिण्डप्रकृत्युत्तरभेदसङ्ख्या | ८३ |
| पिण्डप्रकृत्युत्तरभेदाः | ८३-९९ |
| गतिनामोत्तरभेदाः | ८३-८४ |
| जातिनामोत्तरभेदाः | ८४-८५ |
| शरीरनामोत्तरभेदाः क्रमहेतुश्च | ८५-८९ |
| अङ्गोपाङ्गनामोत्तरभेदाः | ८९ |
| औदारिकद्विकाऽऽदिवर्णनम् | ८९ |
| बन्धननामोत्तरभेदाः | ९०-९२ |
| संघातननामोत्तरभेदाः | ९२-९३ |
| संहनननामोत्तरभेदाः | ९३-९४ |
| संस्थाननामोत्तरभेदाः | ९४-९६ |
| वर्णनामोत्तरभेदाः | ९६ |
| गन्धनामोत्तरभेदाः | ९६-९७ |
| रसनामोत्तरभेदाः | ९७ |
| स्पर्शनामोत्तरभेदाः | ९७-९८ |
| आनुपूर्वीनामोत्तरभेदाः | ९८-९९ |
| विहायोगतिनामोत्तरभेदाः | ९९ |
| गोत्रकर्मोत्तरप्रकृती | ९९ |
| अन्तरायकर्मोत्तरप्रकृतयः | १००-१०१ |
| सर्वोत्तरप्रकृतिसङ्ख्योपसंहारः | १०२ |
| सत्ताऽऽदि प्रतीत्य प्रकृतिसङ्ख्याविशेषः | १०३ |
| ग्रन्थसमाप्त्याद्युपसंहारः | १०४ |
| नव परिशिष्टानि | १०६-११५ |
| प्रथमपरिशिष्टे मूलगाथाः | १०६ |
| द्वितीयपरिशिष्टे मूलगाथाऽऽद्यांशाः | १०७ |
| तृतीयपरिशिष्टे साक्षिग्रन्थाः | १०७-१०८ |
| चतुर्थपरिशिष्टे साक्षिग्रन्थकाराः | १०९ |
| पञ्चमपरिशिष्टेऽतिदिष्टग्रन्थाः | ११० |
| षष्ठपरिशिष्टेऽतिदिष्टग्रन्थकाराः | १११ |
| सप्तमपरिशिष्टे न्यायाः | १११ |
| अष्टमपरिशिष्टे व्याकरणसूत्राणि | ११२-११३ |
| नवमपरिशिष्टे धातुपाठाः | ११३ |
| दशमपरिशिष्टे मूलोत्तरप्रकृतिप्रदर्शियन्त्रम् | ११४-११५ |

# ग्रन्थकारः

**जन्म**
वि. सं. १९९४
चै. सु. १२ सोम.
नवागाम-हालार

**दीक्षा**
वि. सं. २०११
म. सु. १०
दादर-मुंबई

**वडीदीक्षा**
वि. सं. २०११
वै. सु. ७
पूना-महाराष्ट्र



**गणिपदवी**
वि. सं. २०४१
ज्ये० सु. १०
पालडी-राजस्थान

**पन्न्यासपदम्**
वि. सं. २०४४
फा. व. ३
शंखेश्वरतीर्थ-गुजरात

**आचार्यपदवी**
वि. सं. २०४६
फा. सु. ११
डोळिचा-सौराष्ट्र

# आचार्यश्रीविजयवीरशेखरसूरिः

॥ ॐ ह्रीँ श्रीँ अर्हं नमः ॥

॥ श्रीमहावीरस्वामिने नमः ॥ ॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः॥ ॥ श्रीगौतमस्वामिने नमः ॥

॥ श्री विजयानन्द-कमल-वीर-दान-प्रेम-रामचन्द्र-हीरसूरीश्वरसद्गुरुभ्यो नमः ॥

# आचार्यश्रीविजयवीरशेखरसूरिकृतं

# स्वोपज्ञ-

# प्रेमप्रभावृत्तिराजितं

# कर्मप्रकृतिकीर्तनम्

## ॥ अथ मङ्गलाऽऽदिचतुष्कम् ॥

*प्रेमप्रभावृत्तिः*– कीर्तितकर्मप्रकृतिं, संदग्धसमस्तकर्मकाष्ठौघम् ।
पावापुरिलब्धशिवं, श्रीवीरजिनेश्वरं स्तौमि ॥१॥ (पथ्यार्या)
त्रिपदीमथिना जाता, द्वादशाङ्गीन्दवो यतो ।
तान् श्राद्धप्रतिमासङ्ख्यान्, गणधरोदधीन् स्तुवे ॥२॥ (अनुष्टुब्)
पञ्चाशतः सहस्राणां, केवलिनां गुरुं नुमः ।
गौतमं गणभृत्स्वाद्यं, सर्वर्द्धिसिद्धिलब्धिदम् ॥३॥ (अनुष्टुब्)
निक्षेपनीरपूरं, संयमरत्नाकराऽऽगमसमुद्रम् ।
प्रणमामि सप्तभङ्गी- गम्भीरं सप्तनयवेलम् ॥४॥ (पथ्यार्या)
श्रीश्रुतदेवीं स्मृत्वा, हृदि कर्मप्रकृतिकीर्तनं तन्वे ।
स्वोपज्ञया हि वृत्त्या, प्रेमप्रभया यथासूत्रम् ॥५॥ (पथ्यार्या)

इह खलु नारकतिर्यग्नराऽमरगतिनिबन्धनविविधशारीरमानसाऽनेकदुःखविकरालमत्स्यमकर-कच्छपाऽऽदिभयानके मोहफूत्काराऽन्विताऽज्ञानरजोवृष्टिसहिता मूलाऽष्टकर्ममहाविकटझञ्झावातैरतिभयावहे जन्म-जरा-मरण-रोग-शोकाद्यशेषोपद्रवाऽऽवर्तपरिपूरिते नानाभवसंचिताऽशुभकर्मकलापविपाकजन्यसंयोग-वियोग-संकल्प-विकल्पाऽऽदिवेलाऽऽकुले एकेन्द्रियाऽऽदिभवपीडाऽतिविषमगंभीरे मिथ्यात्व-प्रमादा-ऽविरताऽऽदितरङ्गकलिते क्रोधाऽऽदिकषायपारिपन्थिकत्राससंकलिते राग-द्वेषाऽऽदिनगयुतेऽनाद्यपारे संसारपारावारे निमज्जतां सत्त्वानामचिन्त्यचिन्तामणिकल्पमनुष्यजन्माऽऽदिसामग्र्यन्वितं

जिनधर्मं महापोतमिव कथमपि लब्ध्वा परमाऽऽनन्दलक्षणनिःश्रेयसपदमवाप्तुकामेन तदर्थं स्व-परसममानसीभूय स्वपरोपकाराय प्रयतितव्यम् । तत्राऽपि महत्यामाशयविशुद्धौ परोपकृतिः कर्तुं शक्यते इत्याशयविशुद्धिप्रकर्षसम्पादनाय विशेषतः परोपकारे यत्न आस्थेयः, परोपकारश्च द्विधा द्रव्यतो भावतश्च तत्र द्रव्यतो विविधाऽन्नपानकाञ्चनाऽऽदिप्रदानजनितः स च नैकान्तिकः, कदाचित्ततो विसूचिकाऽऽदिदोषसम्भवात्, नाऽप्यात्यन्तिकः, कियत्कालमात्रस्थायित्वात् भावतः पुनरर्हदुदितधर्मसम्पादनजनितः, स चैकान्तिकः, कदाचिदपि ततो दोषाऽसम्भवात्, आत्यन्तिकश्च, परम्परया शाश्वतिकमोक्षसौख्यसम्पादकत्वात्, सोऽपि धर्मो द्विविधः, श्रुत-चारित्रभेदात् तत्र श्रुतधर्मः स्वाध्यायः, चारित्रधर्मः क्षान्त्यादिरूपो दशधा श्रमणधर्मः । तत्राऽपि श्रुतधर्मस्य प्राधान्यमस्ति, यतः श्रुतधर्मसम्पत्समन्विता एव प्रायश्चारित्रधर्माऽभ्युपगमयथा-वत्परिपालनसमर्था भवन्ति, सोऽपि श्रुतधर्मोऽनेकधा भवति, श्रुतविषयाणामनेकविधत्वात्, तस्मिन् दुःखबीजदहनविषयप्रतिपादक-द्रव्याऽनुयोगश्रुतधर्मस्य प्रधानता समस्ति, अत्र जगति सर्वदेहिनां सुखाऽभिलाषुकत्वे दुःखप्रतिपक्षत्वे चाऽपि दुःखबीजज्ञानाऽभावेन प्रयत्नतोऽपि दुःखोपलम्भात् । दुःखस्य मौलं बीजं रागद्वेषाऽऽदयः, परम्परया कर्म । **तथाहि-** रागद्वेषाऽऽदिभिः कर्मबन्धाऽऽदिर्जायते, तेन च भवाऽब्धौ निमज्जन्तो जीवा दुःखवाडवाऽग्निना पराभवन्ति दुःखबीजस्याऽधिगमेन पुनस्ते दुःखबीजं सन्दह्याऽचिरेण सच्चिदाऽऽनन्दरूपमनन्तमव्याबाधसुखाऽऽस्पदं निखिलकर्मक्षयप्राप्यं मोक्षं लब्धुं समर्थीभवन्ति । प्रकृताऽभिधास्यामानग्रन्थस्याऽपि दुःखबीजभूतरागद्वेषाऽऽदिजनितकर्मप्रकृतिविषयकप्रतिपादकत्वेन तद्ग्रन्थनेनाऽत्यन्तश्रेष्ठश्रुतज्ञानदानविषयोपकृतौ गरीयान् प्रयत्नः कृतः स्यादित्यतः प्रेरितश्च कर्मसाहित्यनदीष्णैर्मार्गणाद्वारविवरण-संक्रमकरणाद्यनेकग्रन्थनिर्मातृभिः सुविशालगच्छाऽधिपतिभिर्वर्तमानकाले सर्वाऽधिकसाधुपरिवारैर्वात्सल्यनिधिभिः सिद्धान्तमहोदधिभिः परमपूज्यगुरुवर्यैः **श्रीमद्विजयप्रेमसूरीश्वर**नामधेयैर्ग्रन्थकारो ग्रन्थं प्रारिप्सुरादौ तावत् शिष्टजनसमयपरिपालनायाऽखिलविघ्नविध्वंसाय च मङ्गलाऽर्थं शिष्यजनप्रवर्तनायाऽभिधेयाऽऽद्यभिधानाऽर्थं चाऽऽद्यां पथ्याऽऽर्यां वक्तुमुपक्रमते—

**णमिऊणं कम्मपयडि - विणासिपावापुरित्थसिरिवीरं ।**
**कित्तेमि कम्मपयडी , सपरहियऽत्थं गुरुकिवाए ॥१॥**

(प्रे०) "**णमिऊणं**" इत्यादि, 'कर्मप्रकृतिविनाशिपावापुरिस्थश्रीवीरं' कर्मप्रकृतीनां वक्ष्यमाणस्वरूपाणां विनाशी = घातकरः कर्मप्रकृतिविनाशी = कर्मप्रकृतिविदारकः, पावापुर्याम् = अपापानगर्या एव वीरप्रभुनिर्वाणभवनेन कृतापरसंज्ञकायां पुरि तिष्ठतीति "स्था-पा-स्ना-त्रः कः" - (सि० ५-१-१४२) इत्यनेन सूत्रेण कप्रत्यये पावापुरिस्थः = पावानाम्न्यां पुर्यां वर्ती "ईरिक् गति-कम्पनयोः" विशेषेणाऽपुनरावृत्त्या ईर्ते = गच्छति प्राप्नोति वा सिद्धिं स्वयमिति वीरः, **यद्वा** वि = विशेषेणाऽपुनरावर्त्तेनैरयति = गमयति = प्रापयति वा भव्यप्राणिनो मुक्तिमिति वीरः, **यद्वा** वि = विशेषेणेर्त्ते = कम्पयति स्फेटयति नाशयति अपनयति विनमयति वा कर्मेति वीरः, **यद्वा** "ईरण् क्षेपे" वि = कियत्क्षपितकर्मसाध्वपेक्षया विशेषत ईरयति = क्षिपति तिरस्करोति क्षपयति वाऽशेषाण्यपि कर्माणीति वीरः, **यद्वा** धातूनामनेकार्थत्वात् "ईर् गति-प्रेरणयोः" इति पाणिनीयधातुपाठाद्वा वि = विशेषेणेरयति = प्रेरयति = निराकरोत्यष्टप्रकारं कर्माऽऽन्तराऽरिषड्वर्गं वेति वीरः, **यद्वा** वि = विशेषेणेरयति = प्रेरयति = व्यापारयत्यन्तरङ्गमोहमहाबलनिर्दलनाऽर्थमनन्तं तपोवीर्यमिति वीरः, **यद्वा** वि = विशेषेणेरयति = कर्म गमयति याति चेह शिवमिति वीरः, **यद्वा** "शूर वीरणि विक्रान्तौ" वीरयते स्म,

**अथवा** "शूर वीर विक्रान्तौ" इति परस्मैपदी पाणिनीयधातुः, वीरयति स्म कषायान् रागाऽऽदिशत्रून् वा प्रति विक्रामति स्मेति वीरः, सर्वत्राऽपि "लिहाऽऽदिभ्यः" (सि०-५-१-५०) इत्यनेन "अच्"(सि०-५-१-४९) इत्यनेन वा कर्त्तर्यच्प्रत्यये रूपनिष्पत्तिः **अथवा** "दृ विदारणे" इति विपूर्वकस्य दृधातोर्विदारयति कर्मशत्रुसङ्घट्टमिति वीरः, पृषोदराऽऽदित्वात्साधुः । **अथवा** "राजृग् टुभ्राजि दीप्तौ" इति विपूर्वस्य राज्धातोर्विराजते = शोभतेऽनन्याऽनुभूतमहातपःश्रिया घनघातिकर्मसंघातविदारणाऽनन्तरं प्राप्ताऽतुलकेवललक्ष्म्या वेति वीरः । **तथा चोक्तम्**— "विदारयति यत्कर्म, तपसा च विराजते । तपो-वीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ॥१॥" इति । **अथवा** "अज् क्षेपणे च" अजति = क्षिपति मोहाऽऽदिरिपुवर्गमिति वीरः, **यद्वा**ऽजति = गच्छति स्वयं शिवमिति वीरः, ऋज्यजि..... (सि० उणा० ३८८) इत्यनेन किद्रप्रत्ययः, अज्धातोश्च "अघञक्यबलच्यजेर्वी" (सि०-४-४-२) इत्यनेन "वि" इत्यादेशः । **अथवा** "सर्वे गत्यर्था ज्ञानाऽर्थाः" इति **वचना**द् वि = विशिष्टः, ईरणमीरः = ज्ञानं यस्य स वीरः । **अथवा** "रांक् दाने" इत्यदादिधातुः, वि = विशिष्टा विश्वविश्वजनचेतश्चमत्कारिणी, इः = लक्ष्मीस्तां राति = भव्येभ्यः प्रयच्छतीति वीरः, "आतो डो-ऽह्वा-वा-मः" (सि० ५-१-७६) इत्येनेन कर्तरि डप्रत्ययः । श्रिया = शोभया समग्रप्राणिगणमनोविस्मयजनन्यष्टमहाप्रातिहार्यलक्षणया चतुस्त्रिंशदतिशयसमृद्ध्यनुभवात्मकभावाऽर्हन्त्यरूपया सङ्क्रान्तलोकाऽलोककेवलज्ञानदर्पणलक्ष्म्या वा युक्तो वीरः = अचरमतीर्थनायकश्चरमतीर्थपतिर्वर्द्धमानस्वामी श्रीवीरः, कर्मप्रकृतिविनाशी चाऽसौ पावापुरिस्थश्चाऽसौ श्रीवीरः कर्मप्रकृतिविनाशिपावापुरिस्थश्रीवीरः,तम्, कर्मप्रकृतिविनाशिपावापुस्थिश्रीवीरम् । **"नत्वा"** नमस्कृत्य । अनेन ग्रन्थकृता मङ्गलोपन्यासः कृतः ।

तत्र मङ्गलं नामाऽऽदिभेदेन चतुर्विधम् । **तद्यथा**-नाममङ्गलम्, स्थापनामङ्गलम्, द्रव्यमङ्गलम्, भावमङ्गलं च ।

**उक्तञ्च श्रीमज्जिनभद्रगणिक्षमाश्रमणैर्विशेषाऽऽवश्यकभाष्ये** –

"मं गालयइ भवाओ, मंगलमिह एवमाइ नेरुत्ता । भासंति सत्थवसओ, नामाऽऽइचउव्विहं तं च ॥२४॥" इति ।

**तथाऽन्यत्राऽपि** – "नामं ठवणा दविए, भावम्मि य मंगलं भवे चउहा ॥ ॥" इति ।

तत्र जीवद्रव्यस्य वाऽजीवद्रव्यस्य वा, एकस्य वा, अनेकेषां वा, यन्मङ्गलमिति नाम = संज्ञा नियमितं तद् "नाम-नामवतोरभेदोपचारात्" नाममङ्गलम् । या सद्भूताऽऽकारस्य घटादेरसद्भूताऽऽकारस्य वाऽक्षवराटकाऽऽदेर्मङ्गलमिति स्थापना विहिता सा स्थापनामङ्गलम् । तदपि द्विविधम् । यावत्कथिकं = शाश्वतं नन्दीश्वरचैत्यप्रतिमादिः, इत्वरम् = अल्पकालीनं चित्राऽक्षाऽऽदिकस्थम् ।

द्रव्यमङ्गलं द्विविधम्, आगमतो नोआगमतश्च । तत्राऽऽगमतो मङ्गलपदार्थस्य ज्ञाताऽनुपयुक्तश्च "अनुपयोगो द्रव्यम्" इति **वचना**त् । नोआगमतः पुनस्त्रिविधम् । **तद्यथा**-ज्ञशरीरद्रव्यमङ्गलम्, भव्यशरीरद्रव्यमङ्गलम्, तद्व्यतिरिक्तद्रव्यमङ्गलम् । तत्र मङ्गलपदार्थज्ञातुर्यद्व्यपगतजीवं शरीरं तज्ज्ञशरीरद्रव्यमङ्गलम्, अतीतकालनयाऽनुवृत्त्याऽतीतमङ्गलपदार्थज्ञानाऽऽधारत्वात्, भव्यस्य = मङ्गलपदार्थज्ञानयोग्यस्य यत्सचेतनं शरीरं तद्भव्यशरीरद्रव्यमङ्गलम्, भविष्यत्कालनयाऽनुवृत्त्या भविष्यन्मङ्गलपदार्थज्ञानाऽऽधारत्वात् । उभयत्राऽपि नोशब्दस्य सर्वनिषेधपरत्वादिदानी वर्तमानकाले सर्वथैवाऽऽगमाऽभावः । यदि वा नोशब्दो देशनिषेधपरो विवक्ष्यते तदाऽचेतनाऽपि ज्ञभव्यतनुर्यथासङ्ख्येयमतीतमङ्गलपदार्थज्ञानलक्षणस्य भविष्यन्मङ्गलपदार्थज्ञानरूपस्याऽऽगमस्य हेतुत्वात्, आगमैकदेशे वर्तत एव कारणस्य कार्यैकदेशवर्तित्वात्, यथा मृत्तिका घटस्य ।

तदिति ताभ्यां = ज्ञशरीर-भव्यशरीराभ्यां व्यतिरिक्तं = भिन्नमनुपयोगेन प्रत्युपेक्षणाऽऽदिमङ्गलक्रियालक्षणम्, **यद्वा** स्वस्तिक-श्रीवत्साद्यष्टमङ्गललक्षणम्, सुवर्ण-रत्न-दध्य-ऽक्षत-कुसुम-मङ्गलकलशाऽऽदिलक्षणं वा मङ्गलं तद्व्यतिरिक्तद्रव्यमङ्गलम्, इदं द्रव्यमङ्गलमनेकान्तिकमनात्यन्तिकं च भवति । **तथाहि-**चौरस्य कर्षकस्य च शकुनतया रिक्तो घट उक्तः शकुनज्ञैरतो न पूर्णकलश एकान्तेन सर्वेषां मङ्गलाय । **तथा चोक्तम्** –

''चोरस्स करिस्सगस्स य, रित्तं कुडयं जणो पसंसेइ । गेहपवेसे भण्णइ, पुण्णो कुम्भो पसत्थो उ ॥१॥'' इति।

अतोऽनेकान्तिकम् । नाऽप्यात्यन्तिकं यथा कोऽपि शोभनैर्द्रव्यमङ्गलैर्विनिर्गतस्ते चाऽग्रे किञ्चिदशोभनं दृष्टं तेन तानि सर्वाण्यपि प्राक्कृतानि प्रतिहतानि तत एवमनात्यन्तिकमिति ।

भावमङ्गलं तु तद्विपरीतमेकान्तिकमात्यन्तिकं च भवति । **तद्यथा-** न तद्भावमङ्गलं कस्यचिद्भवति कस्यचिन्न भवतीति, किन्तु सर्वस्याऽप्यविशेषेण भवत्येवेत्यैकान्तिकम्, न च केनाऽप्यन्येन प्रतिहन्यते, इत्यात्यन्तिकम् ।

तदपि भावमङ्गलं द्विविधम्, आगमतो नोआगमतश्च, तत्राऽऽगमतो भावमङ्गलं मङ्गलपदार्थस्य ज्ञाता तज्ज्ञानोपयुक्तश्च, नोआगमतस्तु सर्वनिषेधवाचकं नोशब्दमाश्रित्य प्रशस्तः क्षायिक-क्षोयोपशमिकाऽऽदिको भावः, भाव एव मङ्गलं भावमङ्गलमिति व्युत्पत्त्या, उपलक्षणादागमवर्जज्ञानचतुष्टय-दर्शन-चारित्राणि च वाच्यानि । **यदा** मिश्रवचनो नोशब्दो गृह्यते तदाऽऽगमपाठ-जिनेन्द्रदर्शन-प्रतिक्रमण-प्रत्युपेक्षणाऽऽदिक्रियां कुर्वाणस्य यो ज्ञान-दर्शन-चारित्रोपयोगपरिणामः,स भावो भावमङ्गलम्, यतो नाऽसौ ज्ञान-दर्शन-चारित्रोपयोगपरिणामः केवल एवाऽऽगमः, चारित्राऽऽदेरपि सद्भावान्नाऽप्यनागम एव, ज्ञानस्याऽपि विद्यमानत्वादिति मिश्रता । **अथवैक**देशाऽर्थो नोशब्दः प्रतिपाद्यते तदा चैत्यवन्दनाद्यवस्थायां यो नमस्काराऽऽदिज्ञान-क्रियामिश्रितपरिणामः, सोऽपि नोआगमतो भावमङ्गलम्, यतः परिणामस्यैकदेशे नमस्काराऽऽदिज्ञानोपयोगलक्षण आगमो वर्तते । इत्याद्यन्योऽपि नामाऽऽदिविषये विस्तरोऽस्ति ।

**स चाऽनुयोगद्वार-विशेषाऽऽवश्यका-ऽऽवश्यक-निशीथाऽऽदिवृत्तिग्रन्थतो** विशेषजिज्ञासुना ज्ञेयः।

तथा चेह श्रेयोभूते वस्तुनि प्रवर्तमानानां प्रायो विघ्नः संभवति, श्रेयोभूतत्वादेव ।

**उक्तञ्च** – ''श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां, क्वाऽपि यान्ति विनायकाः ॥'' इति ।

श्रेयोभूतं चेदं महाशास्त्रं निर्जराहेतुत्वात्पारम्पर्येण मोक्षहेतुत्वाच्च, विघ्नोपहतशक्तेश्च शास्त्रकर्तुश्चिकीर्षितशास्त्रा-ऽसंसिद्ध्याऽभिप्रेतपुरुषार्थस्याऽनिष्पत्तिर्मा भूदिति विघ्नसमूहोपशमनाय मङ्गलमुपादेयम् ।

**उक्तञ्च** – ''बहुविग्घाइं सेयाइं तेण कयमंगलोवयारेहिं । सत्थे पयट्टिअव्वं, विज्जाएँ महानिहीएव्व ॥'' इति ।

**ननु** मानसाऽऽदिनमस्कार-तपश्चरणाऽऽदिना मङ्गलान्तरेणैव विघ्नोपघातसद्भावादिष्टसिद्धिर्भविष्यतीत्यतः किमनेन ग्रन्थगौरवकारिणा वाचनिकनमस्कारेणे**ति चेत्**, सत्यम्, किन्तु श्रोतृप्रवृत्त्यर्थमिदं भविष्यति । **तथाहि-**यद्यप्युक्तन्यायेन कर्तुरविघ्नेनेष्टसिद्धिः स्यात्तथाऽपि प्रमादवतः शिष्यस्येष्टदेवतानमस्काररूपं ग्रन्थनिबद्धं वाचनिकं मङ्गलं विना प्रकान्तग्रन्थाऽध्ययनश्रवणाऽऽदिषु प्रवर्तमानस्य विघ्नसंभवादप्रवृत्तिः स्यात् । मङ्गलवाक्योपन्यासे तु मङ्गलप्रवचनाऽभिधानपूर्वकं प्रवर्तमानस्य मङ्गलवचनाऽऽपादितदेवताविशेषशुभभावव्यपोदितविघ्नत्वेन शास्त्रे प्रवृत्तिरप्रतिहतप्रसरा स्यात् । तथा देवताविशेषनमस्कारोपादाने सति देवताविशेषगदिताऽऽगमानुसारीदं शास्त्रमत उपादेयमित्येवंविधबुद्धिनिबन्धनत्वेन शिष्यप्रवृत्त्यर्थमिदं भवति ।

**उक्तञ्च** – "मंगलपुव्वपवत्तो, पमत्तसीसो वि पारमिह जाइ । सत्थिविसेसण्णाणा, तु गोरवादिह पयट्टेज्जा ॥" इति ।

**ननु** मङ्गलविकलानामपि बहुतमशास्त्राणां दृश्यते संसिद्धिस्तत्र श्रोतृजनप्रवृत्तिश्च ततः किमनेनाऽनेकान्तिकेन ग्रन्थगौरवकारिणा च मङ्गलेनाऽभिहितेने**ति चेत्** ?, **सत्यम्,** किन्तु शिष्टजनाऽऽचारपरिपालनाऽर्थमिदं भविष्यति । **तथाहि-** शिष्टाः क्वचिदभीष्टे वस्तुनि प्रवर्तमाना इष्टदेवतानमस्कारपूर्वकं प्रायः प्रवर्तन्ते । शिष्टश्चाऽयं ग्रन्थकार इति शिष्टसमाचारपरिपालितो भवत्विति मङ्गलमभिधेयम् । **आह च -**

"शिष्टाः शिष्टत्वमायान्ति, शिष्टमार्गाऽनुपालनात् । तल्लङ्घनादशिष्टत्वं, तेषां समनुपद्यते ॥ ॥" इति ।

तच्च मङ्गलं शास्त्रस्य प्रारम्भेऽन्तराले प्रान्ते च कर्तव्यम् ।

**उक्तञ्च विशेषावश्यकभाष्ये –** "तं मंगलमाईए, मज्झे पज्जन्तए य सत्थस्स ...॥१३॥" इति ।

**न चा**ऽऽदिमङ्गलेनैवाऽभिष्टाऽर्थस्य सिद्धत्वान्मङ्गलत्रयकरणमयुक्तमिति वाच्यम्, यत आदिमङ्गलमात्रादभीष्टार्थसिद्धिर्न जायते । **तथाहि-आद्यमङ्गलं** हि विवक्षितग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थम् ।

**तथा चोक्तं विशेषाऽऽवश्यकभाष्ये-** "पढमं सत्थत्थाऽविग्घपारगमनाय निद्दिट्ठं ॥१३॥" इति ।

**ननु** न मङ्गलं समाप्तिजनकं कादम्बरी-नास्तिकाऽनुष्टितयोरन्वय-व्यतिरेकाभ्यां व्यभिचारात् । **न च** स्वसमसङ्ख्यविघ्नस्थलीयसमाप्तौ तत्कारणम्, नास्तिकाऽनुष्ठितस्थले च जन्माऽन्तरीयमङ्गलादेव च समाप्ति**रिति वाच्यम्,** विघ्नाऽधिकसङ्ख्यमङ्गलस्थले समाप्त्यभावप्रसङ्गात् । **न च** स्वाऽनधिकन्यूनसङ्ख्यविघ्नस्थलीयत्वं **निवेश्यम्,** यत्र दश विघ्नाः, पञ्च प्रायश्चित्तेन नाशिताः, पञ्च मङ्गलानि, तत्र समाप्त्यभावप्रसङ्गात् । **न च** प्रायश्चित्ताद्यनाश्यस्वानधिकसङ्ख्यविघ्नस्थलीयत्वं निवेश्यम्, बलवतो विघ्नस्य बहुभिरपि मङ्गलैरनाशाद्बलवता मङ्गलेन बहूनामपि विघ्नानां नाशाच्च । **किञ्च** विघ्नः समाप्तौ विशेषणम् उपलक्षणं वा? नाऽऽद्यः, विघ्नस्याऽपि जन्यत्वाऽऽपत्तेः, नाऽन्त्यः, नियतोपलक्ष्याऽवच्छेदकाऽभावादिति दिक् ।

आवश्यकत्वाद्विघ्नध्वंस एव मङ्गलफलम्, समाप्तिस्त्वसति प्रतिबन्धके स्वकारणादेव भवति, कारीरीतोऽवग्रहनिवृत्तौ वृष्टिरिव । "निर्विघ्नं परिसमाप्यताम्" इति कामनाऽपि "सविशेषणे हि विधिनिषेधौ" इति **न्याया**द्विघ्नध्वंसमात्राऽवगाहिनी, इत्यपि मतं न रमणीयम् । मङ्गलं विनाऽपि विघ्नध्वंसस्य प्रायश्चित्तादितो भावेन व्यभिचारात् । **न च** प्रायश्चित्ताद्यनाश्यविघ्नध्वंसे मङ्गलं हेतुरतो न दोष **इति वाच्यम्;** प्रायश्चित्ताऽऽदीनामपि मङ्गलाद्यनाश्यविघ्नध्वंसं प्रति हेतुत्वेऽन्योन्याश्रयात् । **'विघ्नो मा भूत्'** इति कामनया प्रवृत्तेर्विघ्नप्रागभाव एव मङ्गलफलमित्यपि न पेशलं वचनम्, प्रागभावस्याऽनादित्वेनाऽसाध्यत्वात्, स्वत आगन्तुकस्य समयविशेषस्य सम्बन्धरूपस्य तत्परिपालनस्याऽदृष्टद्वाराऽभीप्सितसिद्धिहेतुत्वे मङ्गलस्यैवाऽदृष्टाऽर्थत्वौचित्याद् विघ्नमविनाश्य धर्मविशेषस्य शिष्टाऽऽचारपरिपालनरूपस्य समाप्त्यहेतुत्वे मङ्गलफलतया विघ्ननाशस्यैवाऽऽवश्यकत्वाच्च । **किञ्च** शिष्टाऽऽचारेण विधिबोधितकर्तव्यत्वमनुमाय मङ्गले प्रवृत्तिरेव तत्परिपालनम्, न सा तत्फलम्, किन्तु तज्जनिकेति । **नचा**ऽऽचारप्राप्ताऽतिलङ्घने प्रत्यवायस्मरणात् प्रत्यवायित्वपर्यवसन्नाऽशिष्टत्वशङ्कानिरास एव तत्फल**मिति वाच्यम्,** तादृशशङ्कायाः शिष्याऽवधानप्रतिपक्षत्वेऽपि समाप्त्यप्रतिपक्षत्वात्, "कामनाविशेषनियतकर्तव्यताकस्य मङ्गलस्य तदभावेनाऽकरणे पि न प्रत्यवायः" इति विशेषदर्शनेन तच्छङ्कानिवृत्तेश्च तस्मान्मङ्गलं निष्फल**मिति चेत्** ।

**अत्र प्रतिविधीयते** विघ्नध्वंस एव मङ्गलं हेतुः, **न चो**क्तव्यभिचारः, प्रायश्चित्ताऽऽदीनामपि मङ्गलत्वात्, "प्रारिप्सितप्रतिबन्धकदुरितानिर्वृत्यसाधारणं मङ्गलम्" इति हि तल्लक्षणं परैर्गीयते तत्र लाघवात् "प्रारिप्सितप्रतिबन्धक" इति विशेषणं त्यजत इति । **तदिदमुक्तमाकरे** - "स्वाध्यायाऽऽदेरपि मङ्गलत्वाऽविरोधात्" इति । तथाऽपि नाऽनेन रूपेन हेतुत्वम्, आत्माऽऽश्रयात्, किन्तु नतित्वादिना प्रातिस्विकरूपेणैव इति व्यभिचार एवे**ति चेत्** ? **न,** नत्याद्यभिव्यङ्ग्भावविशेषस्यैव निश्चयतो दुरितक्षयहेतुत्वात्, न कोऽपि दोष इति सर्वमवदातम् ।

**परे तु** विघ्नध्वंस-तत्प्रागभाव-परिपालन-समाप्तिप्रचयगमन-शिष्टाऽऽचारपरिपालनानां सर्वेषामेवाऽविनिगमाद् मङ्गलफलत्वम्, तत्तत्कामनया मङ्गलेन तत्तत्फलकत्वोन्नयनात् "अनुमानव्यवस्थानात् तत्संयुक्तं प्रमाणं स्यात्" (जैमि०१-३-१५) इति **न्यायेन** यथाचारमेव श्रुतिकल्पनात् **न चै**कमङ्गलप्रयोगादनेकफलाऽऽपत्तिः, अनेकफलबोधकश्रुतावुद्देश्यसाहित्याऽविवक्षणात्, अन्यथा "सर्वेभ्यो दशपूर्णमासौ" इत्यत्राऽपि तत्प्रसङ्गात्, कादम्बर्यादौ समाप्तिकामनया मङ्गलाऽऽचारे मानाऽभावान्न दोष **इत्याहुः** ।

अनेकफलकात्कर्मण उद्देश्या-ऽनुद्देश्य-प्रधाना-ऽप्रधानबहुविधफलदर्शनान्नैतद्युक्तमित्य**परे** ।

अथ **मध्यमङ्गलं** प्रथममङ्गलकरणसामर्थ्यादविघ्नेन समाप्तस्य शास्त्रस्य स्थिरताऽऽपादनाऽर्थम्, **अन्तिममङ्गल**ञ्च मध्यमङ्गलेन स्थिरीभूतस्य शास्त्रस्य शिष्य-प्रशिष्याऽऽदिवंशेऽव्यवच्छित्तिनिमित्तम् ।

**तथैव प्रतिपादितं विशेषाऽऽवश्यकभाष्ये –**

"तस्सेव थेज्जत्थं, मज्झिमयं अंतिमं पि तस्सेव । अव्वोच्छित्तिनिमित्तं, सिस्सपसिस्साऽऽइवंसस्स ॥१४॥" इति ।

**ननु** इदं मङ्गलत्रयं शास्त्राद्भिन्नमभिन्नं वा?, उभयथाऽपि दोषः, **तथाहि** - यदि **भिन्नम्,** ततः शास्त्रस्याऽमङ्गलत्वप्रसङ्गः, मङ्गलाद्भिन्नत्वात्, तदन्यवस्त्वन्तरवत्, यच्च स्वरूपेणाऽमङ्गलं तदन्यमङ्गलकदम्बकेनाऽपि मङ्गलीकर्तुं न शक्यते, स्वभावस्य च्यावयितुमशक्यत्वात्, न खलु काचः स्वरूपेणाऽवैडूर्यमणिः सन् केनाऽपि कथमपि वैडूर्यमणीक्रियते, ततो निरर्थको मङ्गलोपन्यासः स्वकार्याऽकरणात्, अथ मङ्गलीकर्तुमशक्यस्याऽपि मङ्गलमुपादीयते, तथा लोकप्रवृत्तेः, तह्यनवस्थाप्रसङ्गः, **तथाहि-** यथा प्रागमङ्गलस्य सतः शास्त्रस्य मङ्गलमुक्तं तथैव मङ्गलान्तरमपि वक्तव्यम् आद्यमङ्गलाऽभिधानेऽपि तस्याऽमङ्गलत्वात् प्राक्शास्त्रवत्, एवं मङ्गलान्तराऽभिधानेऽप्यन्यन्मङ्गलमभिधातव्यम्, न्यायस्य समानत्वात् तत्राऽप्यन्यदित्य**नवस्था** । **अथाऽभिन्नमिति पक्षः,** तर्हि शास्त्रमेव मङ्गलमित्यन्यमङ्गलोपादानमनर्थकमेव, अमङ्गले हि मङ्गलमुपादीयते यच्च स्वत एव मङ्गलं तत्र किं मङ्गलविधानेन?, नहि शुक्लं शुक्लीक्रियते, नाऽपि स्निग्धं स्नेह्यते, अथ मङ्गलभूतस्याऽप्यन्यन्मङ्गलमुपादीयते तर्हि तेनाऽपि मङ्गलीभूतस्याऽन्यन्मङ्गलमुपादातव्यम्, मङ्गलरूपत्वाऽविशेषात्, तत्राऽप्यन्यदित्य**नवस्था**, अथ मा भूत् प्रस्तुताऽर्थहानिरित्यनवस्था नेष्यते तर्हि शास्त्रस्याऽमङ्गलत्वप्रसङ्गः, **कथमिति चेत्, उच्यते,** इह यथा शास्त्रं स्वतो मङ्गलमपि अन्यमङ्गलनिरपेक्षममङ्गलम्, अन्यथा अन्यमङ्गलोपादाननैरर्थक्यप्रसक्तेः, यदि हि अन्यमङ्गलनिरपेक्षमपि तन्मङ्गलं भवेत् तर्हि नाऽन्यमङ्गलमपेक्षेत, स्वतः समर्थस्य व्यपेक्षाया अयोगात्, अन्यमङ्गलव्यपेक्षा चेत् नूनममङ्गलता, तस्य स्वरूपत एव

मङ्गलस्याऽप्यन्यमङ्गलशून्यस्याऽमङ्गलतेति, अनवस्थाऽऽनिष्टौ सत्यां मङ्गलममङ्गलम्, तद्योगाच्छास्त्रमप्यमङ्गलमित्यमङ्गलता शास्त्रस्ये**ति चेत्, उच्यते** – आद्यपक्षस्तावन्नेह स्वीक्रियते, ततोऽस्वीकारतिरस्कृतत्वादेव नाऽस्माकं हानिरुपपद्यते, यदि वा "तुष्यन्तु दुर्जनाः" इति **न्याये**नाऽभ्युपगतेऽपि तस्मिन्न प्रागुक्तदोषाऽवकाशः, यतोऽस्मिन् जगति द्विविधानि वस्तूनि सन्ति, **तद्यथा-** भाव्यानि अभाव्यानि च, तत्र काचाऽऽदीन्यभाव्यानीति न तानि वैडूर्यरूपतया कर्तुं शक्यन्ते, शास्त्राणि तु भाव्यानि, अतः स्वरूपेणाऽमङ्गलान्यपि तानि मङ्गलरूपतया परिणम्यन्ते, मङ्गलस्य स्वं परं तद्रूपताऽऽपादने समर्थत्वात्, लवणप्रदीपाऽऽदिवत्, यथा हि प्रदीपः स्व-परप्रकाशनसमर्थत्वात् स्वं परं च प्रकाशयति, यथा वा लवणं स्व-परलवणिमस्वभावाऽऽपादने समर्थतया स्वं परं च लवणयति, एवं मङ्गलमपि स्व-परमङ्गलकरणसमर्थत्वात् स्वं परं च मङ्गलयतीति न कश्चिद्दोषः, द्वितीयपक्षेऽपि न मङ्गलोपादाननैरर्थक्यम् शिष्यमतिमङ्गलपरिग्रहाय शास्त्रस्यैव मङ्गलत्वाऽनुवादात् ।

**इदमुक्तं भवति**-कथं नु नाम विनेयो मङ्गलमिदं शास्त्रमित्येवं गृह्णीयादिति । **तथाहि**-मङ्गलोपन्यासेन मङ्गलमिदं शास्त्रमिति प्रबोध्यते, **न चै**वमनवस्था प्रथममङ्गलोपन्यासे च शिष्यमतिमङ्गलपरिग्रहस्य कृतत्वात् अन्यमङ्गलकाङ्क्षाया निवृत्तेः, **न च** शास्त्रस्याऽमङ्गलत्वप्रसक्तिः, अन्यमङ्गलनिरपेक्षस्य तस्य स्वतो, मङ्गलत्वात्, मङ्गलं ह्यन्यदुपादीयते न शास्त्रस्य मङ्गलत्वकरणाय, तस्य स्वत एव मङ्गलत्वात्, किन्तु ?, शिष्यमतिमङ्गलपरिग्रहाय, ततः कथमन्यमङ्गलोपादानेऽनवस्थानिष्टौ शास्त्रस्याऽमङ्गलत्वमिति, **ननु** यदि शास्त्रं स्वतो मङ्गलं तर्हि यद्यपि मङ्गलमिदं शास्त्रमित्येवं न गृह्णाति विनेयस्तथाऽपि तत्स्वकार्यप्रसाधनसमर्थमेव, तस्य तथास्वभावत्वादिति कथमन्यमङ्गलोपादनं न निरर्थक**मिति** ?, तदेतदसम्यक्, अभिप्रायाऽपरिज्ञानात्, इह विचित्रा भावानां शक्तयः, किञ्चित्तथास्वरूपेण गृह्यमाणं स्वकार्यप्रसाधनसमर्थं यथा सुवर्णम्, सुवर्णं हि सुवर्णरूपतया परिगृह्यमाणं स्वफलप्रदानसमर्थं न लोष्टाऽदिरूपतयेति, किञ्चित्तथास्वरूपेणाऽगृह्यमाणमपि यथा किञ्चदनिष्टमन्तःसमुत्थव्याध्यादिकम्, तद्धि तथास्वरूपेणाऽविदितमपि स्वफलं दुःखमुत्पादयति, मङ्गलमपि मङ्गलबुद्ध्या परिगृह्यमाणं मङ्गलफलसाधनायाऽलम्, नाऽन्यथा, साधुवत्, **तथाहि-** साधुः सम्यग्दर्शन-ज्ञान-चारित्रपरिणामपरिणतो भाविताऽऽत्मा क्षान्तिनिधानं मङ्गलभूतोऽपि मङ्गलबुद्ध्यैव परिगृह्यमाणः सन् प्रशस्तचेतोवृत्तेर्भव्यस्य मङ्गलकार्यप्रसाधको भवति, यदि तु तथा न गृह्यते तर्हि तस्य कालुष्योपहतचेतसः सत्त्वस्य न भवतीति, एवं शास्त्रमपि स्वतो मङ्गलमपि सद् मङ्गलबुद्ध्या परिगृहीतं मङ्गलफलसाधकम्, नाऽन्यथा । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये** - "इह मङ्गलमपि मङ्गल-बुद्धीए मंगलं जहा साहू ।" (गा. २१) इति । **ननु** यदि मङ्गलमपि मङ्गलबुद्ध्या परिगृह्यमाणं मङ्गलम्, नेतरथाः, तर्हि भवन्मतेन मनः प्रमाणम्; यद् यथा मनः संकल्प्यते तत्तथोपजायते, नेतरदिति; एवं तर्हि अमङ्गलमपि मङ्गलबुद्ध्या परिगृहीतं मङ्गलकार्यकृत्प्राप्नोति, न्यायस्य तुल्यत्वात्, **न चै**तद् दृष्टमिष्टं वेति, यत्किञ्चिदेतद्, वस्तुतत्त्वाऽपरिज्ञानात्, मङ्गलं हि स्वरूपेण मङ्गलं ततस्तन्मङ्गलबुद्ध्या परिगृह्यमाणं मङ्गलफलसाधनायाऽलम्, स्वतो मङ्गलस्य स्वबुद्धिसहितस्य परिपूर्णसामग्रीकतया स्वकार्याऽभिनिर्वर्त्तनसमर्थत्वात्, काञ्चनवत्, काञ्चनं हि स्वतः काञ्चनं सत् काञ्चनबुद्ध्या परिगृह्यमाणं भवति काञ्चनफलकृत्, नाऽन्यथेति, प्रतीतमेतत्, यत्त्वमङ्गलं तत्स्वरूपतो मङ्गलं न भवति, ततः कथं मङ्गलबुद्ध्याऽपि तत्परिगृह्यमाणं मङ्गलकार्यकृत्, नहि लेष्ट्वादि काञ्चनबुद्ध्या परिगृहीतं

काञ्चनफलमुपजनयतीति । **ननु** यदि शिष्यमतिमङ्गलपरिग्रहाय मङ्गलोपन्यासस्तत आदिमङ्गलमेवाऽस्तु, शिष्यमतिमङ्गलपरिग्रहस्य तेनैव कृतत्वात्, किं मङ्गलत्रयोपादानेन ? **इति चेत् ?, न,** प्रागेवोत्तरस्य भणितत्वात्, आदिमङ्गलेन ह्यादौ मङ्गलमतिपरिग्रहः क्रियते, न मध्यमङ्गलमतिपरिग्रहो नाऽप्यवसानमङ्गलमतिपरिग्रहः, ततस्तत्राऽपि विवक्षितफलसाधनाय शिष्याणां मङ्गलमतिपरिग्रहो भूयादिति मङ्गलत्रयकरणम् यद्येवं मङ्गलत्रयाऽपान्तरालद्वयममङ्गलमापद्यते, तत्र मङ्गलमतिपरिग्रहाऽभावात्, नैष दोषः, सम्पूर्णस्यैव शास्त्रस्य त्रिधाविभक्तत्वेनाऽपान्तरालद्वयाऽसम्भवात्, मोदकवत्, तथा हि मोदके त्रिधाविभक्ते नाऽपान्तरालद्वयसम्भवस्तथाऽधिकृतशास्त्रेऽपि, तत आदिखण्डमादिमङ्गलेन मङ्गलबुद्ध्या परिगृहीतं मध्यं मध्यमङ्गलेनाऽवसानमवसानमङ्गलेन, स्वतो मङ्गलं च तदिति स्वस्वफलसाधनाय प्रभवति । अथ शास्त्रस्य कथं स्वतो मङ्गलम्, ?, **उच्यते-** निर्जराऽर्थत्वात्, **तथा चाऽत्राऽनुमानप्रयोगः-** अधिकृतं शास्त्रं सकलमपि मङ्गलम्, निर्जराऽर्थत्वात्, तपोवत्, अथ **कथ**मस्य निर्जराऽर्थते**ति चेत्, उच्यते-** ज्ञानरूपत्वाद् ज्ञानस्य च कर्मनिर्जरणहेतुत्वात् । **उक्तञ्च-**

"जं अन्नाणी कम्मं, खवेइ बहुयाहि वासकोडीहि । तन्नाणी तिहिँ गुत्तो, खवेइ ऊसासमेत्तेणं ॥१॥" इति ।

तस्मात् स्थितमेतत्-शास्त्रस्याऽऽदौ मध्येऽवसाने च मङ्गलमुपादेयमिति

इहाऽन्यदपि बहु वक्तव्यं मङ्गलविषयेऽवशिष्यते किन्तु तदत्र ग्रन्थगौरवभयादन्यत्र च **पूर्वसूरि**भिर्विस्तरेणोक्तत्वाच्चेह नोच्यते ।

अथ मङ्गलशब्दस्य व्युत्पत्तिः प्रदर्श्यते । **तथाहि -** "उख, नख-अगु वगु ......गतौ" मङ्ग्यते = अधिगम्यते = साध्यते हितमनेनेति मङ्गलम् "मृदि-कन्दि...." (सि०-उणा०-४६५) इति सूत्रेणाऽलप्रत्ययः **यद्वा** मङ्ग्यते = प्राप्यते स्वर्गोऽपवर्गो वाऽनेनेति मङ्गः "पुन्नाम्नि घः" (सि०५-३-१३०) इत्यनेन घप्रत्ययः, मङ्ग इति **पूर्ववैयाकरण**प्रसिद्धा धर्मस्याऽऽख्या, "लांक् आदाने" मङ्गं लाति = समादत्त इति मङ्गलम् । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये -**

"मंगिज्जएऽधिगम्मइ, जेण हियं मंगलं होइ । अहवा मंगो धम्मो, ते लाइ तयं समादत्ते ॥२२॥" इति ।

"आतो डो-ऽह्वा-वा-मः" (सि० ५-१-७६) इति सूत्रेण कर्तरि डप्रत्ययः, धर्मोपादाने हेतुरित्यर्थः । **अथवा** निपातनादभीष्टाऽर्थप्रकृतिप्रत्ययेन मङ्गलशब्दः साध्यते । **तद्यथा** - "मकुङ् मण्डने" मङ्क्यते = अलङ्क्रियते शास्त्रमनेनेति मङ्गलम्, **यद्वा** "मडु भूषायाम्" मण्ड्यते शास्त्रमलङ्क्रियतेऽनेनेति मङ्गलम्, **यद्वा** "मनिच् ज्ञाने" मन्यते = ज्ञायते = निश्चीयते विघ्नाऽभावोऽनेनेति मङ्गलम्, **यद्वा** 'मदैच् हर्षे' माद्यन्ति = हृष्यन्ति = मदमनुभवन्ति विघ्नाऽभावेन शिष्या अनेनेति मङ्गलम्, **यद्वा** "मदुङ् स्तुति-मोद-मद-स्वप्न-गतिषु" मन्दन्ते = मोदन्ते, शेरते विघ्नाऽभावेन निष्प्रकम्पतया सुप्ता इव जायन्ते, शास्त्रस्य पारं गच्छन्त्यनेनेति मङ्गलम्, **यद्वा** "महीङ् वृद्धौ पूजायाञ्च" मह्यते = पूज्यते शास्त्रमनेनेति मङ्गलम्, "मुरलो-रल-विरल-केरल........" (सि०-उणा०-४७४) इत्यनेन सर्वत्राऽलप्रत्ययाऽन्तो निपात्यते। **अथ नैरुक्ताः पुनरेवमाहुः-** मां गालयति भवात् = संसारादपनयतीति मङ्गलम्, **यद्वा** मलं = पापं गालयति = स्फेटयतीति मङ्गलम्, **यदि वा** शास्त्रस्य मा भूद् गलः = विघ्नोऽस्मादिति मङ्गलम्, **यद्वा** शास्त्रस्य मा भूद् गलः = नाशोऽस्मिन्निति मङ्गलम्, सम्यग्दर्शनाऽऽदिमार्गलयनादिति मङ्गलम्, **यद्वा** मा भूद् गलः = विघ्नोऽस्मादिति मङ्गलमिति सर्वत्र पृषोदराऽऽदित्वादिष्टरूपनिष्पत्तिः ।

तदेवं मङ्गलोपन्यासं विधाय ग्रन्थकारः क्त्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वादुत्तरक्रियां प्रदर्शन्नाह– **''कित्तेमि''** त्ति कीर्तये = शंसामि = शब्दतोऽभिधास्य इति यावत् किम् ? इत्याह -**''कम्मपयडि''** त्ति कर्मणां = ज्ञानावरणाऽऽदिमूलोत्तरभेदभिन्नानां प्रकृतयः = स्वभावविशेषाः, कर्मप्रकृतयस्ताः, कर्मप्रकृतीः ।

**ननु** कर्म किमर्थं मन्यते यतो न तावज्जगद्वैचित्र्यं प्रति हेतुत्वेन कर्मणोऽभ्युपगम आवश्यकः जगद्वैचित्र्यं प्रति कालाऽऽदीनामसाधारणकारणतया दृश्यमानत्वात् ।

तथा चाऽत्र प्राऽऽहुः **कालवादिनः**:- कालाऽऽधीनमेव सर्वं जगज्जातं वर्तते । **अयम्भावः**:- काल एव वस्तूत्पाद-वस्तुनाश-वनितागर्भधारण-बालजन्म-बालचलनाऽऽदि-दुग्धोत्पन्नदधि-फलपाक-त्रिषष्टिशलाकाऽऽदिपुरुषभवन-विरमाऽऽदि-बाल-युवा-ऽऽद्यवस्थाऽऽद्युत्सर्पिण्यवसर्पिणी-षडर-षड्तुप्रमुखेषु कारणतया विद्यते । **यथा हि–** स्थाली-वह्निसंयोगाऽऽदिपाकसामग्रीसद्भावेऽपि मुद्गपाकः कालं विना न जायते, काले च भवतीत्यन्वय-व्यतिरेकाभ्यां काल एव कारणम् । यदि च कालस्य कारणत्वेनाऽस्वीकारस्तदा परेष्टकारणसामग्रीसद्भावमात्रात्सर्बं कार्यमनियमेन स्यात् ।

**उक्तञ्च शास्त्रवार्तासमुच्चये –**

''न कालव्यतिरेकेण , गर्भ ★ बालशुभाऽऽदिकम् । यत्किञ्चिज्जायते लोके , तदसौ कारणं किल ॥१६५॥
कालः पचति भूतानि , कालः संहरति प्रजाः । कालः सुप्तेषु जागर्ति , कालो हि दुरतिक्रमः ॥१६६॥
किञ्च कालादृते नैव , मुद्गपक्तिर● पीष्यते । स्थाल्यादिसंनिधानेऽपि , **ततः** कालादसौ मता ॥१६७॥
कालाऽभावे च गर्भाऽऽदि , सर्वं स्यादव्यवस्थया । परेष्टहेतुसद्भाव - मात्रादेव तदुद्भवात् ॥१६८॥'' इति ।

**तन्न**, यदि सर्वकार्यहेतुरेक एव कालः स्यात्, तदा युगपदेव सर्वकार्योत्पत्तिर्भवेत् । **न च तदिष्टम्** । **किञ्च** मुद्गपाकजननयोग्यकाले व्यतीतेऽपि मुद्गपाकस्याऽभवनान्नाऽस्ति कालः कारणम् । **न च** तदानीं मुद्गपाकाऽभावः कालविशेषप्रयुक्तोऽस्ती**ति वाच्यम्**, कालस्य नित्यत्वेन विशेषाऽभावात्, यदि पुनर्मुद्गपाकजननाऽजननस्वभावत्वेन भेदसिद्धत्वाद्विशेष इष्यते तदा नित्यत्वहानिः । **न च** विलक्षणाऽग्निसंयोगकृतो मुद्गपाकविशेष इत्यपि **वाच्यम्** । यतः स विलक्षणाऽग्निसंयोगः किं सहेतुकोऽहेतुको वा ?, तस्याऽहेतुकत्वे तु सदा कार्यप्रसङ्गः, सर्वदा वाऽभावः सहेतुकत्वे काल एव कारणतयाऽङ्गीकर्तव्यः, भवन्मतेऽन्यस्य हेतुतयाऽनभ्युपगमात् । ततश्चाऽन्योन्याऽऽश्रयः, **तथाहि–** सति कालभेदे मुद्गपाकहेतुर्विलक्षणाऽग्निसंयोगभेदः, तद्भेदाच्च कालभेद इति । तस्मान्न काल एक एव कारणम् । अपि च स्थाल्यादिसामग्रीसद्भावे मुद्गपाकहेतुविलक्षणाऽग्निसंयोगजननयोग्यकाले व्यतिक्रान्तेऽपि कङ्कटुकानां पाकाऽभावान्नास्ति काल एव कारणम् ।

अथ केचन **स्वभाववादिनः** प्रोचुः– स्वभाव एव सर्वकार्यं प्रत्यऽप्रतिहतं कारणमिति । **तद्यथा**-उत्पाद-विनाश-काङ्कटुक-कण्टकतैक्ष्ण्य-वन्ध्यत्व-मयूरपिच्छमेचक-सन्ध्यारङ्ग-विषधरमौलिमणि-विषहरमणि-पर्वतस्थैर्य-वायुचञ्चलताऽऽदिकं सर्वं स्वभावहेतुकं विद्यते ।

**उक्तञ्च शास्त्रवार्तासमुच्चये द्वितीयस्तबके -**

''न स्वभावाऽतिरेकेण , गर्भबालशुभाऽऽदिकम् । यत्किञ्चिज्जायते लोके , तदसौ कारणं किल ॥१६९॥ (५७)

★ ''काल'' इत्यपि **पाठान्तरम्** । ● ''पीक्ष्यते'' इति **पाठान्तरम्** ।

सर्वभावा: स्वभावेन, स्वस्वभावे तथा तथा। वर्त्तन्तेऽथ निवर्त्तन्ते, कामचारपराङ्मुखा: ॥१७०॥ (५८)
न विनेह स्वभावेन, मुद्गपक्तिरपीष्यते । तथाकालाऽऽदिभावेऽपि, नाऽश्वमाषस्य सा यत: ॥१७१॥ (५९)'' इति ।

यदि पुनरतत्स्वभावादपि तद्भावोत्पत्तिरभ्युपगम्यते तदा मृदो यथा कुम्भो जायते, तथा पटोऽपि भवेत् । **यदाह शास्त्रवार्तासमुच्चये द्वितीयस्तवके –**

''अतत्स्वभावात्तद्भावे-ऽतिप्रसङ्गोऽनिवारित: । तुल्ये तत्र मृद: कुम्भो, न पटाऽऽदीत्ययुक्तिमत् ॥१७२॥ (६०)'' इति ।

ततो विश्ववैचित्र्यं प्रति स्वभाव एव कारणतया स्वीकार्य: । **उक्तञ्च –**

''क: कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च ? । स्वभावत: सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुत: प्रसङ्ग:? ॥ ॥'' इति ।

तदपि न युक्तम्, यत: कण्टकाऽऽदीनां कारणत्वेन बीजाऽऽदय: सन्ति । यस्मिन् सत्येव यस्य भाव:, यस्य च विकाराद् यस्य विकार:, तत्तस्य कारणमिति कृत्वा । **तथाहि -** उत्सूनाऽऽदिविशिष्टाऽवस्थागतं बीजं कण्टकाऽऽदितैक्ष्ण्यादिहेतुत्वेन प्रत्यक्षा-ऽनुमानाभ्यामन्वय-व्यतिरेकतो निर्णीयते । तस्मान्न स्वभाव एवैक: कारणम् ।

अथ **नियतिवादिन:** केचित्प्राहु: - मृदादीनां तथा तथा नियतघटाऽऽदिरूपेण भवनाद् नियतिरेव कारणम् । **तथाहि-** घटपटाऽऽदिभवन-सुभूमचक्रिसमुद्रपतन-ब्रह्मदत्तचक्रवर्त्यन्धत्वभवन-जीवव्यवहारराश्यागमन-भव्यमोक्षगमनाऽऽदिकं सर्वं नियतिहेतुकं ज्ञेयम् । अन्वय-व्यतिरेकाभ्यां सिद्धे: । **प्रतिपादितं च शास्त्रावार्तासमुच्चये द्वितीयस्तवके-**

''नियतेनैव रूपेण, सर्वे भावा भवन्ति यत् । ततो नियतिजा ह्येते, तत्स्वरूपाऽनुवेधत: ॥१७३॥ (६१)'' इति ।

ततश्च यद् घटपटाऽऽदिकं यस्मिन् समये यस्माद् दण्डाऽऽदितो यावद्देशव्यापि भवति, तत्तदैव ततस्तावद्देशव्यापि लोके नियतं जायते । **उक्तञ्च शास्त्रवार्तासमुच्चये –**

''यद्यदैव यतो याव -त्तत्तदैव ततस्तथा । नियतं जायते न्यायात् , क एतां बाधितुं क्षम:? ॥१७४॥ (६२)
न चर्ते नियतिं लोके , मुद्गपक्तिरपीक्ष्यते । तत्स्वभावाऽऽदिभावेऽपि , नाऽसावनियता यत: ॥१७५॥ (६३)'' इति ।

यदि च नियति: सर्वभावानां कारणत्वेन नाऽङ्गीक्रियते, तदा सर्वाऽभावप्रसङ्ग: स्यात् ।

अपिच नियत्यजन्यत्वेऽन्योन्याऽऽत्मकतापत्ति: क्रियावैफल्यं च भवेत् । **तद्यथा—** घटादीनामनियतकारणत्वेन यथा घटस्य दण्डाऽऽदिजन्यत्वम्, तथा पटकारणतन्त्वादिजन्यत्वमपि भवेत् एवं च यथा पटाऽऽदिकस्य तन्त्वादिजन्यत्वम्, तथैव घटकारणदण्डाऽऽदिजन्यत्वमपि भवेत् । ततश्च पटकारणतन्त्वादिजन्यत्वाद् घटस्य पटाऽऽत्मकत्वं स्यात्, घटकारणदण्डाऽऽदिजन्यत्वाच्च पटस्य घटाऽऽत्मकत्वं भवेदिति घटपटाऽऽदीनामन्योऽन्यस्वरूपं भवेत् ।

तथा घटाऽर्थिनो मृद उपादानेऽपि ततो घटो न स्यात्, अनियतकारणत्वेन तन्त्वादिभ्योऽपि घटोत्पत्ते:, ततश्च मृदुपादानक्रियावैफल्यं स्यात् । **उक्तञ्च शास्त्रवार्तासमुच्चये –**

''अन्यथाऽनियतत्वेन, x सर्वाऽभाव: प्रसज्यते । अन्योन्याऽऽत्मकतापत्ते:, क्रियावैफल्यमेव च ॥१७६॥ (६४)'' इति ।

तथा शस्त्राद्युपघातेऽपि तथाविधमरणनियताऽभावे केचन जीवन्त एव दृश्यन्ते, नियते च मरणकाले शस्त्राऽऽदिघातं विनाऽपि पञ्चत्वमुपयाति । तदेवमन्वय-व्यतिरेकाभ्यां सर्वकार्यं नियतिहेतुकं सिध्यति । **उक्तञ्च–**

x ''सर्वभाव:'' इति **पाठान्तरम**पि ।

प्राप्तव्यो , नियतिबलाऽऽश्रयेण योऽर्थः ; सोऽवश्यं , भवति नृणां शुभोऽशुभो वा ।
भूतानां , महति कृतेऽपि हि प्रयत्ने ; नाऽभाव्यं , भवति न भाविनोऽस्ति नाशः ॥ ॥'' इति ।

तन्न, शास्त्रोपदेशवैयर्थ्याऽऽपत्तेः **तथाहि** - यद् भाव्यं तद् भविष्यत्येव किमर्थं शास्त्रोपदेशप्रवृत्तिः । यदभाव्यं तन्नैव भाव्यम्, तदाऽपि शास्त्रोपदेशो निरर्थक एव ।

अथ **पुरुषकारवादिनो** वदन्ति-मृदादिसामग्रीसद्भावेऽपि घटाऽऽदिकं सर्वं कार्यं पुरुषप्रयत्नाऽऽत्मकपुरुषकारं विना न जायते । तेनाऽन्वय-व्यतिरेकाभ्यां सर्वकार्यं प्रति पुरुषकार एव हेतुत्वेन विद्यते । **तथाहि**-घटपटाऽऽदि-मोक्षगमना-ऽन्नपाका-ऽन्नाऽदनाऽऽदिकं कार्यजातं पुरुषकारहेतुकं भवति ।

तदयुक्तम्, सत्यपि महति पुरुषप्रयत्नेऽतिवृष्ट्यादिना स्वेष्टफलाऽप्राप्तेः । अतो न पुरुषकार एव कारणम् ।

अथ **केऽपि कर्मवादिन आचख्युः**- जगद्वैचित्र्यं प्रति कर्मैव कारणमिति । यथा भोक्तृकर्मप्रातिकूल्ये महत्यपि पुरुषप्रयत्ने स्थाल्यादिभङ्गभावेन मुद्गपाकाऽऽदिर्न भवति, अन्यथा भवतीत्यन्वय-व्यतिरेकाभ्यां कर्मैव जगद्वैचित्र्यं प्रति कारणम् । **उक्तञ्च शास्त्रवार्तासमुच्चये -**

''न भोक्तृव्यतिरेकेण, ★ भाग्यं जगति विद्यते । न चाऽकृतस्य ● भोक्ता स्या- न्मुक्तानां भोगभावतः ॥१७७॥
भोग्यं च विश्वं सत्त्वानां, विधिना तेन तेन यत् । दृश्यतेऽध्यक्षमेवेदं , तस्मात्तत्कर्मजं हि तत् ॥१७८॥
न च तत्कर्मवैधुर्ये मुद्गपक्तिरपीक्ष्यते । स्थाल्यादिभङ्गभावेन , यत् क्वचिन्नोपपद्यते ॥१७९॥
चित्रं भोग्यं तथा चित्रात्, कर्मणोऽहेतुताऽन्यथा । तस्य यस्माद्विचित्रत्वं , नियत्यादेर्न युज्यते ॥१८०॥'' इति ।

तन्न युक्तम्, मुद्गपाकस्य दृष्टकारणस्य स्थाल्यादिकस्य वैगुण्यादेव मुद्गपाकाऽभावोपपत्तेर्न दृष्टकारणपरिहारेणा-ऽदृष्टस्य कारणस्य प्रतिबन्धकत्वेन कल्पनं युक्तिक्षमम् । नाऽपि कर्म स्वतन्त्रं कारणमुपपद्यते, कर्त्रधीनत्वात् ।

**किञ्च** कारणवैचित्र्यं विना कार्यवैचित्र्यस्याऽजायमानत्वेन नैकस्वभावात्कर्मणो मुद्गपाकतदभावाऽऽदिनानाकार्योत्पत्तिः स्यात् । कर्मणो नानास्वभावत्वे त्वभिधानमात्र एव भवतो विप्रतिपत्तिः, काल-स्वभावाऽऽदीनामप्यर्थतोऽभ्युपगमात् ।

तस्मान्न कर्मैकमेव कारणम् ।

ततश्च नैवं काल-स्वभाव-नियति-पुरुषकार-कर्मणां मध्यादेकैकस्य हेतुतोपपद्यते । किन्तु कालाऽऽदीनि पञ्चाऽपि समुदायेन जगद्वैचित्र्यरूपं सर्वकार्यं प्रति कारणम्, सामग्र्या कार्योत्पद्यमानत्वादिति सिद्धान्तः ।

**तथा चोक्तं शास्त्रवार्तासमुच्चये द्वितीयस्तबके -**

''अतः कालाऽऽदयः सर्वे, समुदायेन कारणम् । गर्भाऽऽदेः कार्यजातस्य, विज्ञेया न्यायवादिभिः ॥१९१॥
न चैकैकत एवेह, क्वचित्किञ्चिदपीक्ष्यते । तस्मात्सर्वस्य कार्यस्य, सामग्री जनिका मता ॥१९२॥'' इति ।

केवलं तेषां मध्ये गौणमुख्यो भावो वर्तते । **तद्यथा**-कुत्रचित्कालस्य प्राधान्यम्, कुत्रचित्स्वभावस्य मुख्यभावः, कुत्रचिन्नियतेः प्रधानता, कुत्रचिदुद्यमस्य मुख्यता, कुत्रचिच्च कर्मणः प्रधानभावो भवति । कारणत्वं पुनः पञ्चानां समुदितानामेव ।

अत्र च प्रस्तुते कर्मणो मुख्यभावमाश्रित्य प्ररूपणा तन्यते । यद्यपि सर्वेऽप्यात्मानो वस्तुतः सर्वज्ञेयविषयज्ञानाऽऽदिस्वभावेनाऽविशिष्टाः, तथाऽपि दृश्यते कश्चित्पण्डितः, अपरो मूर्खः, कश्चित्सुखी, इतरो दुःखी कश्चिन्मनुष्यः, अन्यस्तिर्यगित्यादिकम्, तच्च न निष्कारणम्, अतिप्रसङ्गात् ।

★ ''भोग्यं'' इति **पाठान्तर**मपि । ● ''भोगः'' इति **पाठान्तर**मपि ।

ततो वैचित्र्यनिबन्धनेन कर्म स्वीकर्तव्यम् । **उक्तञ्च शास्त्रवार्तासमुच्चये –**

''आत्मत्वेनाऽविशिष्टस्य , वैचित्र्यं तस्य यद्वशात् । नराऽऽदिरूपं तच्चित्र- मदृष्टं कर्मसञ्ज्ञितम् ॥९१॥

तथा तुल्येऽपि चाऽऽरम्भे, सदुपायेऽपि यो नृणाम् । फलभेदः स * युक्तो न, युक्त्या हेत्वन्तरं विना ॥९२॥ '' इति ।

**विशेषाऽऽवश्यकभाष्येऽपि –**

''अत्थि सुहदुक्खहेऊ, कज्जाओ बीयमंकुरस्सेव। सो दिट्ठो चेव मई, वभिचाराओ न तं जुत्तं ॥१६१२॥

जो तुल्लसाहणाणं, फले विसेसो न सो विणा हेउं। कज्जत्तणओ गोयम !, घडो व्व हेऊ य सो कम्मं ॥१६१३॥ " इति ।

**तथा श्राद्धदिनकृत्यटीकायां जीवस्थापनाऽधिकारे श्रीमद्देवेन्द्रसूरिपादैरपि –**

''क्ष्माभृद्रङ्कयोर्मनीषिजडयोः , सद्रूपनीरूपयोः ; श्रीमद्दुर्गतयोर्बलाऽबलवतो - र्नीरोगरोगाऽऽर्त्तयोः ।

सौभाग्या-ऽसुभगत्वसङ्गमजुषो - स्तुल्येऽपि नृत्वेऽन्तरं; यत्तत्कर्मनिबन्धनं तदपि नो, जीवं विना युक्तिमत् ॥५१॥''

(स्वोपज्ञ(३३२)गाथावृत्तौ / भाग. २, पत्र. २४०) (सावचूर्णिके(३३३)गाथाऽवचूर्णौ पत्र. ९३-१) इति ।

तच्च कर्म मूर्तमेव, तत्कार्यस्य शरीराऽऽदेर्मूर्तत्वात्, इह यद् यत् कार्यं मूर्त्तं तस्य तस्य कारणमपि मूर्तम्, यथा घटस्य परमाणवः, यच्चाऽमूर्तं कार्यं न तस्य कारणं मूर्तम्, यथा ज्ञानस्याऽऽत्मेति ।

इह च समवायिकारणमधिक्रियते, न पुनर्निमित्तकारणमिति । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये -**

''आह नणु मुत्तमेवं, मुत्तं चिय कज्जमुत्तिमत्ताओ । इह जह मुत्तत्तणओ, घडस्स परमाणवो मुत्ता ॥१६२५॥'' इति ।

**किञ्च कर्म** मूर्तम्, तत्सम्बन्धे सुखाऽऽदिसंवित्तेः, वेदनोद्भवाद्, बाह्यबलाऽऽधानात्परिणामाच्च । **तथाहि-**इह यत्सम्बन्धे सुखाऽऽदि संवेद्यते तद् मूर्तं दृष्टम्, यथाऽशनाऽऽद्याहारः, यच्चाऽमूर्तं न तत्सम्बन्धे सुखाऽऽदिसंविदस्ति, यथाऽऽकाशसंबन्धे, संवेद्यते च कर्मसम्बन्धे सुखाऽऽदि, तस्मात् कर्म मूर्तम् । तथा, यत्सम्बन्धे वेदनोद्भवो भवति तद् मूर्तं दृष्टम्, यथाऽग्निः, भवति च कर्मसम्बन्धे वेदनोद्भवः, तस्मात् कर्म मूर्तम् । तथा, कर्म मूर्तम्, आत्मनो ज्ञानाऽऽदीनां च तद्धर्माणां व्यतिरिक्तत्वे सति बाह्येन स्रक्-चन्दना-ऽङ्गनाऽऽदिना बलस्योपचयस्याऽऽधीयमानत्वात्, यथा स्नेहाऽऽद्याहितबलो घटः, इह यस्याऽनात्मविज्ञानाऽऽदेः सतो बाह्येन वस्तुना बलमाधीयते तद् मूर्तं दृष्टम्, यथा स्नेहाऽऽदिनाऽऽधीयमानबलो घटः आधीयते च बाह्यैर्मिथ्यात्वाऽऽदिहेतुभूतैर्वस्तुभिः कर्मण उपचयलक्षणं बलम्, तस्मात् कर्म मूर्तम् । तथा कर्म मूर्तम्, आत्माऽऽदिव्यतिरिक्तत्वे सति परिणामित्वात्, क्षीरवत्, इत्यादि । **उक्तञ्च विशेषाऽऽवश्यके–**

''तह सुहसंवित्तीओ, संबंधे वेयणुब्भवाओ य । बज्झबलाऽऽहाणाओ, परिणामाओ य विण्णेयं ॥१६२६॥

आहार इवाऽनल इव, घडुव्व नेहाऽऽइकयबलाऽऽहाणो । खीरमिवोदाहरणाइं कम्मरूवित्तगमगाइं ॥१६२७॥'' इति ।

**न च** 'परिणामित्वात्' इत्ययं हेतुरसिद्ध **इति वाच्यम्,** यतः सोऽपि कर्मणः परिणामः सिद्धः, कर्मकार्यस्य शरीराऽऽदेः परिणामित्वदर्शनात् । **तथाहि–**इह यस्य कार्यं परिणाम्युपलभ्यते, तस्याऽऽत्मनोऽपि परिणामित्वं निश्चीयते, यथा दध्नस्तक्राऽऽदिभावेन परिणामात् पयसोऽपि परिणामित्वं विज्ञायत एवेति । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

''अह मयमसिद्धमेयं, परिणामाउ त्ति सो वि कज्जाओ । सिद्धो परिणामो से, दहिपरिणामादिव पयस्स ॥१६२८॥'' इति ।

**ननु** कर्मणः पुद्गलाऽऽत्मकत्वेन मूर्त्तत्वात् कथं तन्नोपलभ्यते, अनुपलम्भे च कथं तत् **सदिति चेत्, उच्यते-**नाऽस्त्ययं नियमः, यत्सत् तदुपलभ्यत एव, सूक्ष्मताऽऽदिकारणात् पिशाचाऽऽदिशरीरस्येवौदारिकाऽऽदिशरीराऽऽदिनिमित्तत्वेनोपकल्पितस्य कर्मणोऽनुपलम्भेऽपि तत्सत्ताया निषेद्धुमशक्यम्, अन्याय्यत्वात्तत्प्रतिपादकाऽऽगमोपलम्भाच्च ।

* ''नो युक्तो'' इति **पाठान्तर**मपि ।

**ननु** यथा कर्म विनाऽप्यभ्राऽऽदिविकाराणां वैचित्र्यं प्रत्यक्षमुपलभ्यते, तथा यदि कर्माऽन्तरेणाऽपि संसारिजीवस्कन्धानां सुखदुःखाऽऽदिभावेन वैचित्र्यं भवेत्, ततः को दोष इति **चेत्, उच्यते–** यद्यभ्रविकाराणां गन्धर्वनगरे-न्द्रधनुरादीनां गृह-देवकुल-प्राकार-तरु-कृष्ण-नील-रक्ताऽऽदिभावेन वैचित्र्यमङ्गीक्रियते, तर्हि कर्मणि को विशेषः, येन तत्र वैचित्र्यं नाऽभ्युपगम्यते । अपिच यथा विश्वविश्वाऽध्यक्षाणाममीषां गन्धर्वनगर-शक्रकोदण्डाऽऽदीनां बाह्यस्कन्धानां विचित्रता स्वीकृता, तथैवाऽभ्यन्तराणां कर्मस्कन्धानां पुद्गलरूपत्वेन समानेऽपि जीवगृहीतेन विशेषवतां सुखदुःखाऽऽदिजनकत्वेन वैचित्र्यं कथं नाऽङ्गीकर्तव्यम् ? । यदि ह्यभ्राऽऽदयो बाह्यपुद्गला नानारूपतया परिणमन्ति तर्हि जीवैः परिगृहीताः सुतरां ते तथा परिणंस्यन्तीति तात्पर्यम् ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये –**

''अब्भाऽऽदिविगाराणं, जह वेचित्तं विणा वि कम्मेण । तह जइ संसारीणं, हवेज्ज को नाम तो दोसो ॥१६२९॥
कम्मम्मि व को भेओ, जह बज्झक्खंधचित्तया सिद्धा । तह कम्मपोग्गलाण वि, विचित्तया जीवसहियाणं ॥१६३०॥
बज्झाण चित्तया जइ, पडिवन्ना कम्मणो विसेसेण । जीवाऽणुगयस्स मया, भत्तीण व सिप्पिनत्थाणं ॥१६३१॥'' इति ।

**ननु** यद्यभ्राऽऽदिविकाराणामिव कर्मपुद्गलानां विचित्रपरिणामोऽङ्गीक्रियते, तर्हि समस्तजनाऽध्यक्षं बाह्यं तनुमात्रमेवेदं सुरूप-कुरूप-सुख-दुःखाऽऽदिभावैः स्वभावत एवाऽभ्रादिवद् विचित्ररूपतया परिणमतु, किमर्थं पुनस्तद्वैचित्र्यहेतुभूतस्याऽन्तर्गडुकल्पस्य कर्मणः परिकल्पना, स्वभावादेव सर्वस्याऽपि पुद्गलपरिणामवैचित्र्यस्य सिद्धत्वा**दिति चेत्, उच्यते** – यद्यभ्राऽऽदिविकाराणामिव तनोर्वैचित्र्यं स्वीक्रियते, तर्हि कर्माऽपि तनुरेव, केवलं सा श्लक्ष्णतरा, अतीन्द्रियत्वात्; अभ्यन्तरा च, जीवेन सहाऽतिसंश्लिष्टत्वात्, ततश्च यथाऽभ्राऽऽदिविकारवद् बाह्यस्थूलतनोर्वैचित्र्यमभ्युपगम्यते, तथा कर्मतनोरपि तत्किं नाऽङ्गीक्रियते । पुनरपि **प्रेरकः प्राह–ननु** बाह्याया औदारिकाऽऽदेः स्थूलतन्वा वैचित्र्यं प्रत्यक्षदृष्टत्वादेवाऽभ्रादिविकारवदभ्युपगच्छामः; किन्त्वन्तरङ्गायाः कर्मरूपायाः सूक्ष्मतनोर्विचित्रतां कथमिच्छामः, सर्वथा-ऽप्रत्यक्षत्वात् ?, यदि तदनभ्युपगमे कोऽपि दोषो भवेत्, तर्ह्यर्थापत्त्या तद्विचित्रता स्वीकार्ये**ति चेत्, भण्यते**-मरणकाले स्थूलया दृश्यमानतन्वा सर्वथा विप्रमुक्तस्य जन्तोर्भवान्तरगतस्थूलतनुग्रहणनिबन्धनभूतां सूक्ष्मकर्मतनुं विनाऽग्रेतनदेहग्रहणाऽभावः प्रसज्यते, न च निष्कारणमेव शरीरान्तरग्रहणं भवति, ततश्च शरीरान्तरग्रहणाऽनुपपत्त्या मरणान्तरं सर्वेषामपि जीवानामशरीरत्वादयत्नेनैव संसारोच्छेदः, सर्वजीवराशेर्मोक्षश्च, अथाऽशरीराणामप्यन्यशरीरग्रहणेन संसारभ्रमणं स्यात्, तर्हि सिद्धानामप्यकस्माद् निष्कारण एव संसारपातस्तत्र संसरणं च भवेत्, ततो मोक्षोऽप्यनाश्वास्यः स्यात् ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

''तो जइ तणुमेत्तं चिय, हवेज्ज का कम्मकप्पणा नाम ? । कम्मं पि नणु तणु च्चिय, सण्हयरब्भंतरा नवरं ॥१६३२॥
को तीएँ विणा दोसो, थूलाए सव्वहा विप्पमुक्कस्स । देहग्गहणाभावो , तओ य संसारवोच्छित्ती ॥१६३३॥
सव्वविमोक्खावत्ती , निक्कारणउ व्व सव्वसंसारो । भवमुक्काणं व पुणो, संसरणमओ अणासासो ॥१६३४॥'' इति ।

**किञ्च** विग्रहगत्योत्पद्यमानस्य भवप्रथमसमय औदारिकाऽऽदिशरीराऽभावादपि विचित्रताऽनुपपत्त्या कर्मणोऽभ्युपगमोऽनिवार्यः । तच्च कर्मौदारिकाऽऽदिशरीराऽऽदेरपि कारणं भवति ।

इदं च विश्ववैचित्र्योपपत्त्यर्थमभ्युपगम्यमानं कर्माऽन्यैर्दर्शनान्तरीयैः **सौगताऽऽदिभि**रपि संस्कारेत्यादिनामान्तरेणाऽङ्गीकृतम् । **तथाहि**-सौगताः संस्कारेति, वेदवादिनः पुण्याऽपुण्ये इति , गणकाः शुभाऽशुभे इति, धर्माऽधर्माविति साङ्ख्याः; तथा शैवाः पाश इति, वैशेषिका अदृष्टमिति, कथयन्ति । **उक्तञ्च शास्त्रवार्तासमुच्चये -**

''अदृष्टं कर्म संस्काराः, पुण्याऽपुण्ये शुभाऽशुभौ । धर्माऽधर्मौ तथा पाशः, पर्यायास्तस्य कीर्तिताः ॥१०७॥'' इति ।

**किञ्च पौराणिकैर्बौद्धैश्च** कर्मेति नाम्नाऽपि तत्प्रतिपादितमस्ति । **तथा च प्राहुः पौराणिकाः**-

''यथा यथा पूर्वकृतस्य कर्मणः, फलं निधानस्थमिवाऽवतिष्ठते। तथा तथा तत्प्रतिपादनोद्यता, प्रदीपहस्तेव मतिः प्रवर्तते ॥ ॥
यत्तत्पुराकृतं कर्म, न स्मरन्तीह मानवाः । तदिदं पाण्डवज्येष्ठ !, दैवमित्यभिधीयते ॥ ॥
मुदितान्यपि मित्राणि, सुकुद्धाश्चैव शत्रवः । न हीमे तत् करिष्यन्ति, यन्न पूर्वं कृतं त्वया ॥ ॥'' इति ।

**तथा बौद्धा अप्याहुः**-''इत एकनवतौ कल्पे, शक्त्या मे पुरुषो हतः । तेन कर्मविपाकेन, पादे विद्धोऽस्मि भिक्षवः ॥ ॥'' इति ।

तथाऽपि सौगतैः संस्काराऽपरपर्यायाया वासनाया अमूर्त्तत्वमभ्युपगतम् । तन्न युक्तिमत्, अमूर्तत्वेनाऽऽकाशस्येवाऽनुग्रहोपघाताऽभावात् । **उक्तञ्च** -

''अन्ने उ अमुत्तं चिय, कम्मं मन्नंति वासणारूवं । तं तु न जुज्जइ तत्तो, उवधायाऽणुग्गहाऽभावा ॥ ॥
नाऽऽगासं उवघायं, अणुग्गहं वा वि कुणइ सत्ताणं ।'' इत्यादि ।

**ननु** कर्म भवद्भिः प्राग् मूर्तं समर्थितम्, तस्य च मूर्तस्य कर्मणोऽमूर्तेन जीवेन सह सम्बन्धः संयोगलक्षणः समवायलक्षणो वा **कथं भवेदिति चेत्, उच्यते-** यथा मूर्तस्य घटस्याऽमूर्तेन नभसा संयोगरूपः सम्बन्धस्तथाऽत्राऽपि जीव-कर्मणोः । यथा वा द्रव्यस्याऽङ्गुल्यादेः क्रिययाऽऽकुञ्चनादिकया सह समवायलक्षणः सम्बन्धस्तथाऽत्राऽपि जीव-कर्मणोः । **अथवा** यथेदं बाह्यं स्थूलशरीरं जीवेन सह संबद्धं प्रत्यक्षं दृश्यते तथा भवान्तरं गच्छता जीवेन सह संयुक्तं कार्मणशरीरं स्वीकार्यम् ।

धर्माऽधर्मनिमित्तं जीवसंबद्धं बाह्यं शरीरं प्रवर्तत इति **चेत्** ?, तर्ह्यपि किं तौ मूर्तावमूर्तौ वा ? । यदि मूर्तौ, तर्हि तयोरप्यमूर्तेनाऽऽत्मना सह कथं सम्बन्धः ? । अथ कथमपि भवति, तर्हि कर्मणोऽपि तथैव स्यात् । अथाऽमूर्तौ तर्हि बाह्यमूर्तस्थूलशरीरेण सह तयोः सम्बन्धः कथं स्यात् ? भवदभिप्रायेण मूर्ताऽमूर्तयोः सम्बन्धाऽयोगात् । **न चा**ऽसम्बद्धयोस्तयोर्बाह्यशरीरचेष्टानिमित्तत्वं घटत **इति वाच्यम्,** अतिप्रसङ्गात् । अथाऽमूर्तयोरपि तयोर्बाह्यशरीरेण मूर्तेन सह सम्बन्धोऽङ्गीक्रियते, तर्हि जीव-कर्मणोरपि तथैवाऽङ्गीकार्यः । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये-**

''मुत्तस्साऽमुत्तिमया , जीवेण कहं हवेज्ज संबंधो ? । सोम्म ! घडस्स व्व नभसा, जह वा दव्वस्स किरियाए ॥१६३५॥
अहवा पच्चक्खं चिय , जीवोवनिबंधणं जह सरीरं । चिट्ठइ कम्मयमेवं, भवंतरे जीवसंजुत्तं ॥१६३६॥'' इति ।

**ननु** मूर्तेन कर्मणाऽमूर्तस्यात्मनोऽनुग्रहोपघातौ कथं स्याताम्, न ह्यमूर्तस्य नभसो मूर्तैर्मलयचन्दना-ऽग्निज्वालाऽऽदिभिरनुग्रहो-पघातौ भवतः, **इति चेत्, उच्यते**-यथाऽमूर्तानामपि विज्ञान-विविदिषा धृति-स्मृत्याद्यात्मधर्माणां मूर्तैरपि पयः-शर्करा-घृतपूर्ण-भेषजाऽऽदिभिर्मदिरापान-हृत्पूर-विष-पिपीलिकाऽऽदिभिर्भक्षितैरनुग्रहो-पघातौ भवतः, तथा मूर्तेन कर्मणाऽमूर्तस्याऽऽत्मनोऽनुग्रहो-पघातौ स्तः । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये-**

''मुत्तेणाऽमुत्तिमओ , उवघाया-ऽणुग्गहा कहं होज्जा? । जह विण्णाणाऽऽईणं, मइरापाणो-सहाऽऽईहिं ॥१६३७॥'' इति ।

**तथा शास्त्रवार्तासमुच्चये तृतीये स्तवकेऽपि-**

"मूर्त्तयाऽप्यात्मनो योगो, घटेन नभसो यथा। उपघाताऽऽदिभावश्च , ज्ञानस्येव सुराऽऽदिना॥२३६॥" इति ।

**अथवा**ऽऽत्माऽनादिकालत आमुक्तेर्मूर्तकर्माऽविनाभूतः, तेन मूर्तकर्मसम्बन्धात्तस्य कथञ्चिद् मूर्तत्वम् । तत आत्म-कर्मणोः क्षीर-नीरवद्वह्नि-यःपिण्डवद् वा परस्परमनुप्रवेशात् सम्बन्ध उपपद्यते । तथैवाऽनुग्रहो-पघातावपि ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये –**

"अहवा नेगंतोऽयं, संसारी सव्वहा अमुत्तो त्ति। जमणाइकम्मसंतइ - परिणामाऽऽवन्नरूवो सो॥१६३८॥" इति ।

अत एव चाऽऽत्माऽऽश्रितानि ज्ञानाऽऽदिगुणानि देहे, देहस्थानि रूपाऽऽदिगुणान्यात्मनि व्यपदिश्यते । यथा रुग्णोऽहं जानामीति प्रतीतिश्च भवति । **उक्तञ्च सम्मतितर्के –**

रूवाऽऽइपज्जवा जे, देहे जीवदवियम्मि सुद्धम्मि। ते अण्णोण्णाऽणुगया, पण्णवणिज्जा भवत्थम्मि॥४०॥" इति ।

(सम्मतितत्त्वसोपानपुस्तके पत्र.१७८ । सम्मतितर्कप्रतौ भा. पत्र. )

तच्च कर्म प्रवाहतोऽनादि, "अणाइयं तं पवाहेण" इति **वचनात्** । यदि प्रवाहाऽपेक्षयाऽपि सादि स्यात्, तदा जीवानां पूर्वं कर्मवियुक्तत्वमासीत्, पश्चादकर्मकस्य जीवस्य कर्मणा सह संयोगः सञ्जात इत्यर्थो लभ्येत, एवं सति मुक्तानामपि कर्मयोगः स्यात्, अकर्मकत्वाऽविशेषात् ततश्च मुक्ता अमुक्ताः स्युः, न चेदमिष्टम्, तस्मादनादिर्जीवस्य कर्मणा सह संयोगः । **न चा**ऽनादिसंयोगे कथं वियोग आत्मनः कर्मणा सहे**ति वाच्यम्,** अनादिसंयोगेऽपि वियोगस्य दृश्यमानत्वात्, काञ्चनोपलवत्, **तथाहि-**काञ्चनोपलानां संयोगो यद्यप्यनादिस्तथाऽपि तथाविधसामग्रीसद्भावे धमनाऽऽदिना किट्टिवियोगो दृष्टः । एवं जीवस्याऽपि ज्ञानदर्शनचारित्रध्यानाऽनलाऽऽदिनाऽनादिकर्मणा सह वियोगः सिध्यति ।

**प्रतिपादितञ्च विशेषावश्यकभाष्ये –**

"अण्णयरमणिव्वत्तिय - कज्जं बीयं-कुराण जं विहियं। तत्थ हओ संताणो, कुक्कुडि-अंडाइयाणं च॥१८१८॥

जह वेह कंचणो-वल- संजोगोऽणाइसंतइगओ वि। वोच्छिज्जइ सोवायं, तह जोगो जीव-कम्माणं॥१८१९॥" इति ।

जीव-कर्मणोरनादिसंयोगः सन्नभव्यानामनन्तः, जीव-नभसोरिव, भव्यानां सान्तः, काञ्चनो-पलयोरिव ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये –**

"तो किं जीव-नहाण व , अह जोगो कंचणो-वलाणं व ?। जीवस्स य कम्मस्स य, भण्णइ दुविहो वि न विरुद्धो ॥१८२०॥

पढमोऽभव्वाणं चिअ, भव्वाणं कंचणो-वलाणं व। .......... ..........................................॥१८२१॥" इति ।

प्रक्रियते = प्रभवति आत्मस्वभावलक्षणज्ञानाऽऽदिगुणानामाच्छादनलक्षणं यस्माद् ज्ञानावरणाऽऽदिकर्मणः, सा प्रकृतिः, प्रोपसर्गपूर्वकाद् 'डुकृंग् करणे' इत्यस्माद् धातोः "स्त्रियां क्तिः" (सि०-५-३-९१) इत्यनेनाऽपादाने क्तिप्रत्ययः, प्रधानकारणमित्यर्थः । यथा पटं प्रति तन्तवः प्रधानकारणमस्ति । तथैवाऽऽत्मस्वरूपलक्षणज्ञानाऽऽदिगुणढौकनं प्रति प्रकृतीरेव ज्ञानाऽऽवरणाऽऽदिलक्षणा मुख्यकारणमस्ति । **उक्तञ्च तत्त्वार्थवृत्तौ सिद्धसेनगणिना –** (अ.८, सू.४/भा.२, पत्र. १२९)

"तत्र प्रकृतिर्मौलं कारणं मृदिव घटाऽऽदिभेदानामेकरूपपुद्गलग्रहणम्, अतः प्रक्रियन्तेऽस्य सकाशादिति अकर्तरीत्यनुवृत्तेरपादानसाधना प्रकृतिः॥" इति ।

**यद्वा** प्रकरणं प्रकृतिः "स्त्रियां क्तिः" (सि०-५-३-९१) इत्यनेनाऽन्तरोक्तेनैव सूत्रेण भावे क्तिप्रत्ययः, स्वभाव इत्यर्थः ।

**यदुक्तमभिधानचिन्तामणौ –**

"स्वाद् रूपं लक्षणं भाव-श्चाऽऽत्म-प्रकृति-रीतयः । सहजो रूपतत्त्वं च, धर्मः सर्गो निर्सगवत् ॥१३७६॥" इति।

**तथाऽमरकोशेऽपि** - "...संसिद्धिप्रकृती त्विमे ॥२१८॥ स्वरूपं च स्वभावश्च, निसर्गश्च" इति ।

यथा लोके दुष्टप्रकृतिः = दुष्टस्वभाव इति प्रसिद्धिः, तथाऽऽत्मसम्बन्धीभूतकर्मवर्गणाद्रव्यरूपाणां कर्मणामपि स्वभावः प्रकृतिशब्देन कथ्यते । **तद्यथा**-ज्ञानाऽऽवरणस्य प्रकृतिः = स्वभावो ज्ञानाऽऽच्छादनम्, दर्शनाऽऽवरणस्य प्रकृतिः सामान्यबोधाऽऽवरणम्, वेदनीयस्य सुखदुःखाऽनुभवनम्, मोहनीयस्य मोहजनकत्वम्, आयुष्कस्य भवधारकत्वम्, नाम्नो नरकगत्यादिनानापर्यायप्रापकत्वम् गोत्रस्योच्चनीचव्यवहारोत्पादकत्वम्, अन्तरायस्य च दानाऽऽदिलब्धिविघातकत्वम् ।

**उक्तञ्च तत्त्वार्थसूत्रवृत्तौ** – (अ. ८, सू. ४ / भा. २, पत्र. १२९-१३०)

"स्वभाववचनो वा प्रकृतिशब्दः । दुष्टप्रकृतिर्दुष्टस्वभाव इति प्रसिद्धेः ज्ञानाऽऽवरणं ज्ञानाऽऽच्छादनस्वभावं मौलभेदतः, एवं दर्शनाऽऽवरणादावपि योज्यम् । स्वभाववचनत्वे च भावसाधनः प्रकृतिशब्दः ।" इति ।

**ननु** कर्मप्रकृतौ मूलोत्तरकर्मणां प्रकृतिभेदे हेतुरनुभागविशेषो दर्शितः । **तथा चोक्तं कर्मप्रकृतौ** – "मूलुत्तरपगतीणं, अणुभागविसेसओ पगइभेदो ।" **इति चेत् !** , **न,** सम्यगभिप्रायाऽपरिज्ञानात्, यतोऽनुभागशब्दस्तत्र स्वभावपर्यायः "अणुभागो त्ति सहावो" **इति चूर्णिकार**वचनान्नाऽस्ति कश्चिद्दोष इति ।

कैश्चित्तु प्रकृतिः स्थिति-रस-प्रदेशसमुदायरूपोच्यते । **यदुक्तम्** – "प्रकृतिः समुदायः स्यात् ।" इति । **एवं पञ्चसंग्रहेऽपि बन्धनकरणं प्ररूपयता**- "तस्समुदाओ पगतिबंधो ॥४०॥ (४३२)" (भा. २, पत्र.३४-१) इति ।

स्थानं स्थितिः, "ष्ठां गतिनिवृत्तौ" इत्यस्माद्धातोः "स्त्रियां क्तिः" (सि०-५-३-९१) इत्यनेन सूत्रेण भावे क्तिप्रत्ययः । **उक्तञ्च सिद्धसेनगणिभिः**- "स्थित्यनुभावशब्दावपि भावसाधनौ ।" (तत्त्वा.-अ. ८, सू. ४ । भा. २, पत्र. १३०) इति । स्थितिः = कालमानमित्यर्थः । कालनियमनमिति यावद्वा । **तथा चोक्तं देवेन्द्रसूरिपादैः स्वोपज्ञकर्मविपाक-शतकवृत्तौ साक्षितया**– "स्थितिः कालाऽवधारणम्" (कर्मविपाकगाथा २ / पत्र. ४/६) (शतकगाथा २१/पत्र. १९/२२) इति ।

**अथवा** स्थीयते = अवस्थीयतेऽनयेति स्थितिः पूर्वोक्तसूत्रेणैव करणे क्तिप्रत्ययः, आत्मना सह क्षीर-नीरवद् वह्नि-ऽयोगोलकवद्वैकीभावभूतानां कर्मपुद्गलानामात्मप्रदेशेष्ववस्थानं स्थित्यैव संभवति, अन्यथा निर्जराप्रसङ्गात् । **अयम्भावः**- बन्धाऽऽदिनाऽऽत्मसाद्भूतानां तत्तत्कर्मप्रकृतीनामवस्थानकालः स्थितिः । **उक्तञ्च शतकवृत्तौ**– "स्थितिः कर्मणोऽवस्थानशक्तिः" इति । **तद्यथा**-यदा मिथ्यात्वाऽऽदिकर्मबन्धकारणैर्जीवः कोऽपि स्वाऽवगाढक्षेत्रस्थानन्तान् कार्मणवर्गणापुद्गलान् परिणमयति, तदा तेषु पुद्गलस्कन्धेषु ज्ञानाऽऽदिगुणाऽऽच्छादनस्वभाववत्तदानीमेव तत्कालोत्पन्नकषायपरिणामरूपा अवस्थानशक्तिरपि समुत्पद्यते । तथोत्तरप्रकृतीन् समाश्रित्य पुनर्यदाऽन्यप्रकृतिसंक्रमेणाऽपि पूर्वोत्पन्नाऽवस्थानशक्तिलक्षणा स्थितिरन्यस्वभावलक्षणयत्प्रकृत्यन्तरस्य जीवेन प्राप्यते तदा साऽपि स्थितिर्भवति । यया स्थित्याऽपवर्तनाऽऽदिव्याघाताऽभावे सत्यन्तर्मुहूर्तप्रभृतिसप्ततिकोटाकोटीसागरोपमकालं यावदात्मप्रदेशेषु कर्मपुद्गलस्कन्धा अवस्थातुं समर्थीभवन्ति ।

रसशब्दो भावसाधनः । **तथाहि**-रसनं रसः "रस आस्वादने" इति धातोः "भावा-ऽकर्त्रोः" (सि०-५-३-१८) इत्यनेन भावे घञ्प्रत्ययः यथा द्राक्षाऽऽदीनां मधुराऽऽदिरसोऽभिधीयते तथा कर्मपुद्गलानां स्वगतशक्तिविशेषो रसो भण्यते ।

प्रदेशशब्दः कर्मप्रधानो निर्दिष्टः । **तद्यथा**-प्रदिश्यन्ते = प्रतिपाद्यन्ते=परमाणुपरिच्छेदेन नियतीक्रियन्ते ये, ते प्रदेशाः, प्रोपसर्गपूर्वकाद् "दिशीत् अतिसर्जने" इत्यस्माद् धातोः "भावा-ऽकर्त्रोः" (सि०-५-३-१८) इत्यनेन कर्मणि घञ् ।

**उक्तञ्च तत्त्वार्थवृत्तौ** – "इयत्तयाऽवधारणात् प्रदेशशब्दः कर्मसाधनः ।" (अ. ८, सू. ४/भा. २, पत्र. १३०) इति ।

अनन्तरोक्ताः प्रकृत्यादयो मोदकोदाहरेण साध्याः । **तद्यथा-**वाताऽपहारिद्रव्यनिवृत्तो मोदको वातमुपशमयति, पित्तोपशकद्रव्यनिष्पन्नः पित्तं हरति, कफविनाशिद्रव्यसमुद्भूतः कफं नाशयति, बलबुद्धिवर्धकाऽऽदिद्रव्यजातो बलबुद्धिवर्धनाऽऽदिकं करोति, इत्येवंस्वभावा मोदकस्य प्रकृतिः । एवं कर्मणोऽपि । **तथाहि-**किञ्चित्कर्म ज्ञानमाच्छादयति, अन्यत्पुनर्दर्शनमावृणोति, इतरत्तु सुखदुःखसंवेदनकारणं जायते, अपरं मोहयतीत्येवंस्वरूपा प्रकृतिः । स एव मोदकः पुनर्दिनमेकं दिनद्वयं दिनत्रयं वा यावन्मासाऽऽदिकं कालं तिष्ठति । ततः परमुपरमति । तथैव कर्मपुद्गलराशिरप्यन्तर्मुहूर्त्तप्रभृतिसप्ततिसागरकोटाकोटीपर्यन्तामन्यतमां स्वयोग्यां स्थितिं प्राप्नोति । रसः पुनः स्निग्धमधुराऽऽदिरूपस्तस्यैव कस्यचिदेकगुणः, अपरस्य द्विगुणः, अन्यस्य त्रिगुण इत्यादिकोऽस्ति । एवं कर्मपुद्गलसंघातस्य रसोऽनुभागशब्दाऽभिधेय एकस्थान-द्विस्थानाऽऽदितीव्रमन्दाऽऽदिलक्षणो जायते । प्रदेशाश्च कणिक्काऽऽदिरूपास्तस्यैव मोदकस्य प्रसृति-सेतिकाऽऽदिप्रमाणा भवन्ति । तद्वत्कर्मणोऽप्यल्पबहुबहुतरबहुतमाऽऽदिरूपाः प्रदेशाः सन्ति ।

**उक्तञ्च बन्धशतकचूर्णौ** – ''जहा कोइ मोयगो समिति-गुड-घृत-कटु-हूंडाऽऽदिदव्वसंबद्धो, कोइ वायहरो, कोइ पित्तहरो, कोइ कफहरो, कोइ निरोगो, कोइ मारगो, कोइ बलकरो, । कोइ बुद्धिकरो, कोइ वामोहकरो, एवं कम्माणं प्रकृतिः = स्वभावः, कोइ णाणमावरेइ कोइ दंसणं, कोइ सुखदुक्खाऽऽइवेयणमित्यादि । तस्सेव मोयगस्स कालणियमणं अविनाशितत्वेन सा ठिई । तस्सेव णिद्धमहुराऽऽईणं एगगुणदुगुणाऽऽइभागचिंतणं अणुभागो । तस्सेव समियाऽऽइदव्वाणं परिमाणचिंतणं पएसो । एवं कम्मस्स वि सभावत्तमत्तचिंतणं पगइबंधो तस्सेव तब्भावेण कालऽवट्ठाणचिंतणं ठिइबंधो । तस्सेव सव्वदेसोवघाइअघाइएक्कदुगतिचउट्ठाणसुभाऽसुभतिव्वमंदाऽऽइचिंतणं अणुभागबंधो । तस्सेव पोग्गलपमाणणिरूवणं पएसबंधो ।'' (पु. पत्र.१५-१६) इति ।

**कर्मप्रकृतौ तद्वृत्तौ** च पुनः प्रकृत्यादीनां लक्षणमित्थं प्रतिपादितम्-अविवक्षितस्थिति-रस-प्रदेशा प्रकृतिः, अविवक्षितप्रकृति-रस-प्रदेशा स्थितिः, अविवक्षितप्रकृति-स्थिति-प्रदेशो रसः, अविवक्षितप्रकृति-स्थिति-रसः प्रदेशः । **तथा चोक्तं कर्मप्रकृतौ-** ''अविसेसियरसगपई उ पगइबंधो मुणेयव्वो ॥२४॥'' इति । **तथा चाऽत्र मलयगिरिवृत्तिः-**

''रसः स्नेहोऽनुभाग इत्येकार्थः । तस्य प्रकृतिः स्वभावः । अविशेषिता-ऽविवक्षिता रसप्रकृतिः उपलक्षणत्वात् स्थित्यादयोऽपि यस्मिन्नविवक्षिताः स बन्धोऽविशेषितरसप्रकृतिः प्रकृतिबन्धो ज्ञातव्यः । तुशब्दस्याऽधिकार्थसंसूचनात् अविवक्षितरसप्रकृतिप्रदेशः स्थितिबन्धः, अविवक्षितप्रकृतिस्थितिप्रदेशो रसबन्धः, अविवक्षितप्रकृतिस्थितिरसः प्रदेशबन्ध इत्यपि द्रष्टव्यम्'' (श्रीमुक्ताबाइज्ञानमन्दिरप्रकाशितप्रतिसत्कपृष्ठाऽङ्कः ६६-२) इति ।

प्रकृतग्रन्थे हि कर्मणां प्रकृतय एव केवला अधिकृताः, न पुनः स्थितादयोऽपीति ।

किं भवन्तः स्वशक्तिसामर्थ्येनामुं ग्रन्थं कथयिष्यन्ति?, उताऽन्यथा ? इति परशङ्काऽपनोदाऽर्थमाह- **''गुरुकिवाए''** त्ति 'गुरुकृपया' गृणन्ति तत्त्वं प्रवचनार्थमिति गुरवस्तीर्थङ्कर-गणधराऽऽदयः, तेषां कृपा = प्रसादः, तया ।

ननु भवन्तः किमर्थं वक्ष्यन्ति ? इत्यतः प्राह – **''सपरहियऽत्थं''** ति 'स्व-परहिताऽर्थम्' स्वञ्च परे चेति स्व-परे तेषां हितं = श्रेयः = मोक्षः, स्व-परहितम्, ''द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते'' इति **न्याया**त्स्वहितं परहितञ्चेत्यर्थः तदेवाऽर्थः = प्रयोजनं यत्र, तत्तथा, स्व-परहिताऽर्थम्, क्रियाविशेषणत्वेन ''क्रियाविशेषणात्'' (सि०-२-२-४१) इत्यनेन सूत्रेण द्वितीयाविभक्तिः ।

तथा चाऽत्र हि प्रेक्षावतां प्रवृत्त्यर्थं 'कर्मप्रकृतीः कीर्तये' इत्यनेनाऽभिधेयमभिहितम् । एतदनुक्ते हि किमत्र ग्रन्थेऽभिधेयमिति संशयमापन्ना न तत्र प्रवर्त्तेन्, वदेयुश्च नाऽऽरम्भनीयोऽयं ग्रन्थः, निरभिधेयत्वात्, काकदन्तपरीक्षावत् । **यदुक्तम्-**

श्रुत्वा-ऽभिधेयं शास्त्रादौ, पुरुषार्थोपकारकम् । श्रवणादौ प्रवर्तन्ते, तज्जिज्ञासाऽऽदिनोदिताः ॥ ॥

नाऽश्रुत्वा विपरीतं वा, श्रुत्वाऽऽलोचितकारिणः । काकदन्तपरीक्षाऽऽदौ, प्रवर्तन्ते कदाचन ॥ ॥'' इति ।

अभिहितेऽप्यभिधेये प्रयोजनमविदित्वा प्रेक्षावन्तो नैव प्रवृत्तिं तत्र कुर्युः, प्रेक्षावत्ताक्षतिप्रसङ्गात् । **उक्तञ्च** –

प्रयोजनमनुद्दिश्य , न मन्दोऽपि प्रवर्तते। एवमेव प्रवृत्तिश्चे- च्चैतन्येनाऽस्य किं भवेत् ॥ ॥'' इति ।

ते चाऽभिदध्युः-नारब्धव्योऽयं ग्रन्थः, प्रयोजनशून्यत्वात्, कण्टकशाखामर्दनवदिति । तेन प्रेक्षापूर्वकारिणां प्रवृत्तिकरणाय ग्रन्थाऽऽरम्भप्रयासनिष्फलताशङ्काव्युदासाय च ग्रन्थाऽऽदौ प्रयोजनं भणनीयम्, तच्च 'स्वपरहिताऽर्थम्' इत्यनेन प्रकटीकृतम् । अथ तदेव विस्तरतः प्रतिपाद्यते ।

**तद्यथा-**प्रयोजनं द्विधा ग्रन्थकार-श्रोतृभेदात्, एकैकमपि पुनर्द्विभेदम्, अनन्तर-परम्परभेदात् ।

तत्र ग्रन्थकर्तुरनन्तरं प्रयोजनं सत्त्वाऽनुग्रहः, बहुविस्तरशास्त्रपठनाऽऽद्यसमर्थानां संक्षिप्तरुचिसत्त्वानां शास्त्रप्रवृत्तेः । **यदाह–**

''सुयसायरो अपारो, आउं थोवं जिआ य दुम्मेहा। तं किं पि सिक्खियव्वं, जं कज्जकरं च थोवं च॥ ॥'' इति ।

भव्यजनबोधाऽनुग्रहो वा, शास्त्रस्य भव्यजन्तुबोधकत्वात्, कर्मनिर्जरा वा ग्रन्थग्रथनलक्षणस्वाध्यायस्याऽभ्यन्तरतपोरूपत्वेन बहुतरकर्मनिर्जरासम्भवात्, स्वदृढस्मृतिर्वा, ग्रन्थरचनाऽऽदिना हि तत्कर्तुः स्मृतिर्दृढा दृढतरा दृढतमा भवतीति हेतोः ।

परम्परप्रयोजनं तु मोक्षप्राप्तिः, भव्यसत्त्वाऽनुग्रहप्रवृत्तस्याऽचिरादपवर्गसम्पत्तिलाभाद् । **उक्तञ्च** –

''सर्वज्ञोक्तोपदेशेन , यः सत्त्वानामनुग्रहम् । करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥ ॥'' इति ।

श्रोतॄणामनन्तरप्रयोजनं प्रकृतग्रन्थविषयकं कर्मविषयकं ज्ञानम्, परम्परप्रयोजनं तु तेषामपि शिवलक्ष्मीप्राप्तिः । **यदाह–**

''सम्यग्भावपरिज्ञाना - द्विरक्ता भवतो जनाः । क्रियाऽऽसक्ता ह्यविघ्नेन, गच्छन्ति परमां गतिम् ॥ ॥'' इति ।

प्रयोजने प्रदर्शितेऽपि न तत्र सम्बन्धज्ञानं विना प्रेक्षावन्तः प्रवर्तेरन्, ततस्तेषां ग्रन्थप्रवृत्त्यर्थं सम्बन्धो वक्तव्यः । **यदुक्तम्–**

उक्ताऽर्थ ज्ञानसम्बन्धं, श्रोतुं श्रोता प्रवर्तते। शास्त्रादौ तेन वक्तव्यः,सम्बन्धः सप्रयोजनः ॥ ॥'' इति ।

स च द्विविधः, श्रद्धाऽनुसारि-तर्काऽनुसारिविनेयभेदात् । तत्राऽऽद्यो गुरुपर्वक्रमलक्षणः सम्बन्धः **''गुरुकिवाए''** इति । भणता ग्रन्थकारेण श्रद्धाऽनुसारिणः प्रति साक्षात् दर्शितः **तद्यथा-**गुणाति तत्त्वमिति गुरुः = सम्यक्तत्त्वोपदेशकः, स चाऽर्थमधिकृत्य श्रीमद्भगवत्तीर्थकृद्भवति; सूत्राऽपेक्षया पुनर्गौतमगणधराद्या आचार्या भवन्ति । **यदुक्तं सूत्रलक्षणम्–**

''सुत्तं गणहररइयं, तहेव पत्तेयबुद्धरइयं च। सुयकेवलिणा रइयं, अभिन्नदसपुव्विणा रइयं ॥ ॥'' इति ।

**तथाहि** - श्रीमत्प्रभुवर्धमानस्वामि-गौतमस्वामि-सुधर्मस्वामि-जम्बुस्वामिप्रमुखपरिपाट्या यावदस्मद्गुरु**प्रेमसूरीश्वरा**-ऽऽदिभिरस्माकमुपदिष्टम्, ततस्तेषां कृपयाऽयं ग्रन्थो ग्रथित इत्यतोऽयं ग्रन्थः सर्वज्ञमूलकोऽस्तीति हेतोः शेमुषीशालिभिरवश्यमादरणीयो भवतीति ।

**यद्वा** सूत्राऽर्थतो वाचनाऽऽदिविधायकानामपि तत्त्वोपदेष्टृत्वं घटते, ततश्चाऽस्मद्गुरुपर्यन्ता आचार्यादयोऽपि गुरुपदेन वाच्या भवन्ति, ततश्चाऽस्मद्गुरुचरणैर्मा प्राध्यापितः, ततस्तेषां कृपयाऽयं ग्रन्थो निर्मितो मयेति परम्परया सर्वज्ञमूलकोऽयं ग्रन्थो भवतीत्यत एव प्रेक्षावतां ध्रुवमुपादेयोऽयं ग्रन्थो विद्यते । तदेवं **''गुरुकिवाए''** इत्यनेन गुरुपर्वक्रमलक्षणः सम्बन्धः सूचितोऽस्ति । प्रोक्तसम्बन्धविरहे तु छद्मस्थाऽवस्थाऽविषयनानाविधाऽतीन्द्रियपदार्थसार्थप्रतिपादके प्रस्तुते ग्रन्थे प्रज्ञावन्तो न प्रवर्त्तेरन्, ते चाऽभिदध्युः, यथा नाऽऽरब्धव्योऽयं ग्रन्थः, सम्बन्धशून्यत्वात्, स्वेच्छारचितशास्त्रवदिति । ततोऽनेन छाद्मस्थ्यस्य सद्भावे सति स्वमतिकल्पनया स्वतन्त्रतया प्रतिपादनेन रथ्यापुरुषवाक्यवदनादेयता स्यादिति परोत्थशङ्काऽपि सर्वथा निर्मूलीकृता ।

अथ तर्काऽनुसारिण: शिष्यान् प्रति पुनरुपायोपेयभावरूपो वाच्यवाचकभावलक्षणो वा सम्बन्ध: साक्षान्नोक्तोऽपि सामर्थ्याद् गम्यत एव ।

**नन्वस्तु** श्रद्धाऽनुसारिण: शिष्यान् प्रति गुरुपर्वक्रमलक्षणसम्बन्ध:, किन्तु तर्काऽनुसारिण: शिष्यान् प्रति तु शब्दरूपाऽऽपन्नग्रन्थ-तत्प्रतिपाद्याऽर्थयो: क: सम्बन्ध: ?, न तावच्छब्दा-ऽर्थयोस्तादात्म्यलक्षण: सम्बन्धो युज्यते स हि य एवाऽर्थ:, स एव शब्द:, य एव शब्द:, स एवाऽर्थ इत्येवंरूपो भवति । इत्थं च सति घृतपूराऽऽदिशब्दोच्चारणे घृतपूराऽऽदिना मुखपूरणं भवेत् । विषाऽऽदिशब्दोच्चारणे च मरणाऽऽदिकं सम्पद्येत । न चैवं दृष्टमिष्टं वा, ततोऽसौ शब्दा-ऽर्थयोस्तादात्म्यरूपसम्बन्धो न युक्तियुक्त:, नाऽपि तदुत्पत्तिलक्षणसम्बन्ध: क्षोदसह: । **तथाहि-** किं शब्दादर्थ उत्पद्यते ?, अर्थाद्वा शब्द:?, न तावच्छब्दादर्थो जायते, पटाऽऽदयो हि तन्त्वादिभ्यो जायमाना दृश्यन्ते, न शब्दादिति । यदि च शब्दादपि पटाऽऽदयो भावा उत्पद्येरन्, तर्हि न तन्तुवायादयस्तन्त्वादिसत्कं परिश्रमं कुर्यु: । न चाऽप्यर्थाच्छब्दोत्पत्तिर्भवति, कण्ठताल्वोष्ठपुटदन्ताऽऽदिभ्य: पुरुषप्रयत्नसहितेभ्य एव शब्दोत्पत्तेर्दृश्यमानत्वात् । तत: शब्दा-ऽर्थयोस्तादात्म्य-तदुत्पत्त्यन्यतरसम्बन्धाऽभावेन तर्काऽनुसारिण: शिष्यान् प्रति नास्ति कश्चि**दिति चेत्, उच्यते** - भवद्भिश्चर्चितं सर्वं व्यर्थमेव, अस्माभिर्हि शब्दा-ऽर्थयोस्तादात्म्य-तदुत्पत्त्यन्यतरसम्बन्धस्याऽनङ्गीकाराद्, वाच्य-वाचकभावलक्षणस्य सम्बन्धस्य स्वीकाराच्च । **न च** वाच्य-वाचकभावलक्षणे सम्बन्धे किञ्चिद्विरुध्यते, **तद्यथा-**शब्दो हि वाचक:, अर्थस्तु वाच्य: अत्र च शब्दसमुदायाऽऽत्मकोऽयं ग्रन्थो वाचक:, तदभिधेयार्थस्तु वाच्य: स च वाच्य-वाचकभावलक्षण: सम्बन्ध: साक्षादनुक्तावपि सामर्थ्याद्गम्यते । **यद्वा** साध्यसाधनभावलक्षण: सम्बन्ध इह विवक्षितो बोध्य: । **तथाहि** – वचनरूपाऽऽपन्नोऽयं ग्रन्थ: साधनम्, तत्प्रतिपादिताऽर्थपरिज्ञानं च साध्यं मोक्षपदं वा । असौ साध्यसाधनभावरूप: सम्बन्धोऽप्यर्थापत्तिगम्य: ।

अत्र पुनरपि कश्चिदाह – **ननु** अधिगतशास्त्राऽर्थानां स्वयमेवाऽभिधेयाऽऽदिपरिज्ञानं भविष्यतीति निरर्थक एव शास्त्रादावभिधेयाद्युपन्यास **इति चेत्, न,** अनधिगतशास्त्रार्थानां प्रवृत्तिहेतुतया सफलत्वात्, अथ प्रेक्षावतां प्रवृत्तिर्निश्चयपूर्विका भवति, न चाऽभिधेयादावुक्तेऽप्यनधिगतशास्त्रार्थानां तन्निश्चयोपपत्ति:, वचनस्य बाह्यार्थं प्रति प्रामाण्याऽभावात्, न च संशयत: प्रवृत्तिरुपपन्ना, प्रेक्षावत्ताक्षतिप्रसङ्गात्, तत: कथं सार्थकता अधिकृताऽभिधेयाद्युपन्यासस्य?, तदेतदपरिभावितभाषितम्, वचनस्य बाह्याऽर्थं प्रति प्रामाण्यभावात्, अन्यथा सकलव्यवहारोच्छेदप्रसक्ते:, विजृम्भितं चैतद् विस्तरतो **धर्मसंग्रहणीवृत्त्यादिग्रन्थेषु**, ततो विशेषजिज्ञासुना तत्र द्रष्टव्यम् । अथ यदि वचनस्य बाह्याऽर्थं प्रति प्रामाण्यं तर्हि अत एव सम्यगभिधेयाऽऽदिपरिज्ञानभावाद् व्यर्था शास्त्रे प्रेक्षावतां प्रवृत्ति:, फलाऽभावात्, प्रवृत्तौ हि फलमभिधेयाऽऽदिपरिज्ञानम्, तच्चाऽधिकृताऽभिधेयाद्युपन्यासत एव सिद्धमिति, तदेतद् बालिशविजृम्भितम्, अधिकृतेन ह्यभिधेयाऽऽद्युपन्यासेना-ऽभिधेयाऽऽदीनामधिगति: सामान्येन भवति, न पुनर्नि:शेषविशेषपरिज्ञानपुरस्सरा, अधिकृताऽभिधेयाद्युपन्यासस्य सामान्येन प्रवृत्तत्वात्, "सामान्यनिष्ठं हि वच: सामान्यं प्रतिपादयति, विशेषनिष्ठं विशेषम् " इति **वचन**प्रामाण्यादधिकृताऽभिधेयाऽऽ-द्युपन्यासवाक्यत: सामान्येनाऽभिधेयाऽऽदिकेऽधिगते कथं नु नाम अस्माकं सविशेषं कर्मप्रकृतिपरिज्ञानं स्यादिति विशेषपरिज्ञानाय भवति प्रेक्षावतां शास्त्रे प्रवृत्ति:, **अन्यच्च-**यदि वचनस्याऽप्रामाण्यमभ्युपगम्यते तथाऽपि न

काचिद्विवक्षिताऽर्थहानि:, संशयतोऽपि प्रवृत्तिभावात्, **तथाहि**-अनेनाऽधिकृतप्रयोजनाद्युपन्यासेन तद्विषयसंशय उपजन्यते, संशयश्च द्विधा-अर्थसंशयोऽनर्थसंशयश्च तत्राऽर्थसंशयो यथा यदि वृष्ट्यादिसामग्री तत: सम्भवति शस्यनिष्पत्ति:, अनर्थसंशयो यथा यदि विषमिदं तर्हि यो भक्षयति स म्रियते, तत्राऽनर्थसंशयान्न कस्यचिच्छेमुषीशालिन: प्रवृत्तिर्भवति, अनर्थत: संशयस्याऽपि बिभ्यत्वात्, अर्थसंशयस्तु प्रेक्षावतोऽपि प्रवृत्त्यङ्गम्, अनर्थशङ्काया अभावात्, फलस्य च केषाञ्चिद्दर्शनात्, न चाऽयमधिकृताऽभिधेयाद्युपन्यासजनित: संशयोऽनर्थसंशय इति भवति प्रेक्षावतां प्रवृत्तिरिति न किञ्चिदनुपपन्नम् ।

तथा चाऽत्र ''**कम्मपयडिविणासिसिरिवीरं**'' इति गाथांशेन मङ्गलोपन्यासवच्चत्वारोऽतिशया अपि सुरासुरनाथोपासितपादपद्मस्य महावीरस्य भगवत: सूचिता: सन्ति ।

**तद्यथा** - कर्मप्रकृतिविनाशिशब्देनाऽपायभूतानां कर्मप्रकृतीनां विनाशस्य प्रतिपादनेनाऽपायाऽपगमाऽतिशयो द्योतित: । श्रीशब्दस्य केवलज्ञानाऽऽत्मकलक्ष्मीत्यर्थस्याऽपि करणेन ज्ञानाऽतिशय: प्रकटीकृत: । तस्यैव श्रीशब्दस्याऽष्टमहाप्रातिहार्यलक्षणस्य चतुस्त्रिंशदतिशयरूपस्य वा शोभाऽर्थस्याऽपि प्रकटीकरणेन पूजाऽतिशयो व्यक्तीकृत:। वीरशब्दस्य व्युत्पत्तिकरणद्वारा वचनाऽतिशयोऽपि प्रदर्शित: ।

**तद्यथा**- वि = विशिष्टाम् इं = लक्ष्मीं राति = भव्येभ्य: प्रयच्छतीति वीर:। **तथाहि**- भगवान् हि सर्वसत्त्वसाधारणया वाचा परमपदाऽऽराधनोपायोपदेशेन सकलभुवनाऽतिशायिनीं श्रियं भव्यानां राति ॥१॥

**इति मङ्गलाऽऽदिचतुष्कम्**

## ॥ अथ मूलकर्मप्रकृतयः ॥

''यथोद्देशं निर्देशः'' इति **न्यायेना**ऽधुना कर्मप्रकृतयो वक्तव्याः । ताश्च द्विविधा मूलोत्तरप्रकृतिभेदात्प्रोक्ताः । तत्र का मूलप्रकृतयः? का उत्तरप्रकृतयः । इत्येतद्दर्शयितुमना ग्रन्थकृद् वचसः क्रमवर्तित्वादादौ मूलप्रकृतीः प्रकटयति –

**णाणस्स दंसणस्स य, आवरणं वेअ-मोह-आऊणि ।**
**णामं गोअं विग्घं, एआ मूलपयडी अट्ठ ॥२॥**

(प्रे०) ''**णाणस्स**'' इत्यादि, 'ज्ञानस्य' ''ज्ञांश् अवबोधने'' ज्ञायते = परिच्छिद्यते वस्त्वनेनेति ज्ञानम्, ''करणाऽऽधारे'' (सिद्धहेम०-५-३-१२९) इत्यनेन हेमव्याकरणसूत्रेण करणेऽनट्प्रत्ययः, ज्ञातिर्वा ज्ञानम् ''अनट्'' (सिद्धहेम०-५-३-१२४) इति सूत्रेण करणे भावेऽनट्प्रत्ययः, सामान्यविशेषाऽऽत्मके वस्तुनि विशेषग्रहणाऽऽत्मको बोधः, **यद्वा** जानातीति ज्ञानम्, स्वविषयादानात् तस्स, ''रम्यादिभ्यः कर्तरि'' (सिद्धहेम०-५-३-१२६) इत्यनेन सूत्रेण कर्तर्यनट्, **यद्वा** विषयस्याऽऽधेयत्वेन ज्ञानस्याऽऽधारत्वेन च स्वविषयाऽऽधारत्वाद् ज्ञायते = अवभाषते वस्त्वस्मिन्निति ज्ञानम्, ''करणाऽऽधारे'' (सिद्धहेम० ५-३-१२९) इत्यनेन प्रागुक्तेनैव सूत्रेणाऽऽधारेऽनट्, तस्य मत्याद्यवान्तरपर्यायियुतस्याऽऽत्मधर्मपर्यायविशेषस्य; 'दर्शनस्य' ''दृशृं प्रेक्षणे'' दृश्यते = अवलोक्यतेऽनेनेति दर्शनम्, ''करणाऽऽधारे'' (सिद्धहेम० ५-३-१२९) इत्यनेन करणेऽनट्प्रत्ययः, दृष्टिर्वा दर्शनम्, ''अनट्'' इत्यनेन भावेऽनट्, सामान्यविशेषाऽऽत्मकवस्तुनि सामान्यग्रहणाऽऽत्मको बोधः, **यद्वा** पश्यतीति दर्शनम्, स्वविषयग्रहणरूपत्वात्तस्य ''रम्यादिभ्यः कर्तरि'' (सिद्धहेम०-५-३-१२६) इत्यनेन कर्तर्यनट्, तस्य चक्षुर्दर्शनाऽऽद्यवान्तरभेदयुतस्य जीवधर्मपर्यायविशेषस्य, 'आवरणम्' आव्रियते = ज्ञानं दर्शनं वाऽऽच्छाद्यतेऽनेनेत्यावरणम्, ''करणाऽऽधारे'' (सिद्धहेम०-५-३-१२९) इति सूत्रेण करणेऽनट्प्रत्ययः, **यद्वा** आवृणोति = ज्ञानं दर्शनं वाऽऽच्छादयतीत्यावरणम्, ''रम्यादिभ्यः कर्तरि' (सिद्ध० ५-३-१२६) इत्यनेन कर्तर्यनट्प्रत्ययः, **यद्वा** आवृतिरावरणम्, ''अनट्'' (सिद्ध०-५-३-१२४) इत्यनेन भावेऽनट् । ज्ञानाऽऽवरणं दर्शनाऽऽवरणञ्चेत्यर्थः ।

**उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ** – (अ.८, सू. ५/भा. २, पत्र. १३१)

''ज्ञानमेव बोधलक्षणो विशेषविषयः पर्याय आत्मनः, तथा दर्शनपर्यायः सामान्योपलम्भलक्षणस्तयोरावरणम् = आच्छादनमावृतिः = आवरणम्, आव्रियते वाऽनेनेति भाव-करणयोर्व्युत्पत्तिः,'' इति ।

तत्र ज्ञानावरणं कर्म पटतुल्यं भवति, यथा घन-घनतर-घनतमवस्त्रेणाऽऽच्छादिता चक्षुः कमलाऽऽदिदोषरहिताऽपि मन्दं मन्दतरं मन्दतमं पश्यति, तथा जीवः शरदुद्गतशशिनिर्मलतरोऽपि घन-घनतर-घनतमेन ज्ञानाऽऽवरणेनाऽऽवृत्तो मन्दं मन्दतरं मन्दतमं जानीते ।

**यदुक्तं बृहत्कर्मविपाके** –

''सरउग्गयससिनिम्मल-यरस्स जीवस्स छायणं जमिह । नाणावरणं कम्मं, पडोवमं होइ एवं तु ॥१०॥'' इति ।

दर्शनावरणं तु प्रतिहारसमानं विज्ञेयम्, यथा राजा इच्छति, अहं जनं पश्येयम्, तदा शोभनम्, जनोऽपीच्छति, अहं राजानमवलोकये, तदा शोभनम्, किन्तु प्रतीहारः स्वाऽनभिप्रेतस्य लोकस्य राजानं द्रष्टुकामस्य राजदर्शने प्रतिबन्धको भवति, तथैव दर्शनावरणरूपाऽननुकूलप्रतीहारेण दिदृक्षोरप्यात्मभूपालस्य जनस्थानभूतघटादेर्दर्शनं न जायते ।

**उक्तञ्च प्राचीनकर्मविपाके –**

"दंसणसीले जीवे, दंसणघायं करेइ जं कम्मं । तं पडिहारसमानं, दंसणवरणं भवे बीयं ॥१९॥
जह रण्णो परिहारो, अणभिप्पेयस्स सो उ लोयस्स । रण्णो तहि दरिसावं, देइ न दट्ठुं पि कामस्स ॥२०॥
जह राया तह जीवो, पडिहारसमं तु दंसणाऽऽवरणं । तेणिह विबंधएणं, न पिच्छए सो घडाऽऽईयं ॥२१॥" इति ।

" **वेअ०** " इत्यादि, वेद्यञ्च मोहश्चाऽऽयुश्चेति वेद्यमोहाऽऽयूंषीत्येवं वेद्याऽऽदीनि कृतेतरेतरद्वन्द्वानि प्रथमविभक्त्या निर्दिष्टानि । तत्र वेद्यते = अनुभूयते आह्लादाऽऽदिरूपेण यत्तद् वेद्यम्, "य एच्चातः" (सिद्धहेम०-५-१-२८) इत्यनेन कर्मणि यप्रत्ययः, वेदनीयमित्यर्थः । वेदनीयशब्देऽपि "तव्याऽनीयौ" (सिद्धहेम०-५-१-२७) इति सूत्रेण कर्मणि अनीयप्रत्ययः ।

यद्यपि च सर्वं कर्म वेद्यते तथाऽपि पङ्कजाऽऽदिशब्दवद् वेद्यशब्दस्य वेदनीयशब्दस्य वा रूढिविषयत्वात्साताऽसातरूपमेव कर्म वेद्यं वेदनीयं वेत्युच्यते, न शेषम् । **उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ** –

"सुखदुःखरूपेणाऽनुभावितव्यत्वाद् **वेदनीय**मिति कर्मसाधनम् ।" (अ. ८, सू. ५ / भा. २, पत्र. १३१) इति ।

तच्च वेद्यं वेदनीयं वा कर्म मधुलिप्तखड्गधारालेहनसदृशं भवति, यथा मधुलिप्तकरवालधाराया जिह्वयाऽऽस्वादनो भवति, तादृशं वेद्यम् । **भणितञ्च प्राचीनप्रथमकर्मग्रन्थे –**

"महुलित्तनिसियकरवालधारजीहाऽऽइजारिसं लिहणं । तारिसयं वेयणियं, सुहदुहउप्पायगं मुणह ॥२८॥" इति ।

तत्र मधुलेहनसमानं शातावेदनीयम्, असिधाराच्छेदनतुल्यमशातावेदनीयम् । **उक्तञ्च बृहत्कर्मविपाके–**

"महुआसायणसरिसो, सायावेयस्स होइ हु विवागो । जं असिणा तहि छिज्जइ, सो उ विवागो असायस्स ॥२९॥" इति ।

तथा मोहयति = ज्ञानिनमप्यात्मनं सदसद्विवेकविकलं करोतीति मोहः, "लिहाऽऽदिभ्यः" (सिद्धहेम०-५-१-५०) इत्यनेन सूत्रेण कर्तर्यच्प्रत्ययः, **यद्वा** मोहनं मोहः, मुह्यत्यनेनेति वा मोहः, "भावा-ऽकर्त्रोः" (सिद्धहेम०-५-३-१८) इत्यनेन भावे करणे च घञ्प्रत्ययः मोहनीयमित्यर्थः । मोहयतीति मोहनीय इति व्युत्पत्त्या मोहनीयशब्दोऽपि "प्रवचनीयाऽऽदयः" (सिद्धहेम०-५-१-८) इत्यनेन कर्तर्यप्यनीयप्रत्ययाऽन्तो निपातितोऽस्ति । **यद्वा** "बहुलम्" (सिद्धहेम०-५-१-२) इत्यनेन सूत्रेण कर्तर्यप्यनीयप्रत्ययः प्राप्यते । **अथवा** "तव्याऽनीयौ" (सिद्धहेम०-५-१-२७) इत्यनेन भावे करणे चाऽनीयप्रत्ययः । **उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ-**
मोहयति मोहनं वा मुह्यत्यनेनेति वा **मोहनीयम्**" (अ. ८, सू. ५/भा. २,पत्र.१३१) इति । स मोहः = मोहनीयं वा कर्म मद्यपानवदस्ति, यथा मद्यपानमूढो जन्तुः परायत्तो भूत्वा हिताऽहितविशेषं न वेत्ति तथैव मोहनीयकर्मणा मोहितः परवशः प्राणी स्वहिताऽहितज्ञानविकलो जायते । **उक्तञ्च प्राचीनकर्मविपाके–**

"जह मज्जपाणमूढो, लोए पुरिसो परव्वसो होइ । तह मोहेण वि मूढो, जीवो वि परव्वसो होइ ॥३४॥" इति ।

तथा एति = गच्छति प्रतिबन्धकतां स्वकृतकर्मवशलब्धनारकाऽऽदिभवतो निष्क्रमितुकामस्याऽपि प्राणिन इत्यायुः, **यद्वा** एति = गच्छति गत्यन्तरमनेनेत्यायुः । **उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ** – "एत्यनेन गत्यन्तराणीत्यायुः" इति, **यद्वा** आ = समन्ताद् एति = भवाऽन्तरसंक्रान्तौ जन्तूनां विपाकोदयमित्यायुः, सर्वत्राऽपि "इणो णित्" (सि०-उणादि०-९९८) इत्यनेनोणादिकसूत्रेण उस्प्रत्ययः । **अथवा** आयाति = भवाद् भवान्तरं संक्रामतां जीवानां निश्चयेनोदयमागच्छतीति "पृषोदराऽऽदयः" (सिद्धहेम०-३-२-१५५) इत्यनेन सूत्रेणाऽऽयुःशब्दः सिध्यते । यद्यपि च सर्वं कर्मोदयमायाति तथाऽप्यायुषो विशेषोऽस्ति, यतः शेषं कर्म बद्धं सत् किञ्चित्तस्मिन्नेव भवे उदयमायाति, किञ्चित्तु प्रदेशोदयभुक्तं जन्माऽन्तरेऽपि स्वविपाकत उदयं नाऽऽयात्येव इत्युभयथाऽपि व्यभिचारः, आयुषि तु नाऽयं व्यभिचारः, बद्धस्य तस्मिन्नैव भवेऽवेदनात्,

जन्माऽन्तरसंक्रान्तौ तु स्वविपाकतोऽवश्यं वेदनादिति विशिष्टस्यैवोदयाऽऽगमनस्य विवक्षिततत्वात्तस्य चाऽऽयुष्येव सद्भावात्तस्यैवैतन्नाम, **अथवा** आयान्ति = उदयमागच्छन्ति तद्भवप्रायोग्याणि सर्वाण्यपि शेषकर्माणि यस्मिन्नुदिते सति तदायुः, **यद्वा** आनीयन्तेऽस्मिन्नुपभोगाय जीवेन शाल्योदनव्यञ्जनविकल्पाः शेषप्रकृतयः कांस्यपात्रवदित्यायुः, **यद्वा** आनीयते तद्भवाऽन्तर्भावी प्रकृतिगणोऽनेनेत्यायुः, रज्जुबद्धेक्षुयष्टिभारकवत्, **यद्वा** आयतते वा शरीरधारणं प्रतीत्याऽऽयुर्निगडाऽऽदिवत् ।

तच्च चतुर्गत्यवस्थितिकारणमायुर्हडिसमं ज्ञातव्यम्, यथा हि राजाऽऽदिना हडौ क्षिप्तः कश्चिच्चौराऽऽदिकस्ततो निष्क्रमितुमना अपि विवक्षितं कालं यावत्तया ध्रियते तथा नारकाऽऽदिस्ततो निर्गन्तुकामोऽपि तदायुषा ध्रियते ।

**उक्तञ्च वृहत्कर्मविपाके –**

''जं नेरइयं नारय- भवम्मि तहि धरइ उव्वियंतं पि । जाणसु तं निरयाउं, हडिसरिसो तस्स उ विवागो ॥६४॥
एवं तिरियं मणुयं, देवं तिरियाइएसु भावेसुं । जं धरइ तब्भवगयं, तं तेसिं आउयं भणियं ॥६५॥'' इति ।

**''नामं''** ति नामयति = प्रवणयति गतिजातिप्रभृतिपर्यायाऽनुभवं प्रति जीवमिति नाम, **यद्वा** नामयति = प्रह्वीकरोति नारकाऽऽदिभावेषु जन्तुमिति नाम, उभयत्र कर्तृसाधनो नामशब्दः । **यद्वा** नम्यते = प्रह्वीक्रियतेऽनेनेति नाम ''सात्मन्नात्मन्.........'' (सि०-उणादि०-९१६) इति सूत्रेण मनन्तो निपात्यते । **यद्वा** नामयति = जीवप्रदेशसात्मकृतपुद्गलद्रव्यविपाकसामर्थ्यात् संज्ञां लभत इति नाम । **यद्वा** नामयति = अभिमुखीकरोति = संसारिणः प्राणयति गतिजात्यादीन् भावानिति नाम । **यदाह श्रीतत्त्वार्थसूत्रवृत्तौ -** ''नामयतीति **नाम** प्रह्वयत्यात्मानं गत्याद्यभिमुखमिति, नम्यते वा प्रह्वीक्रियतेऽनेनेति नाम । कर्तरि करणे वा व्युत्पाद्यते ।'' (अ. ८, सू. ५ / भा. २, पत्र. १३१) इति ।

तच्च नामं चित्रकारसन्निभं ज्ञेयम्, यथा चातुर्ययुतश्चित्रकारो नानावर्णैरनेकानि सुरूपाणि कुरूपाणि च निर्वर्तयति तथैव नामप्रकृतिरपि जीवस्य सुरूपाणि कुरूपाणि च विदधाति । **उक्तञ्च प्राचीनकर्मविपाके –**

''जह चित्तयरो णिउणो, अणेगरूवाइ कुणइ रूवाइं । सोहणमसोहणाइं , चोक्खाऽचोक्खेहिं वण्णेहिं ॥६७॥
तह नामं पि य कम्मं, अणेगरूवाइं कुणइ जीवस्स । सोहणमसोहणाइं , इट्ठाऽणिट्ठाइ लोयस्स ॥६८॥'' इति ।

**''गोअं''** ति, ''गुङ् शब्दे' गूयते = शब्द्यते उच्चावच्चैःशब्दैर्यत् तद् गोत्रम्, उच्चनीचकुलोत्पत्तिलक्षणः पर्यायविशेषः, तद्विपाकवेद्यम् कर्माऽपि गोत्रम्, कारणे कार्योपचारात्, **यद्वा** कर्मणोऽपादानविवक्षया गूयते शब्द्यते उच्चावच्चैःशब्दैरात्मा यस्मात् तद् गोत्रम्, **यद्वा** गां = शुभाऽशुभां वाचां त्रायते = पालयति उच्चारणकालाऽनन्तराऽर्थज्ञानप्रतिपत्तिजनकत्वादिति गोत्रम्, ''आतो डोऽह्वा-वा-मः'' (सिद्धहेम०-५-१-७६) इति सूत्रेण कर्तरि डप्रत्ययः । **उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ–** ''**गोत्रं** उच्चनीचभेदलक्षणं तद् गच्छति = प्राप्नोत्यात्मेति गोत्रम् ।'' (अ. ८, सू. ५ / भा. २, पत्र. १३१) इति ।

तच्च गोत्रं कुलालनिभमवगन्तव्यम्, यथा कुम्भकारो हि मृत्तिकायास्तादृशं पूर्णकलशाऽऽदिकं विधत्ते यादृशं शकुनतया पुष्पचन्दनदध्यक्षताऽऽदिभिर्लोकात्पूजां प्राप्नोति, स एव कुम्भकारः पुनर्मृत्तिकायास्तादृशं भुम्भलाऽऽदि निष्पादयति, यादृशं तत्कालनिष्पन्नमक्षिप्तमद्यमपि लोकान्निन्दां लभते, तथा यत्कर्मोदयान्निर्धनः प्रज्ञाऽऽदिविशिष्टगुणरहितः कुरूपोऽपि सुकुलजन्ममात्रादेवाऽभ्यर्चनमवाप्यते, यत्कर्मोदयाच्च धनाऽऽदिवैभवयुतो रूपसम्पन्नोऽप्रतिकार्यप्रज्ञोऽपि कुकुलजन्ममात्रादेव निन्दामश्नुते । **तदुक्तं प्राचीनप्रथमकर्मग्रन्थे –**

''जह इत्थ कुम्भकारो, पुढवीए कुणइ एरिसं रूवं । जं लोयाओ पूयं, पावइ इह पुण्णकलसाई ॥१५१॥'' इति ।

"**विग्धं**" ति, विशेषेण हन्यन्ते = विनाश्यन्ते दानाऽऽदिलब्धयोऽनेनेति विघ्नम्, "स्थादिभ्यः कः" (सि०-५-३-८२) इत्यनेन सूत्रेण करणे कप्रत्ययः, अन्तरायमित्यर्थः । **अन्तरायशब्दनिष्पत्तिश्चैवम्**– अन्तरं = व्याघातम्, तस्याऽऽयः = कारणं यत्तदन्तरायम्, दानाऽऽद्यनुभवतो विघातरूपतयोपतिष्ठते यत्तदन्तरायम् । **उक्तञ्च श्रीतत्त्वार्थसूत्रवृत्तौ**– "अन्तर्धीयतेऽनेनाऽऽत्मनो वीर्यलाभाऽऽदीति अन्तरायः । अन्तर्धानं वाऽऽत्मनो वीर्याऽऽदिपरिणामस्येत्यन्तरायः।"कृत्यल्युटो बहुलं" (पा.-अ.-३-पा.-३-सू. ११३) इति लक्षणसद्भावात् सर्वत्र साधिमा प्रतिपत्तव्यः।" (अ.८, सू.५/भा.२, पत्र.१३१) इति ।

तच्च विघ्नं भाण्डागारिकोपमं समवसेयम् । यथा राजाऽननुकूलेन स्वनियोगिकेणाऽपि भाण्डागारिकेण दानाऽऽदीनि कर्तुं न शक्यते, तथाऽऽत्मनृपतिरपि विघ्नभाण्डागारिकेण दानाऽऽदीनि कर्तुं न पारयति ।

**यदुक्तं श्रीबृहत्कर्मविपाके –**

"जह राया इह भंडारिएण विणएण कुणइ दाणाऽऽई । तेण उ पडिकूलेणं , न कुणइ सो दाणमाईणि ॥१५७॥
जह राया तह जीवो, भंडारी जह तहंतरायं च । तेण उ विबंधएणं , न कुणइ सो दाणमाईणि ॥१५८॥" इति ।

तदेवं प्रथमं ज्ञानावरणं कर्म, द्वितीयं दर्शनावरणं कर्म, तृतीयं वेदनीयं कर्म, चतुर्थं मोहनीयं कर्म, पञ्चममायुःकर्म, षष्ठं नाम कर्म, सप्तमं गोत्रं कर्म, अष्टममन्तरायं कर्म प्रोक्तम् ।

**यदाह बृहत्कर्मविपाके –**

"पढमं नाणावरणं, बीयं पुण दंसणस्स आवरणं । तइअं च वेअणीयं, तहा चउत्थं च मोहनीयं ॥५॥
आऊ नामं गोयं, अट्ठमयं अंतराइयं होइ । मूलपयडीउ एया, उत्तरपयडीउ कित्तेमि ॥६॥" इति ।

**ननु** ज्ञानावरणाऽऽदीनामित्थमुपन्यासे क्रमप्रवृत्तिरियं सहेतुका यदुत निर्हेतुका यादृच्छिकी यथाकथञ्चि**दिति चेत्** ? सहेतुकाऽस्ती**ति ब्रूमः** । **किं तदिति चेत् ? उच्यते**-इह ज्ञानं दर्शनं च जीवस्य स्वतत्त्वभूतम्, तदभावे जीवत्वस्यैवाऽयोगात्, चेतनालक्षणो हि जीवः, चेतना च ज्ञानदर्शनोपयोगाऽऽत्मिका, ततः स कथं ज्ञानदर्शनाऽभावे भवेत् ? लक्षणाऽभावे लक्ष्याऽभावात्; कर्मप्ररूपणा हि प्रधानतयाऽऽत्मानमधिकृत्यैव भाव्यते, तदभावे च तत्प्ररूपणाऽभावप्रसङ्गः तेन ज्ञानदर्शने मुख्ये तयोरपि मध्ये ज्ञानमेव प्रधानम्, तद्वशादेव सकलशास्त्राऽऽदिविषयविचारसंततिप्रवृत्तेः । अपि च सर्वा अपि लब्धयो जीवस्य साकारोपयोगोपयुक्तस्योपजायन्ते, न दर्शनोपयोगयुक्तस्य "सव्वा उ लद्धीओ सागरोवउत्तस्स न अणागारोवओगोवउत्तस्स" इति **वचन**प्रामाण्यात्, किञ्च यस्मिन् समये सकलकर्मविनिमुक्तस्वरूपो जीवः संजायते, तस्मिन् समये स ज्ञानोपयोगोपयुक्त एव भवति, न दर्शनोपयोगयुक्तः, दर्शनोपयोगस्य द्वितीयसमये भावात्, ततो ज्ञानं प्रधानम्, तदावारकं च ज्ञानावरणं कर्म, ततस्तत्प्रथममुक्तम् । ततस्तदनन्तरं द्वितीयं दर्शनाऽऽवरणम्, ज्ञानोपयोगाच्च्युतस्य दर्शनोपयोगेऽवस्थानात् । एते च ज्ञानदर्शनाऽऽवरणे स्वविपाकमुपदर्शयन्ती यथायोग्यमवश्यं सुखदुःखरूपवेदनीयविपाकोदयनिमित्ते भवतः । **तद्यथा-** ज्ञानावरणमुपचयोत्कर्षप्राप्तं विपाकतोऽनुभवन् सूक्ष्म-सूक्ष्मतरवस्तुविचाराऽक्षममात्मानं जानानो भूरिशो लोकोऽत्र खिद्यते ज्ञानावरणकर्मक्षयोपशमपाटवोपेतश्च सूक्ष्म-सूक्ष्मतराणि वस्तूनि निजप्रज्ञया भिन्दानो बहुज्ञानाऽतिशायिनमात्मानं निरीक्ष्य सुखमनुभवति । तथा निबिडदर्शनाऽऽवरणविपाकोदयतो जात्यन्धाऽऽदिरत्यन्तदुःखं वेदयते, दर्शनाऽऽवरणक्षयोपशमाच्च सुस्पष्टचक्षुरादिपरिकलितो यथास्थितवस्तुदर्शनेन प्रमोदभाग्भवति; तत एतदर्थप्रतिपत्त्यर्थं दर्शनावरणाऽनन्तरं तृतीयं वेदनीयग्रहणम् । वेदनीयं च सुखदुःखे जनयति, इष्टाऽनिष्टविषयसम्बन्धात्, इष्टाऽनिष्टविषयसम्बन्धे चाऽवश्यं संसारिणां रागद्वेषौ, तौ च मोहनीयहेतुकौ, तत एतदर्थप्रतिपत्तये वेदनीयाऽनन्तरं चतुर्थं मोहनीयग्रहणम्; मोहनीयमूढाश्च प्राणिनो

W 83909

बह्वारम्भपरिग्रहाऽऽद्यासक्ता नरकाऽऽद्यायुष्कमाबध्नन्ति, ततो मोहनीयाऽनन्तरं पञ्चममायुर्ग्रहणम् । **यद्वा** लोको मोहनीयस्य प्रबलसाम्राज्यान्न विरज्यते, अविरक्तश्च देव-मनुष्य-तिर्यङ्-नरकाऽऽयुषि वर्तत इति मोहसमनन्तरं पञ्चममायुर्ग्रहणम् । नरकाऽऽद्यायुष्के चोदितेऽवश्यं नरकगत्यादीनि नामान्युदयमागच्छन्ति, आयुरुदयसापेक्षत्वाद् गत्याद्युदयस्य, तत आयुस्समनन्तरं षष्ठं नामोपादानम् । नामकर्मोदये चाऽवश्यमुच्चनीचाऽन्यतरशब्दव्यपदेशभाग् गोत्रनिमित्तको भवति, अतो नामग्रहणाऽनन्तरं गोत्रग्रहणम् । गोत्रोदये चोच्चैःकुलोत्पन्नस्य प्रायो दानलाभाऽन्तरायाऽऽदिक्षयोपशमो भवति, राजप्रभृतीनां प्राचुर्येण दान-लाभाऽऽदिदर्शनात्; नीचैःकुलोत्पन्नस्य तु दान-लाभाऽन्तरायाऽऽद्युदयः, अन्त्यजाऽऽदीनां तथा दर्शनात्; एतदर्थप्रतिपत्त्यर्थं गोत्रसमन्तरमन्तरायभणनम् ।

**तथा श्रीतत्त्वार्थसूत्रवृत्तावपि ज्ञानावरणीयाऽऽदीनां क्रमः सप्रयोजनो दर्शित इत्थम् -**

''क्रमस्त्वेषामर्थाऽपेक्षः । तथा च ज्ञानदर्शनाऽऽवरणोदयजनिता सर्वसत्त्वानां भवव्यथा । तां च वेदयमानोऽपि मोहाऽभिभूतत्वान्न विरज्यते । अविरक्तश्च देव-मानुष-तिर्यङ्-नरकाऽऽयुषि वर्तते । न चाऽनामकं जन्म । जन्मवन्तश्चाऽनुस्यूताः सदैव गोत्रेण । तत्र संसारिणां सुखलेशाऽनुभवः साऽन्तरायः सर्व इत्यन्तरायनिर्देशः ॥'' (अ.८, सू.५/भा.२, पत्र. १३१) इति ।

अथोपसंजिहीर्षुर्मूलप्रकृतिसङ्ख्यां प्रकटयन्नाह — **''एआ''** इत्यादि, ''एताः'' अनन्तरोक्ता ज्ञानाऽऽवरणाऽऽदिरूपा मूलप्रकृतयः ''अष्टौ'' ''सर्वं वाक्यं सावधारणम्'' इति **वचना**त् अष्टसङ्ख्याका एव सन्ति, न न्यूना अधिका वेति । **यद्वा** प्रकृतिशब्दो भेदपर्यायः, यतो व्यवह्रियते प्रकृतिशब्दो भेदवाची । **उक्तञ्च भाष्यकृता –** ''अहवा पयडी भेओ'' ॥ इति, तत एत एव मूलभेदा अष्टौ सन्ति, नाऽन्ये ॥२॥

साम्प्रतं भणितानां मूलप्रकृतीनामष्टानां ज्ञानाऽऽवरणादीनामुत्तरप्रकृतीः सङ्ख्यामात्रेण प्रतिपादयितुकामो ग्रन्थकारो भणति—

**तेसिं उत्तरपयडी, कमसो पंच णव दोण्णि अडवीसं ।**
**चउरो तिजुअसयं दो, पणऽत्थि सव्वाऽडवण्णसयं ॥३॥**

(प्रे०) **''तेसिं''** इत्यादि, तासाम् = अनन्तरोदितानामष्टानां मूलप्रकृतीनामुत्तरप्रकृतयः क्रमशः पञ्च (५) नव (९) द्वे (२) अष्टाविंशतिः (२८) चतस्रः (४) त्रियुतशतं (१०३) द्वे (२) पञ्च (५) सन्ति । **तद्यथा-** ज्ञानाऽऽवरणस्य पञ्चोत्तरप्रकृतयो मतिज्ञानाऽऽवरणाऽऽदयः, दर्शनाऽऽवरणस्य नवोत्तरप्रकृतयश्चक्षुर्दर्शनाऽऽवरणाऽऽदयः, वेदनीयस्य द्वे उत्तरप्रकृती साताऽसातलक्षणे, मोहनीयस्योत्तरप्रकृतयोऽष्टाविंशतिर्मिथ्यात्वदर्शनमोहनीयाऽऽदयः, आयुषश्चतस्र उत्तरप्रकृतयो नरकाऽऽयुष्काऽऽदयः, नाम्न उत्तरप्रकृतयस्त्र्यधिकशतं नरकगत्यादयः, गोत्रस्य द्वे उत्तरप्रकृती नीचैरुच्चैरूपे, अन्तरायस्य पञ्चोत्तरप्रकृतयो दानाऽन्तरायाऽऽदयः । **तथा चोक्तं वृहत्कर्मविपाके–**

''पञ्चविहनाणवरणं , नव भेया दंसणस्स दो वेए । अट्ठावीसं मोहे, चत्तारि य आउए हुन्ति ॥७॥
नामे तिउत्तरसयं, दो गोए अंतराइए पंच । एएसिं भेयाणं, होइ विवागो इमो सुणह ॥८॥'' इति ।

अथ समुदितानामुत्तरप्रकृतीनां सङ्ख्यां वक्तुमुपक्रमते —**''सव्वा''** इत्यादि, **''सव्वा''** त्ति घण्टालाला**न्यायेन** 'अस्ति' इति पदमिहाऽपि सम्बध्यते । 'सर्वाः' मूलाऽष्टप्रकृतीनां समस्ता अपि मिलिता उत्तरप्रकृतयः 'अष्टपञ्चाशच्छतम्' अष्टपञ्चाशताऽधिकं शतम् अष्टपञ्चाशच्छतम् । **यद्वा** अष्टपञ्चाशतं शतं सर्वसङ्ख्यया सन्ति । अष्टपञ्चाशद् (प्रकृतीनाम्) अधिकमस्मिन् शते तद् अष्टपञ्चाशं शतम्, ''अधिकं तत्सङ्ख्यमस्मिन् शत्-सहस्रे शति-शद्-दशान्ताया डः'' (सिद्धहेम०-७-१-१५४) इति डप्रत्ययः, अष्टपञ्चाशञ्च तच्छतञ्चाऽष्टपञ्चाशशतमिति कृत्वा ॥३॥

**॥ इति मूलकर्मप्रकृतयः ॥**

## अथोत्तरकर्मप्रकृतयः

ज्ञानावरणाऽऽदिमूलकर्मणामुत्तरप्रकृतीर्नामग्राहेण वक्तुमुपक्रमते ग्रन्थकृद् –

**मइ-सुअ-ऽवहि-मण-केवल- णाणावरणं ति पंचहा पढमं ।**
**णय-णेय-रोहि-केवल - दंसणआवरणगं णेयं ॥४॥**
**णिद्दा णिद्दाणिद्दा, पयला पयलपयला य थीणद्धी ।**
**एवं नवहा बीअं, सायमसायं दुहा तइअं ॥५॥**

(प्रे०) "**मइ०**" इत्यादि, 'मतिश्रुताऽवधिमनःकेवलज्ञानावरणं' पदैकदेशे पदसमुदायोपचारादिह मनःशब्देन मनःपर्यायो मनःपर्यवो मनःपर्ययो वा गृह्यते, ज्ञानाऽऽवरणञ्च "द्वन्द्वाऽऽदौ द्वन्द्वाऽन्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति **न्यायेन** प्रत्येकमभिसम्बध्यते । ततश्चायमर्थः- मतिज्ञानाऽऽवरणं श्रुतज्ञानाऽऽवरणमवधिज्ञानाऽऽवरणं मनःपर्यायज्ञानाऽऽवरणं मनःपर्यवज्ञानाऽऽवरणं मनः-पर्ययज्ञानाऽऽवरणं वा केवलज्ञानाऽऽवरणं च । तत्र "बुधिं मनिच् ज्ञाने" "मनूयि बोधने" वा मन्धातुः मननं मतिः, **यद्वा** मन्यते = इन्द्रियमनोद्वारेण नियतं वस्तु परिच्छिद्यतेऽनयेति मतिः, "स्त्रियां क्तिः" (सिद्धहेम०-५-३-९१) इत्यनेन भावे करणे वा क्तिप्रत्ययः, मनुते मन्यते वाऽर्थानिति मतिः "बहुलं" (सिद्धहेम०-५-१-२) इति सूत्रेण बाहुलात् कर्तर्यपि क्तिप्रत्ययः, मतिश्च सा ज्ञानञ्च मतिज्ञानम् । इदञ्चाऽऽभिनिबोधिकमप्युच्यते । **यदुक्तं श्रीनन्दिसूत्रे -**

"नाणं पंचविहं पन्नत्तं तं जहा-आभिणिबोहियनाणं सुयनाणं ओहिनांणं मणपज्जवनाणं केवलनाणं" (सू.१/पत्र.६५-२) इति ।

तत्र चाऽऽभिनिबोधिकज्ञानशब्दाऽर्थोऽयम्-अभि = इत्याभिमुख्ये, नि इति नैयत्ये, ततश्चाऽभिमुखः = वस्तुयोग्यदेशाऽवस्थानाऽपेक्षी नियतः = इन्द्रियमनः समाश्रित्य स्व-स्वविषयाऽपेक्षी "बुद्धिं मनिच् ज्ञाने" बोधनं बोधः इत्यभिनिपूर्वकबुध्धातोः "भावा-ऽकर्त्रोः" (सिद्धहेम०५-३-१८) इत्यनेन सूत्रेण भावे घञ्प्रत्ययः स्याद्, स एवाऽऽभिनिबोधिकम्, "विनयाऽऽदिभ्यः" (सिद्धहेम०-७-२-१६९) इत्यनेन स्वार्थे इकण्प्रत्ययः । **यद्वा** अभि = अर्थाऽभिमुखः, अविपर्ययरूपत्वात्, नि = नियतः, असंशयरूपत्वात्, बोधः= संवेदनम्, इत्यभिनिबोधः, स एवाऽऽभिनिबोधिकम् "विनयाऽऽदिभ्यः" (सिद्धहेम०-७-२-१६९) इत्यनेन सूत्रेण स्वार्थे इकण्प्रत्ययः । **यद्वा**ऽभिनिबोधे भवम्; तेन वा निवृत्तम्, स वा प्रयोजनमस्य चेति इकण्प्रत्ययोपादानादाभिनिबोधिकम् । **यद्वा** अभिनिबुध्यते यः कर्मभूतः स एवाऽऽभिनिबोधिकम् = अवग्रहाऽऽदिरूपं मतिज्ञानमेव, तस्य स्वसंविदितरूपत्वात्; **यद्वा** अभिनिबुध्यतेऽनेनाऽस्मादस्मिन् वेत्यभिनिबोधः, स एवाऽऽभिनिबोधिकम्, तदावरणकर्मक्षयोपशम इत्यर्थः, **अथवा** अभिनिबुध्यत इत्यभिनिबोधः, "लिहाऽऽदिभ्यः" (सिद्धहेम०-५-१-५०) इत्यनेन कर्तर्यच्प्रत्ययः स एवाऽऽभिनिबोधिकम् = आत्मा अभिनिबोधोपयोगपरिणामाऽभिन्नत्वात्तस्य। आभिनिबोधिकं च तज्ज्ञानं च आभिनिबोधिकज्ञानम् ।

तच्च मतिज्ञानमाभिनिबोधिकज्ञानं वा श्रुतनिश्रितमश्रुतनिश्रितं चेति द्विविधं भवति । तत्र च प्रायः श्रुताऽभ्यासमन्तरेणाऽपि सहजविशिष्टक्षयोपशमवशाद् यदुत्पद्यते, तद् अश्रुतनिश्रितमौत्पत्तिक्यादिबुद्धिचतुष्टयम् । **यदुक्तं नन्दिसूत्रे** - "से किं आभिणिबोहियनाणं ? आभिणिबोहिअं नाणं दुविहं पन्नत्तं, तं जहा सुयनिस्सियं च अस्सुयनिस्सियं च । से किं तं अस्सुयनिस्सियं ?, अस्सुयनिस्सियं चउव्विहं पन्नत्तं, तं जहा-उप्पत्तिया वेणइया कम्मिया परिणामिया बुद्धी चउव्विहा वुत्ता पंचमा नोवलब्भई ॥" (सू. २६/पत्र.१४४-१) इति ।

तत्रौत्पत्तिकी बुद्धिर्यथा रोहकस्य । वैनयिकी बुद्धिः पददर्शनात्करिण्यादिज्ञायकच्छात्रस्येव । कर्मजा बुद्धिश्चित्रकार-कर्षकादीनामिव । पारिणामिकी श्रीवज्रस्वामिन इव ।

यत्तु पूर्वं श्रुतपरिकर्मितमतेर्व्यवहारकाले पुनरश्रुताऽनुसारितया समुत्पद्यते तत् श्रुतनिश्रितम् ।

**यदुक्तं विशेषाऽऽवश्यके–**

"पुव्वं सुयपरिकम्मिय-मइस्स जं संपयं सुयाऽऽईयं । तं निस्सियमियरं पुण, अणिस्सियं मइचउक्कं तं ॥१६९॥" इति ।

तच्चतुर्धा भवति, **तद्यथा** - अवग्रह ईहा-ऽपायः धारणा । **यदाह** - (न. सू.२७/पत्र.१६८-१)

"से किं तं सुअनिस्सियं ?, सुयनिस्सियं **चउव्विहं** पन्नत्तं, तं जहा-उग्गहो १ ईहा २ अवाए ३ धारणा ४॥" इति ।

तत्राऽवग्रहो द्विविधो भवति, **तथाहि**-व्यञ्जनाऽवग्रहोऽर्थाऽवग्रहश्च । **उक्तञ्च नन्द्यध्ययने** -(सू.२८/ पत्र.१६८-२) से किं तं उग्गहे ?, उग्गहे दुविहे पण्णत्ते, **तं जहा**-अत्थुग्गहे अ वंजणुग्गहे अ ।" इति । तत्र व्यज्यते = प्रकटीक्रियतेऽनेनाऽर्थः, प्रदीपेनेव घट इति व्यञ्जनम् ।

**उक्तञ्च विशेषाऽऽवश्यके** – "वंजिज्जइ जेणऽत्थो, घडोव्व दीवेण वंजणं तं च ।" (गा. १९४) इति ।

तच्चोपकरणेन्द्रियं कदम्बपुष्पाऽतिमुक्तकपुष्पक्षुरप्रनानाऽऽकृतिसंस्थितश्रोत्रघ्राणरसस्पर्शनलक्षणं शब्दगन्धरसस्पर्शपरिणतद्रव्यसंघातो वा । ततश्च व्यञ्जनेन = उपकरणेन्द्रियेण व्यञ्जनानां शब्दाऽऽदिपरिणतद्रव्याणामवग्रहणमवग्रहः = परिच्छेदनं व्यञ्जनाऽवग्रहः एकस्य व्यञ्जनशब्दस्य लोपाद् मध्यमपदलोपी समासो वा । किमपीदमित्यव्यक्तज्ञानरूपाऽर्थावग्रहात्पूर्वभाव्यव्यक्ततरं ज्ञानमित्यर्थः ।

अयञ्च व्यञ्जनाऽवग्रहश्चक्षुर्मनोऽतिरिक्तेन्द्रियचतुष्कं समाश्रित्य चतुर्धा भवति । **उक्तञ्च देवर्द्धिवाचकैर्नन्द्यध्ययने-**

"से किं तं वंजणुग्गहे ? वंजणुग्गहे चउव्विहे पण्णत्ते, **तं जहा**-सोइंदियवंजणुग्गहे घाणिंदियवंजणुग्गहे रसणिंदियवंजणुग्गहे फासिंदियवंजणुग्गहे ।" (सू. २९/पत्र. १६९-२) इति ।

मनश्चक्षुषोर्वर्जनं किमर्थं कृतम् **इति चेत् उच्यते**-चक्षुर्मनसोरप्राप्यकारित्वेन विषयसम्बन्धाऽभावाद् व्यञ्जनाऽवग्रहस्य चेन्द्रियविषयसम्बन्धग्राहकत्वात् । चक्षुर्मनसोरप्राप्यकारित्वञ्च विषयकृताऽनुग्रहोपघातरहितत्वात्, प्राप्यकारित्वे चाऽग्नि-जल-शूल्यादीनां दर्शने चिन्तने च दहन-क्लेदन-पाटनाऽऽदिप्रसङ्गात् ।

अत्र च विषयदेशं गत्वा न पश्यति, प्राप्तं चाऽर्थं नाऽऽलम्बत इत्येतावन्नियम्यते, तेन प्राप्तेन मूर्तिमता सूर्यकिरणाऽऽदिनाऽनुग्रहोपघातौ भवत एव ।

**अन्ये पुनराहुः**- व्यवहिताऽर्थाऽनुपलब्धेरनुमानाच्चक्षुषः प्राप्यकारित्वमस्ति, इति, तदयुक्तम्, व्यभिचारात् काचस्फटिकाद्यन्तरितस्याऽप्युपलब्धेः । यदि पुनरुच्यते-स्यादेतद्,चक्षूरश्मयो हि निर्गत्य तमर्थं गृह्णन्तीति दर्शनरश्मीनां तैजसत्वात्तेजोद्रव्यैरप्रतिस्खलनाददोष इति, तदप्ययुक्तम्, महाज्वालाऽऽदौ प्रतिस्खलनोपलब्धेरित्यत्र बहु वक्तव्यम्, तत्तु नोच्यते, ग्रन्थगौरवभयात् । व्यञ्जनाऽवग्रहस्य च कालो जघन्यत आवलिकाऽसङ्ख्येयभागः, उत्कृष्टत आनप्राणपृथक्त्वम् । **उक्तञ्च** – "व्यञ्जणऽवग्गहकालो, आवलियअसंखभागतुल्लो उ । थोवो उक्कोसो पुण, आणापाणप्पहुत्तं ति" इति ।

अर्यत इत्यर्थः, तस्य शब्दाऽऽदिभेदानामन्यतरेणाऽपि भेदेनाऽनिर्धारितस्य सामान्यरूपस्याऽवग्रहणमर्थाऽवग्रहः = किमपीदमित्यव्यक्तज्ञानम् । स च मनःसहितेन्द्रियपञ्चकजन्यत्वात् षोढा । **तथाहि**-श्रोत्रेन्द्रियाऽर्थाऽवग्रहः १, चक्षुरिन्द्रियाऽर्थाऽवग्रहः २, घ्राणेन्द्रियाऽर्थाऽवग्रहः ३, रसनेन्द्रियाऽर्थाऽवग्रहः ४, स्पर्शेन्द्रियाऽर्थाऽवग्रहः ५, मानसाऽर्थाऽवग्रहश्चेति ६ ।

ईहनं = अवगृहीतस्यैव वस्तुनोऽपि 'किमयं भवेत् स्थाणुरेव ? न तु पुरुषः' इत्यादि वस्तुधर्माऽन्वेषणाऽऽत्मकं ज्ञानचेष्टनमीहा = अन्वय-व्यतिरेकधर्मघटनविघटनरूपबोधविशेष इति यावद् साऽप्यर्थाऽवग्रहवन्मनोयुतेन्द्रियपञ्चकोत्पद्यमानत्वात्षड्विधा भवति ।

अपायः = ईहितस्यैव वस्तुनः स्थाणुरेवाऽयमिति निश्चयाऽऽत्मको बोधविशेषः सोऽपि मनःषष्ठेन्द्रियपञ्चकजनितः षड्विधः ।

धरणं = निश्चितस्यैवाऽविच्युतस्मृतिवासनाऽऽत्मकं धारणा । साऽपि प्राग्वत्षड्विधा ।

उक्तप्रकारेणाऽर्थाऽवग्रहाऽऽदीनां चतुर्णां प्रत्येकं षड्विधत्वाद् व्यञ्जनाऽवग्रहभेदचतुष्टयेन सह श्रुतनिश्रितं मतिज्ञानमष्टाविंशतिभेदं भवति । अश्रुतनिश्रितेन त्वौत्पत्तिक्यादिबुद्धिचतुष्टयेन सह द्वात्रिंशद्भेदं भवति ।

**अथवा**ऽष्टाविंशतिरपि श्रुतनिश्रिता बह्वादिद्वादशभेदैर्गुणिता षट्त्रिंशदधिकशतत्रयविधाऽवग्रहाऽऽदीनां भवति । बह्वादिद्वादशभेदाश्चेमाः- बह्व-ऽबहु-बहुविधा-ऽबहुविध-क्षिप्रा-ऽक्षिप्रा-ऽनिश्रित-निश्रिता-ऽसन्दिग्ध-सन्दिग्ध-ध्रुवा-ऽध्रुवरूपाः **यदुक्तं श्रीतत्त्वार्थसूत्रे-** "[१]बहु-[२]बहुविध-[३]क्षिप्रा-[४]ऽनिश्रिता-[५]ऽसन्दिग्ध-[६]ध्रुवाणां सेतराणाम्" (अ. १, सू. १६/भा. १, पत्र. ८३) इति ।

एतेषां च द्वादशानां भेदानां स्वरूप एवम् - बहूनामपि श्रोतृणामविशेषेण शङ्ख-भेर्यादितूर्यशब्दसङ्घाते विषयप्राप्तेऽपि क्षयोपशमवैचित्र्यादवग्रहाऽऽदिभिः कश्चिद् बहु कश्चिदबहु इत्येवमादिकं गृह्णाति । तत्र १ बहु = एकहेलास्फालितानामपि शङ्खभेर्यादितूर्याणां पृथक्-पृथक् शब्दग्रहणम् । २ अबहु = अव्यक्ततूर्यध्वन्युपादानम् । ३ बहुविधम् = योषिदादिवाद्यमानता-मधुर-मन्दत्वाद्यनेकपर्यायियुतानां शङ्खभेर्यादिध्वनीनां पृथक् पृथग् जाननम् । ४ अबहुविधम् = एक-द्वि-पर्यायसहितानां शङ्खाऽऽदिशब्दानां ज्ञानम् । ५ क्षिप्रम् = अचिरेणाऽर्थबोधनम् । ६ अक्षिप्रम्=विमृश्य विमृश्य चिरेणाऽर्थाऽऽदानम् । ७ अनिश्रितम् = चिह्नं विनाऽप्यर्थबोधनम् । ८ निश्रितम् = लिङ्गनिश्रयाऽर्थोपादानम्, यथा पताकया देवकुलम् । ९ असंदिग्धम् = संशयरहितज्ञानम् । १० संदिग्धम् ससंशयाऽर्थविषयग्रहणम् । ११ ध्रुवम् = एकदा गृहीतं सर्वदैवाऽन्योपदेशाऽऽदिकं विनाऽवश्यं तद् ग्रहणम् १२ अध्रुवम् = कदाचिदेव ग्रहणम्, न तु सर्वदा ।

**यदुक्तं विशेषाऽऽवश्यकभाष्ये –**

"जं बहु-बहुविह-खिप्पा-ऽनिस्सिय-निच्छिय-धुवे-यर[१]विभत्ता । पुणरुग्गहादओ तो, तं [२]छत्तीसं तिसयभेयं ॥३०७॥<br>
णाणासद्दसमूहं , बहुं पिहं मुणइ भिन्नजाईयं । बहुविहमणेगभेयं , इक्किक्कं निद्धमहुराइं ॥३०८॥<br>
खिप्पमचिरेण तं चिय, सरूवओ जं अणिस्सियमलिंगं । निच्छियमसंसयं जं, धुवमच्चंतं न [३]य कयाई ॥३०९॥" इति ।

अश्रुतनिश्रितबुद्धिचतुष्टयेन सह चत्वारिंशदधिकानि त्रीणि शतानि मतिज्ञानस्य भेदाः स्युः ।

[१]"विभिन्ना" इत्यपि **पाठः** । [२]"छत्तीसत्तिसयभेयं ॥३०७॥" इत्यपि **पाठः** । ३ "उ" इत्यपि **पाठः** ।

**यद्वा** द्रव्य-क्षेत्र-काल-भावभेदेन मतिज्ञानं चतुष्प्रकारं भवति । **यदुक्तं नन्दिसूत्रे** – (सू.३७।पत्र.१८३-२) "तं समासओ चउव्विहं पन्नत्तं, तं जहा-दव्वओ खित्तओ कालओ भावओ" इत्यादि ।

तं = मतिज्ञानमाभिनिबोधिकज्ञानं वाऽऽवृणोति यत्तत्कर्म मतिज्ञानावरणमाभिनिबोधिकज्ञानावरणं वा । **यद्वा** आवृणोति "रम्यादिभ्यः कर्त्तरि" (सिद्धहेम०-५-३-१२६) इत्यनेन कर्तरि, आव्रियते वाऽनेनेति करणेऽनटि प्रत्यये आवरणम्, मतिज्ञानस्याऽऽवरणं मतिज्ञानावरणम्, आभिनिबोधिकज्ञानस्य वाऽऽवरणमाभिनिबोधिकज्ञानाऽऽवरणम् ।

श्रुतज्ञानावरणक्षयोपशमाद्यन्तरङ्ग-बहिरङ्गकारणकूटोपस्थितौ यत् श्रूयते स्म, तच्छ्रुतम्, शब्दो हि भावश्रुतस्य हेतुत्वात् "कारणे कार्योपचारः" इति **न्याय**मवलम्ब्य "घृतमायु" रितिवत् श्रुतमुच्यते; तस्य ज्ञानं श्रुतज्ञानम् । **यद्वा** श्रूयतेऽनेनास्मादस्मिन् वेति श्रुतं = तदावरणकर्मक्षयोपशम इत्यर्थः । **यद्वा** आत्मैव श्रुतोपयोगपरिणामाऽनन्यत्वात् शृणोतीति श्रुतम् । **यदुक्तं श्रीनन्दिसूत्रचूर्णौ** - तच्छृणोति तेण वा सुणेति तम्हा वा सुणेति तम्हि वा सुणेतीति सुतं आत्मैव वा श्रुतोपयोगपरिणामाऽनन्यत्वात् शृणोतीति श्रुतम् ।" (सू. १/पत्र. २०-२) इति । **यद्वा** श्रवणं श्रुतम्, अभिलापप्लाविताऽर्थग्रहणहेतुरुपलब्धिविशेषः, एवमाकारं वस्तु घटशब्दाऽभिलाप्यं जलधारणाऽऽद्यर्थमित्यादिरूपतया प्रधानीकृतत्रिकालसाधारणसमानपरिणामः शब्दाऽर्थपर्यालोचनाऽनुसारी इन्द्रियमनोनिमित्तोऽवगमविशेष इत्यर्थः, श्रुतं च तज्ज्ञानं च श्रुतज्ञानम् । **यद्वा** मत्या गृहीतपदार्थेषु यज्ज्ञानं जायते, तच्छ्रुतज्ञानम्, यथा धूमदर्शनाद् वह्निज्ञानं जायते । **यद्वा** शब्दाद् यज्ज्ञानं जायते, तच्छ्रुतज्ञानम् ।

तच्च श्रुतज्ञानं सप्रतिपक्षा-[१]ऽक्षर-[२]संज्ञि-[३]सम्यक्-[४]सादि-[५]सपर्यवसित-[६]गमिका-[७]ऽङ्गप्रविष्टभेदाच्चतुर्दशविधम् । **यदुक्तं विशेषावश्यकभाष्ये** –

"[१]अक्खर [२]सण्णी [३]सम्मं, [४]साईयं खलु [५]सपज्जवसियं च । [६]गमियं [७]अंगपविट्ठं, सत्त वि एए सपडिवक्खा॥४५४॥" इति ।

**तथाहि** - (१) अक्षरश्रुतम्, (२) अनक्षरश्रुतम्, (३) संज्ञिश्रुतम्, (४) असंज्ञिश्रुतम्, (५) सम्यक्श्रुतम्, (६) असम्यक्(मिथ्या)श्रुतम्, (७) सादिश्रुतम्, (८) अनादिश्रुतम्, (९) सपर्यवसितश्रुतम्, (१०) अपर्यवसितश्रुतम्, (११) गमिकश्रुतम्, (१२) अगमिकश्रुतम्, (१३) अङ्गप्रविष्टश्रुतम् (१४) अङ्गबाह्यश्रुतम् ।

तत्राऽक्षरं त्रिविधम्, संज्ञा-व्यञ्जन-लब्धिभेदात् । संज्ञाऽक्षरं हंसलिप्यादि, व्यञ्जनाऽक्षरमकाराऽऽदि हकारपर्यन्तम्; लब्ध्यक्षरं पुनः शब्दश्रवण-रूपदर्शनाऽऽदेरर्थप्रत्ययायनगर्भाऽक्षरोपलब्धिः । ततोऽक्षरैरभिलाप्यभावानां प्रतिपादनप्रधानं श्रुतमक्षरश्रुतम् (१) अनक्षरश्रुतम् क्ष्वेदितशिरःकम्पनाऽऽदिनिमित्तं मामाकारयति वारयति वेत्यादिकरूपमभिप्रायज्ञानम् (२) । संज्ञिश्रुतम्, तत्र संज्ञानं संज्ञा "उपसर्गादातः" (सिद्धहेम०-५-३-११०) इत्यनेन भावे स्त्रियामङ्प्रत्ययः सा च संज्ञा त्रिविधा दीर्घकालाऽऽदिभेदात् । **तद्यथा-** [१] दीर्घकालिकी = आयतभूतभविष्यत्कालसम्बन्धिचिन्तनरूपा, समनस्कजीवानाम्, [२] हेतुवादोपदेशिकी = प्रायेण साम्प्रतकालभाविनी स्वशरीरपालनाऽर्थमिष्टा-ऽनिष्टविषयप्रवर्तन-निवर्तनरूपा द्वीन्द्रियाऽऽदिजीवानाम्, [३] दृष्टिवादोपदेशिकी = दृष्टिवादोपदेशजक्षायोपशमिकज्ञानरूपा सम्यग्दृष्टीनाम् । सा एषामस्ति ते संज्ञिनः क्रमशः समनस्का द्वीन्द्रियाऽऽदयः सम्यग्दृष्टयश्च सन्ति, तेषां श्रुतम्, संज्ञिश्रुतम्, (३) । तदितरदसंज्ञिश्रुतम् (४) । सम्यग्दृष्टेरर्हत्प्रणीतं मिथ्यादृष्टिप्रणीतं वा यथास्वरूपमवगमात्सम्यक्श्रुतम् (५) । मिथ्यादृष्टेः पुनरर्हत्प्रणीतमितरद्वा यथास्वरूपमनवगमाद् मिथ्याश्रुतम् (६) । द्रव्यत एकं जीवमाश्रित्य क्षेत्रतः पञ्चभरतपञ्चैरावतक्षेत्रान्प्रतीत्य, कालत उत्सर्पिण्यवसर्पिण्यौ समाश्रित्य भावतस्तु जिनप्रज्ञप्तभावानां यदाऽऽख्यान-प्रज्ञापनाऽऽदिकमस्ति, तदा तानधिकृत्य

**यद्वा** भवसिद्धिकमवलम्ब्य सादिश्रुतम् (७) । द्रव्याऽऽदितस्तद्वैपरीत्येनाऽनादिश्रुतम्, **तद्यथा-**द्रव्यतो नानाजीवान्, क्षेत्रतो महाविदेहविजयक्षेत्रान्, कालतो महाविदेहसत्कनोत्सर्पिण्यवसर्पिणीं, भावतः क्षायोपशमिकभावं वाऽभवसिद्धिकं वा प्रतीत्याऽनादिश्रुतम् (८) एवमेव द्रव्याऽऽदिभेदतः सपर्यवसितश्रुतम् (९) अपर्यवसितश्रुतम् । (१०) । गमाः = सदृशपाठास्ते विद्यन्ते यत्र तद्गमिकम्, "अतोऽनेकस्वरात्" (सिद्धहेम०-७-२-६) इति मत्वर्थीय इकप्रत्ययः, तत्प्रायो दृष्टिवादगतम् (११) । अगमिकम् असदृशाऽक्षराऽऽलापकम्, तत् प्रायः कालिकश्रुतगतम् (१२) अङ्गप्रविष्टश्रुतं द्वादशाऽङ्गीरूपम् (१३) अङ्गबाह्यश्रुतम् आवश्यक-दशवैकालिकाऽऽदि (१४) । इति संक्षेपतोऽक्षरश्रुताऽऽदिचतुर्दशविधता श्रुतज्ञानस्य भणिता । विस्तरतः साक्षेपपरिहारव्युत्पत्त्यादिना पुन**र्विशेषाऽऽवश्यकभाष्यादौ** विद्यते, ततो विस्ताराऽर्थिना ततो ज्ञेयम् । ग्रन्थगौरवभिया नाऽधिकं पुनरिह प्रतन्यते ।

श्रुतज्ञानं पुनर्विंशतिप्रकारकं पर्यायाऽऽदिभेदादस्ति, **तच्चैवम्-** (१) पर्यायः = एको ज्ञानांशः । (२) पर्यायसमासः = अनेके ज्ञानांशाः । **इदमुक्तं भवति-** लब्ध्यपर्याप्तस्य सूक्ष्मनिगोदजीवस्य यत्सर्वजघन्यं श्रुतमात्रं ततोऽन्यस्मिन् कस्मिञ्चिज्जीवे य एकः श्रुतज्ञानांशोऽविभागपलिच्छेदरूपो वर्धते स पर्यायः । ये तु द्व्यादयः श्रुतज्ञानाऽविभागपलिच्छेदा नानाजीवेषु वृद्धा उपलभ्यन्ते ते समुदिताः पर्यायसमासः । ३ अक्षरम् = अकाराऽऽदिलब्ध्यक्षराणामन्यतरद् । ४ अक्षरसमासः = द्व्याद्यक्षरसमुदायः । ५ पदम् = एकपदम् । ६ पदसमासः = द्व्यादिपदसमुदायः यद्यपि "अर्थपरिसमाप्तिः पदम्" इत्यादि**वचन**सत्त्वेऽप्याचाराऽङ्गाऽऽदय आगमग्रन्था येन केनचित्पदेनाऽष्टादशसहस्रादिपदप्रमाणा उच्यन्ते तदेव पदमिह गृह्यते, तस्यैव द्वादशाऽङ्गश्रुतपरिमाणेऽधिकारात्, श्रुतभेदानामेव चेह प्रस्तुतत्वात् । तस्य च पदस्य प्रमाणं पुनर्न ज्ञायते, तथाविधाऽऽम्नायाऽभावात् । ७ सङ्घातः = गत्यादिकस्यैकदेशभूतनरकगत्यादिषु या जीवाऽऽदिमार्गणा क्रियते सः । ८ सङ्घातसमासो द्व्यादिगत्याद्यवयवमार्गणा । ९ प्रतिपत्तिः गत्यादिद्वाराणामन्यतरैकपरिपूर्णगत्यादिद्वारेण जीवाऽऽदिमार्गणा । १० प्रतिपत्तिसमासस्तु = द्वारद्वयाऽऽदिमार्गणा । ११ अनुयोगद्वारम्, "संतपयपरूवणया, दव्वपमाणं च" (आवश्यकनिर्युक्तिगाथा-१३) इत्याद्यनुयोगद्वाराणामन्यतरदेकम् । १२ अनुयोगद्वारसमासः = तद्द्व्यादिसमुदायः । १३ प्राभृतप्राभृतम् = प्राभृताऽन्तर्वर्ती अधिकारविशेषः । १४ प्राभृतप्राभृतसमासः = तद्द्व्यादिसमुदायः । १५ प्राभृतम् = वस्त्वन्तर्वर्त्यधिकारविशेषः । १६ प्राभृतसमासस्तु = तद्द्व्यादिसमुदायः । १७ वस्तु = पूर्वाऽन्तर्वर्त्यधिकारविशेषः । १८ वस्तुसमासः पुनः तद्द्व्यादिसंयोगः । १९ पूर्वमुत्पादपूर्वाद्यन्यतरदेकम् । २० पूर्वसमासः तद्द्व्यादिसंयोगः । एते च पर्यायाऽऽदयः श्रुतभेदा यथोत्तरं तीव्रतीव्रतराऽऽदिक्षयोपशमलभ्यत्वादित्थं निर्दिष्टा इति ज्ञेयम् । इति संक्षेपतः श्रुतज्ञानस्य विंशतिर्भेदा उक्ताः, विस्तरतस्त्वन्यत्रोह्याः ।

**अथवा** श्रुतज्ञानं द्रव्य-क्षेत्र-काल-भावभेदाच्चतुर्विधं समस्ति ।

श्रुतज्ञानमावृणोतीति श्रुतज्ञानस्याऽऽवरणमिति वा श्रुतज्ञानाऽऽवरणम् ।

अवधानमवधिः, इन्द्रियाऽऽदिनिरपेक्षमात्मनः साक्षादर्थग्रहणमित्यर्थः । अवोपसर्गपूर्वकस्य धाधातोः "उपसर्गाद् दः किः" (सिद्धहेम०-५-३-८७) इत्यनेन भावे कित् इप्रत्ययः यथा अधःक्षेपणम् = अवक्षेपणमिति । **यद्वा** अवशब्दोऽधःशब्दाऽर्थे, अव=अधोऽधो विस्तृतं वस्तु धीयते = परिच्छिद्यतेऽनेनेत्यवधिः, **यद्वा** अवधिः मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा, तदुपलक्षितं ज्ञानमप्यवधिः, **यद्वा** अवधीयतेऽनेनाऽस्मादस्मिन् वेत्यवधिः = तदावरणक्षयोपशमः, अवधिश्चाऽसौ ज्ञानञ्चाऽवधिज्ञानम्, **यद्वा** अधोगौरवधर्मत्वात्पुद्गलः अवाङ् इत्युच्यते, तं दधाति =

परिच्छिनत्ति इत्यवधिः, अवधिरेव ज्ञानमवधिज्ञानम्; **यद्वा** अवधिः = मर्यादा एतावत्क्षेत्रं पश्यन्, एतावन्ति द्रव्याणि एतावन्तं कालं पश्यतीति परस्परनियमितक्षेत्राऽऽदिलक्षणा प्रागुक्तरूपा, अवधिना सह वर्तमानं ज्ञानमित्यवधिज्ञानम्, तृतीयासमासः । न चाऽनया व्युत्पत्त्याऽवधिज्ञानं मूर्तस्यैव वस्तुनः परिच्छेदकम्, ततश्चाऽमूर्तानामतीता-ऽनागत-वर्तमानपुद्गलपर्यायाणां परिच्छेदकं **न स्यादिति वाच्यम्,** द्रव्य-पर्याययोर्भेदा-ऽभेदस्वीकारेण मूर्तपुद्गलद्रव्यपर्यायाणां मूर्तत्वलाभात् ।

तच्चाऽवधिज्ञानं षोढा, आनुगाम्यादिभेदात् । **तद्यथा-** (१) आनुगामि = लोचनवद्देशान्तरं गच्छन्तमपि ज्ञानिनमनुगच्छति । (२) अनानुगामि = शृङ्खलाबद्धप्रदीप इव देशान्तरं गच्छन्तं ज्ञानिनं नाऽनुगच्छति । तद्देशनिबन्धनक्षयोपशमजत्वात्तद्देशस्थस्यैव भवति, देशान्तरगतस्य त्वपैतीति भावः । (३) वर्धमानकं = बहु-बहुतरेन्धनप्रक्षेपादभिवर्धमानाऽग्निज्वालाकलाप इव पूर्वाऽवस्थातो यथायोगं प्रशस्त-प्रशस्ततराऽध्यवसायतो वर्धमानम् । (४) हीयमानकं = पूर्वाऽवस्थातोऽधोऽधो ह्रासमुपयाति । (५) प्रतिपाति = प्रतिपतनशीलम् । (६) अप्रतिपाति = एकस्याऽप्यलोकाकाशप्रदेशस्य द्रष्टुं शक्तस्य नैवाऽपगच्छति । **ननु** हीयमानक-प्रतिपातिनोः पुनः को भेद **इति चेत्** ?, **उच्यते** - हीयमानकं पूर्वाऽवस्थातोऽधोऽधो ह्रासमुपगच्छदभिधीयते, यत्पुनः प्रदीप इवैकहेलया निर्मूलमपयाति तत्प्रतिपाति भवतीत्यनयोः प्रतिविशेषः ।

**अथवा**ऽवधिज्ञानं भवप्रत्यय-क्षायोपशमिकभेदेन द्विविधं ज्ञेयम् । तत्र भवप्रत्ययं देव-नारकाणाम्, क्षयोपशमनिमित्तं मनुष्य-तिरश्चाम् । तत्र प्रागुक्तषड्विकल्पो मनुष्य-तिरश्चां प्राप्यते । **यदुक्तं श्रीप्रज्ञापनासूत्रे-**

''दुविहा ओही पन्नत्ता, **तं जहा**-भवपच्चइया य खओवसमिया य, दोण्हं भवपच्चइया **तं जहा**-देवाण य, नेरइयाण य दोण्ह खओवसमिया; **तं जहा**-मणुसाणं पंचिंदियतिरिक्खजोणियाण य । '' (प. ३३, सू. ३१७ / भा. २, पत्र. ५३६-२) इति । **तत्त्वार्थसूत्रेऽपि -**

''द्विविधोऽवधिः ॥१-२१॥ तत्र भवप्रत्ययो नारकदेवानाम् ॥१-२२॥ यथोक्तनिमित्तः षड्विकल्पः शेषाणाम् ॥१-२३॥'' इति।

**नन्व**वधिज्ञानं क्षायोपशमिके भावे वर्त्तते, नारकाऽऽदिभवस्तु औदयिके तत्कथं नारकाऽऽदीनामवधिज्ञानं भवप्रत्ययमिति व्यपदिश्यते ? **इति चेत्, उच्यते**-नैष दोषः, यतस्तदपि परमार्थतः क्षायोपशमिकमेव, केवलं स क्षयोपशमो नारक-देवभवेष्ववश्यंभावी पक्षिणां गगनगमनलब्धिरिव ततो भवप्रत्ययमिति व्यपदिश्यते ।

**उक्तञ्च नन्दिचूर्णौ -** ''**ननु** ओही खओवसमिओ चेव नारगाऽऽदिभवो से उदइए भावे तओ कहं भवपच्चइओ भण्णइ?, **उच्यते**,- सोऽवि खओवसमिओ चेव, किंतु सो खओवसमो देव-नारगभवेसु अवस्सं भवइ, को दिट्ठंतो ? पक्खीणं आगासगमणं व, तओ भवपच्चइओ भण्णइ'' (सू. ६/ पत्र. २५-१) इति ।

**तथा श्रीतत्त्वार्थभाष्यवृत्तावपि-** ''**ननु** च क्षयोपशमनिमित्ततां ज्ञाना-ऽज्ञानाऽऽदिसूत्रे कथयिष्यति, भवाऽवधेः कथमौदयिको भवोऽस्य निमित्त**मिति**?, **उच्यते**- तस्मिन्नेव क्षयोपशमलब्धेरवश्यंभावादित्युक्तं किं विस्मार्यते भवता ?,....... पक्षिणां मयूर-शुक-सारिकादीनां यथा आकाशगमनशक्तिः प्रादुर्भवति शिक्षाम् अन्योपदेशरूपां तपश्च अनशनाऽऽदिरूपमन्तरेण तद्वन्नारक-देवानां शिक्षा तपश्चाऽन्तरेण तदवधिज्ञानं प्रादुरस्तीति ।'' (अ.१, सू. २२/भा. १, पत्र. ९६) इति ।

**यद्वा**ऽवधिज्ञानमनन्तद्रव्यभावविषयत्वात्तत्तारतम्यविवक्षयाऽनन्तभेदम्, असङ्ख्यक्षेत्रकालविषयत्वात्तु तत्तारतम्यविवक्षयाऽसङ्ख्येयभेदम् । **यद्वा** द्रव्य-क्षेत्र—काल-भावभेदाच्चतुर्विधमवधिज्ञानम् । अत्र बहु वक्तव्यं किन्तु ग्रन्थगहनताऽऽदिप्रसङ्गान्नोक्तम्, **तत्तु विशेषाऽऽवश्यकभाष्य-नन्दीसूत्र-तत्त्वार्थभाष्यवृत्त्यादिषु द्रष्टव्यम् ।** तस्याऽऽवरणम् = अवधिज्ञानाऽऽवरणम् ।

अयनम् आय:, अयिधातो: घञ्प्रत्यय:, अवनम् अव:, गत्यर्थाऽव्धातो: "तुदादि-विष-गृहिभ्य: कित्" (उणादिसूत्र. ५) इत्यनेनौणादिक: किद् अप्रत्यय:, अयनम् अय:, इधातो: "युवर्ण ........" (सिद्धहेम०-५-३-२८) इत्यनेनाऽल्प्रत्यय:, परि: = सर्वतो भावे आयो वाऽवो वाऽयो वा = गमनं = वेदनं पर्याय: पर्यव: पर्ययो वा, मनसि मनसो वा पर्याय: पर्यव: पर्ययो वा मन:पर्यायो मन:पर्यवो मन:पर्ययो वा = सर्वतो मन:परिच्छेद इत्यर्थ: स चाऽसौ ज्ञानं मन:-पर्यायज्ञानं मन:पर्यवज्ञानं मन:पर्ययज्ञानं वा । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

"पज्जवणं पज्जयणं, पज्जाओ वा मणम्मि मणसो वा । तस्स व पज्जायादि-न्नाणं मणपज्जवं नाणं ॥८३॥" इति ।

**यद्वा** संज्ञिजीवै: काययोगेनाऽऽत्तानि मन:प्रायोग्यवर्गणाद्रव्याणि मनोयोगेन मनस्त्वेन परिणतानि मनांस्युच्यन्ते तेषां तेषु वा पर्याया: = चिन्तनाऽनुगता: परिणामा इति मन:पर्याया: = परगता ज्ञेयविषयाऽध्यवसायविशेषा:, तेषु तेषां वा ज्ञानं मन:पर्यायज्ञानम् ।

**यद्वा** आत्माभिर्वस्तुचिन्तने व्यापारितानि मनांसि पर्येति = अवगच्छतीति मन:पर्यायम् "कर्मणोऽण्" (सिद्धहेम०-५-१-७२) इत्यनेन सूत्रेण अण्प्रत्यय:, मन:पर्यायं च तज्ज्ञानं च मन:पर्यायज्ञानम् **यद्वा** परकीयमनसि गतोऽर्थो मन इत्युच्यते "मञ्चा आक्रोशन्ति" इतिवत्तत्स्थानमपि तच्छब्देन व्यवहारात्, मनस: पर्याया: = विशेषा मन:पर्याया:, तान् जानाति परिच्छिनत्तीति मन:पर्यायज्ञानम् । **न च** सामान्यं विना विशेषस्य सम्भवो नाऽस्ति, अतो मन:पर्यायज्ञानं विशेषपरिच्छेदकत्वेन कथं घटामञ्चति ? इत्**याशङ्कनीयम्**, सामान्यग्रहणस्य सामर्थ्यलभ्यत्वात् **यद्वा** मनसि ग्राह्ये मनसो वा ग्राह्यस्य सम्बन्धी परि = समन्ताद् आय: = लाभ: प्राप्तिर्वाऽनर्थान्तरं स चाऽसौ ज्ञानम्, मन:पर्यायज्ञानम् अर्धतृतीयद्वीपसमुद्राऽन्तर्वर्तिसंज्ञिमनोगतद्रव्यग्राहीत्यर्थ: ।

तच्च मन:पर्यायज्ञानं मन:पर्यवज्ञानं मन:पर्ययज्ञानं वा द्विविधं भवति, ऋजुमति-विपुलमतिभेदात् । **तद्यथा-** १. ऋजुमति: = सामान्यग्राहिणी मति:, घटोऽनेन चिन्तित इत्यध्यवसायनिबन्धना मनोद्रव्यपरिच्छित्तिरित्यर्थ: ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये –**

"रिउ सामन्नं तम्मत्तगाहिणी रिउमई मणोनाणं । पायं विसेसविमुहं, घडमित्तं चिंतितं मुणइ ॥७८४॥" इति ।

२. विपुलमति: = विशेषग्राहिणी मति:, घटोऽनेन चिन्तित:, स च सौवर्ण:, पाटलिपुत्रकोऽद्यतनो महानित्याद्यध्यवसायहेतुभृता मनोद्रव्यविज्ञप्तिरिति भावाऽर्थ: ।

**यद्वा** द्रव्य-श्रेत्र-काल-भावभेदान्मन:पर्यायज्ञानं चतुर्धा भवति । मन:पर्यायज्ञानस्य विस्तरतो विवरणं पुन**र्देवेन्द्रसूरिविरचितप्रथमनव्यकर्मग्रन्थस्वोपज्ञवृत्ति-विशेषाऽऽवश्यकभाष्य-तट्टीकाऽऽदिग्रन्थेषु** विलोकनीयम्, ग्रन्थगौरवभिया पुनरत्र न प्रतन्यते ।

तस्याऽऽवरणं मन:पर्यायज्ञानाऽऽवरणं मन:पर्यवज्ञानाऽऽवरणं मन:पर्ययज्ञानाऽऽवरणं वा ।

केवलम् = एकमन्यज्ञाननिरपेक्षं वा, मत्यादिज्ञानचतुष्करहितत्वात्, इन्द्रियाऽऽदिसत्कसाहाय्याऽनपेक्षाच्च ।

**ननु** मत्यादीनि ज्ञानानि स्वस्वाऽऽवरणस्य देशतोऽपगमेऽपि प्रादुर्भवन्ति, ततो नि:शेषत: स्व-स्वाऽऽवरणस्य क्षये सुतरां भवेयुश्चारित्रपरिणामवत्, तत्कथं तेषां तदानीमभावो भण्यत **इति चेद्, उच्यते-** यथा सहस्रभानोरतिसमुन्नतघनाघनघनपटलाऽन्तरितस्याऽपान्तरालाऽवस्थितकटकुट्याद्यावरणविवरप्रविष्ट: प्रकाशो घटपटाऽऽदीनर्थान् प्रकाशयति, तथा केवलज्ञानाऽऽवृतस्य केवलज्ञानस्याऽपान्तरालमतिज्ञानावरणाऽऽदिक्षयोपशमरूपसूक्ष्मविवरविनिर्गत: प्रकाशो जीवाऽऽदीन् पदार्थान् प्रकाशयति, स च तथा प्रकाशयन् मतिज्ञानमित्यादिलक्षणं तत्तत्क्षयोपशमाऽनुरूपमभिधानमुद्वहति, ततो यथा सकलघनपटलकटकुट्याद्यावरणाऽपगमे स तथाविध: प्रकाश: सहस्रभानोरस्पष्टरूपो न भवति, किन्तु सर्वाऽऽत्मना स्फुटरूपोऽन्य एव, तथेहाऽपि सकलकेवलज्ञानावरणमतिज्ञानाऽऽद्यावरणविलये न तथाविधो मतिज्ञानाऽऽदिसंज्ञित: केवलज्ञानस्य प्रकाशो भवति, किन्तु सर्वाऽऽत्मना यथाऽवस्थितं वस्तु परिच्छिन्दन् परिस्फुटरूपोऽन्य एव भवति । **यदुक्तम्** –

''कटविवराऽऽगयकिरणा, मेहंतरियस्स जह दिणेसस्स । ते कडमेहाऽवगमे, न हुंति जह तह इमाइं पि ।'' इति ।

**अन्ये पुनराहु:-** मतिज्ञानाऽऽदीन्यपि सयोगिकेवल्यादौ सन्त्येव, किन्तु फलाऽभावान्नैव विवक्ष्यन्ते, यथा रव्युदये नक्षत्राऽऽदीनि । **उक्तञ्च** –

''अन्ने आभिणिबोहिय-णाणाऽऽईणि वि जिणस्स विज्जंति । अफलाणि य सूरुदए, जहेव नक्खत्तमाईणि ॥'' इति ।

**यद्वा** केवलं = शुद्धं तदावरणमलकलङ्कपङ्कस्य सर्वथाऽपगमात् । **यद्वा** केवलं = सकलं समस्ततदावरणक्षये प्रथमतयैव नि:शेषतस्तदुत्पत्ते: । **यद्वा** केवलम् = असाधारणम् अनन्यसदृशत्वात् । **यद्वा** केवलम् = अनन्तं ज्ञेयस्याऽऽनन्त्यादपर्यवसिताऽनन्तकालाऽवस्थायित्वाद्वा । **यद्वा** केवलं = निर्व्याघातं लोकेऽलोके वा क्वाऽपि व्याघाताऽभावात् । केवलं च तज्ज्ञानं च केवलज्ञानं = समस्तयथावस्थितभूतभवद्भाविभावभासि ज्ञानम् । अत्राऽपि मतिज्ञानाऽऽदिवद् बहु वक्तव्यं समस्ति, तथाऽपि ग्रन्थगौरवाऽऽदिप्रसङ्गादिह मतिज्ञानाऽऽदिवद् न वितन्यते, तदर्थिना तु **विशेषाऽऽवश्यकभाष्य-टीकाऽऽदिग्रन्था** द्रष्टव्या: । केवलज्ञानस्याऽऽवरणं केवलज्ञानाऽऽवरणम् ।

**नन्वेवं** ज्ञानाऽऽवरणाऽऽदीनां क्रमोपन्यसनं किं सकारणं निष्कारणं वा? **इति चेद्,अत्रोच्यते**-इत्थं क्रमोपन्यसनं सकारणम्, **तद्यथा** - इह तावत्प्रथमतो मति-श्रुतज्ञानेऽभिधातव्ये' अन्योन्यमनयो: स्वामि-काल-कारण-विषय-परोक्षत्वसाधर्म्यान्मतिश्रुतयो: प्राक् सद्भावे सत्येवाऽवध्यादिलाभाच्च । **तथाहि**-य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्याऽपि य एव श्रुतज्ञानस्य स्वामी स एव मतिज्ञानस्याऽपि । **यदुक्तं श्रीनन्दिसूत्रे** - ''जत्थ आभिणिबोहियनाणं तत्थ सुयनाणं जत्थ सुयनाणं तत्थाऽभिणिबोहियनाणं'' (सू.२४/पत्र. १४०-१) इति । एवमनयो: स्वामित्वसाधर्म्यम् ।

तथा यावानेव मतिज्ञानस्य कालस्तावानेव श्रुतज्ञानस्याऽपि, तत्र प्रवाहाऽपेक्षयाऽतीता-ऽनागत-वर्तमानरूप: सर्वकाल:, अप्रतिपतितैकजीवाऽपेक्षया सातिरेकाणि षट्षष्टिसागरोपमाणि ।

**उक्तञ्च भाष्यकृता** - (नन्दीसूत्रहारिभद्रवृत्तौ सू.१/पत्र. २२-२)

''दो वारे विजयादिसु, गयस्स तिण्णच्चुए अहव ताइं । अइरेगं नरभवियं, णाणाजीवाण सव्वद्धं ॥१॥'' इति ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये** -

''दो वारे विजयाइसु, गयस्स तिण्णच्चुए य छावट्ठी । नरजम्मपुव्वकोडी-पुहुत्तमुक्कोसओ अहियं ॥२७६२॥'' इति ।

मिश्रसम्यग्दृष्टेर्मति-श्रुतयोर्यदा ज्ञानत्वेन विवक्षा क्रियते तदा तु साधिके सागरोपमाणां द्वे षट्षष्टी इति कालसाधर्म्यम् । यथेन्द्रियनिमित्तं मतिज्ञानं तथा श्रुतज्ञानमपीति कारणसाधर्म्यम् । यथा मतिज्ञानं सर्वद्रव्याऽऽदिविषयमेवं श्रुतज्ञानमपीति विषयसाधर्म्यम् । यथा मतिज्ञानं परोक्षं तथा श्रुतज्ञानमपि । **यदुक्तं तत्त्वार्थसूत्रे** - "आद्ये परोक्षम्"(अ. १, सू.११/भा.१, पत्र. ७२) इति परोक्षसाधर्म्यम् । तथा मतिश्रुतज्ञानभाव एवाऽवधिज्ञानाऽऽदिसद्भावः । तेनाऽवधिज्ञानाऽऽदिभ्यः पूर्वमेव मतिश्रुतग्रहणम् ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये –**

"जं सामिकालकारण - विसयपरोक्खत्तणेहि तुल्लाइं । तब्भावे सेसाणि य, तेणाऽऽईए मइसुयाइं ॥८५॥" इति ।

**ननु** भवतामेकत्र मतिश्रुते प्रागेव चाऽवध्यादिभ्यः, परमेतयोरेव मतिश्रुतयोर्मध्ये पूर्वं मतिः पश्चात् श्रुतमित्येतत्कथम् ? **इति चेद्, उच्यते**- श्रुतज्ञानस्य मतिपूर्वकत्वाद् विशिष्टमतिभेदरूपत्वाद्वा मतेः प्रागुपन्यासः । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

"मइपुव्वं जेण सुयं, तेणाऽऽईए मई विसिट्ठो वा । मइभेओ चेव सुयं, तो मइसमणंतरं भणियं ॥८६॥" इति ।

**तथा नन्दिचूर्णावपि –** "तेसु वि य 'मइपुव्वतं सुतं ति पुव्वं मतिणाणं कतं तस्स य पिट्ठतो सुतं" ति । **अहवा** इंदियाऽणिंदियनिमित्तत्तणमविसिट्ठे वि मइसुतेसु परोवदेसत्तणमेत्तभेदातो अरिहंतवयणकारणतणओ य मतिविसेसणत्तणतो य सुत्तस्स मतिअणंतरं सुतं ति ।" (सू. १/ पत्र. २१-१) इति । **तथा तत्त्वार्थसूत्रेऽपि –** "श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् ॥१-२०॥" इति ।

**नन्वे**ते मतिश्रुते सम्यक्त्वोत्पादकाले युगपदुत्पत्तिमासादयतः, अन्यथा मतिज्ञानभावेऽपि श्रुताज्ञानभावप्रसङ्गः, स चाऽनिष्टः, तथा मिथ्यात्वप्रतिपत्तौ युगपदेव चाऽज्ञानरूपतया परिणमतः ततः कथं मतिपूर्वं श्रुतमुदीर्यते ? ।

**यदुक्तं विशेषाऽऽवश्यकभाष्ये -**

"णाणऽण्णाणाणि य, समकालाइं जओ मइसुयाइं । तो न सुयं मइपुव्वं, मइनाणे वा सुयऽण्णाणं ॥१०७॥"इति ।

अन्यच्च मतिश्रुतयोः स्वामित्वाऽऽदिभिरभेदादेकत्वमनयोर्भवतु **इति चेत्, उच्यते** - नैष दोषः, यतः सम्यक्त्वोत्पादकाले समकालं मतिश्रुते लब्धिमात्रमेवाङ्गीकृत्य भण्यते, न पुनरुपयोगम्, उपयोगस्य तथाजीवस्वाभाव्यतः क्रमेणैव सम्भवात्, उपयोगाऽपेक्षया हि श्रुतं मतिपूर्वं कथ्यते । नैव मत्युपयोगेनाऽसञ्चिन्त्य श्रुतग्रन्थाऽनुसारि विज्ञानमासाद्यते जीवैः ।

**उक्तञ्च विशेषावश्यकभाष्येऽपि -**

"इह लद्धिमइसुयाइं, समकालाइं न तूवओगो सिं । मइपुव्वं सुयमिह पुण, सुओवओगो मइप्पभवो ॥१०८॥" इति ।

यच्चैकत्वप्रसङ्गो भणितः सोऽपि न भवति, लक्षण-हेतु-फलभावाऽऽदिभिरनयोर्भेदात् । **तथाहि** - मन्यते योग्याऽर्थोऽनयेति मतिः, श्रवणं श्रुतमित्यादिलक्षणमाश्रित्य भेदः १ । तथा मतिज्ञानं श्रुतज्ञानस्य कारणं, श्रुतं तु मतिज्ञानस्य कार्यम्, यच्च यदुत्कर्षाऽपकर्षवशादुत्कर्षाऽपकर्षभाग्भवति तत्तस्य कारणं, श्रुतं तु मतिज्ञानस्य कार्यम्, यथा घटस्य मृत्पिण्डः, तथा चाऽत्र श्रुतेष्वपि बहुषु ग्रन्थेषु यद्विषयं स्मरणमीहाऽपोहादि वाऽधिकतरं प्रवर्त्तते स ग्रन्थः स्फुटतरः प्रतिभाति; **न शेष** इति हेतुफलभावाऽपेक्षया भेदः २ । तथा मतिज्ञानमष्टाविंशतिप्रमुखभेदं श्रुतज्ञानञ्च चतुर्दशाऽऽदिभेदमिति भेदभेदाद् भेदः ३ । तथा श्रुतस्य श्रोत्रेन्द्रियोपलब्धेर्मतिज्ञानस्य च शेषेन्द्रियोपलब्धेः । **यदुक्तं विशेषाऽऽवश्यकभाष्येऽपि –**

'सोइंदियोवलद्धी, होइ सुयं सेसयं तु मइनाणं । [2]मुत्तूणं दव्वसुयं, अक्खर[3]लाभो य सेसेसुं ॥११७॥"

१. "मइपुव्वय०" इत्यपि **पाठः** । २. "मोत्तूणं" इत्यपि **पाठः**, । ३. "०लंभो," इत्यपि **पाठः** ।

इतीन्द्रियविभागाद्भेदः ४ । तथा मतिज्ञानं वल्कसमं कारणत्वात्, श्रुतज्ञानं शुम्बसमानं तत्कार्यत्वादित्यनयोर्वल्क-शुम्बयोरिव कार्यकारणभावाद् भेदः ५ । तथा मतिज्ञानमनक्षरं साक्षरं च, श्रुतज्ञानं तु साक्षरमेवेति साक्षराऽनक्षरभेदाद् भेदः ६ । तथा मतिज्ञानं मूककल्पं, स्वमात्रप्रत्यायकत्वात्; श्रुतज्ञानं पुनरमूककल्पम्, स्व-परप्रत्यायकत्वादिति मूकाऽमूकभेदाद्भेदः ७।

**उक्तञ्च विशेषाऽऽवश्यकभाष्यकारैः-**

"[1]लक्खणभेया [2]हेउफलभावओ [3]भेय [4]इंदियविभागा । [5]वा [6]गक्खर [7]मूयेयर-भेआ भेओ मइसुयाणं ॥९७॥" इति।

मति-श्रुतयोरनन्तरमवधिज्ञानस्योपन्यासः कर्तव्यः, कालविपर्ययस्वामित्वलाभसाधर्म्यात् । **तथाहि** - मतिश्रुतयोः प्रवाहाऽपेक्षयैकजीवापेक्षया च यावानेव कालः तावानेवाऽवधिज्ञानस्याऽपीति कालसाधर्म्यम् ।

तथा यथा मतिश्रुतज्ञाने मिथ्यात्वे दर्शनमोहनीयोदयतो विपर्ययरूपतामासादयतः तथाऽवधिज्ञानमपि ।

**यदुक्तं प्रशमरतौ** - "आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम् ॥२२७॥" इति विपर्ययत्वसाधर्म्यम् ।

तथा य एव मतिश्रुतज्ञानयोः स्वामी स एवाऽवधिज्ञानस्येति स्वामित्वसाधर्म्यम् ।

तथा विभङ्गज्ञानिनोऽमराऽऽदेः सम्यक्त्वप्राप्तौ युगपदेव मतिश्रुताऽवधिज्ञानानां लाभसम्भव इति लाभसाधर्म्यम् ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये** – "काल-विवज्जय-सामित्त-लाभसाहम्मओऽवही ततो ।" (गा. ८७) इति ।

अवधिज्ञानाऽनन्तरञ्च मनःपर्यायज्ञानं निरूपणीयम्, छद्मस्थ-विषय-भाव-प्रत्यक्षत्वसाधर्म्यात् । **तद्यथा** - यथाऽवधिज्ञानं छद्मस्थस्य भवति तथा मनःपर्यवज्ञानमपीति छद्मस्थसाधर्म्यम् । तथा यथा "रूपिष्ववधेः" इति **वचना**ऽनुरोधादवधिज्ञानं रूपिद्रव्यविषयकं भवति तथा मनःपर्यायज्ञानमपि, तस्य मनोवर्गणान्तःपातिपुद्गलाऽऽलम्बनत्वादिति विषयसाधर्म्यम् । तथा यथाऽवधिज्ञानं प्रत्यक्षं तथा मनःपर्यायज्ञानमपीति प्रत्यक्षत्वसाधर्म्यम् ।

**यदुक्तं विशेषाऽऽवश्यकभाष्ये** - "माणसमित्तो छउमत्थ-विसय-भावाइ[1]साहम्मा ॥८७॥" इति ।

मनःपर्यायज्ञानाऽनन्तरं केवलज्ञानस्य भणनम्, सर्वोत्तमत्वात्स्वामित्व-विपर्ययाऽभावसाधर्म्यात्सर्वावसाने लाभाच्च । **तथाहि**-सर्वाण्यपि मतिज्ञानाऽऽदीनि ज्ञानानि देशतः परिच्छेदकानि केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकमिति कृत्वा केवलज्ञानं सर्वोत्तमम्, सर्वोत्तमत्वाच्च सर्वशिरःशिखरकल्पमुपन्यस्तम् । तथा यथा मनःपर्यवज्ञानं यतेरेव भवति तथा केवलज्ञानमपीति स्वामित्वसाधर्म्यम् । तथा यथा मनःपर्यवज्ञानं सविपर्ययं न भवति, तथा केवलज्ञानमपीति विपर्ययाभावसाधर्म्यम् । तथा यः सर्वाण्यपि ज्ञानान्युपार्जितुमर्हः स नियमात्सर्वज्ञानपर्यवसान एव केवलज्ञानं प्राप्नोतीति सर्वप्रान्तलाभहेतुकं च केवलज्ञानं मनःपर्यायज्ञानस्य पश्चाद्वक्तव्यम् ।

**यदुक्तं विशेषाऽऽवश्यकभाष्ये** - "अंते केवलमुत्तम-जइ-सामित्ता-ऽवसाणलाभाओ" (गा.८८) (धर्मसंग्रहगाथा-८५) इति ।

तदेवं दर्शितनीत्या मतिज्ञानाऽऽदीनामित्थमुपन्यसनं सकारणम्, तेन तदावरणान्यपि तेनैव क्रमेण वक्तव्यानि । **तथाहि**-प्रथमं मतिज्ञानावरणम्, ततः श्रुतज्ञानावरणम्, ततो ऽवधिज्ञानावरणम्, ततो मनःपर्यायज्ञानावरणम्, ततः केवलज्ञानावरणम् ।

तथा येषामावरणानि भणितानि तेषां मतिज्ञानाऽऽदिपञ्चज्ञानानां मध्ये मति-श्रुतज्ञाने परोक्षे, इन्द्रियमनोद्वारा परम्परयाऽऽत्मनो ज्ञानजनकत्वात्; शेषाऽवध्यादिज्ञानत्रयं प्रत्यक्षम् आत्मनः साक्षाद्बोधकरणात् । अत्राऽपि बहु वक्तव्यं किन्तु ग्रन्थगहनताऽऽदिभिया नोच्यते तत्तु **विशेषाऽऽवश्यकभाष्य-तत्त्वार्थाऽधिगमसूत्रवृत्ति-नन्दिसूत्रवृत्ति**प्रमुखग्रन्थेषु जिज्ञासुना द्रष्टव्यम् ।

१. सामण्णा ॥ ८७ ॥" इत्यपि **पाठः** ।

अथोपसंहरन्नाह - "**ति**" त्ति गाथायाम् इतिशब्द एवमर्थे तत एवम् = उक्तप्रकारेण "प्रथमम्' आद्यं ज्ञानाऽऽवरणं कर्म "पञ्चधा" पञ्चविधं पञ्चप्रकारं भवति । तदेवं मतिज्ञानाऽऽवरणाऽऽदिपञ्चोत्तरप्रकृतिनिष्पन्नं तु सामान्येन ज्ञानाऽऽवरणं मूलप्रकृतिः । यथाऽङ्गुलीपञ्चकनिष्पन्नो मुष्टिः, मूल-त्वक्-पत्र-शाखाऽऽदिसमुदायनिष्पन्नो वा वृक्षः, घृत-गुड-कणिक्काऽऽदिनिष्पन्नो वा मोदक इति । एवमुत्तरत्राऽपि भाव्यम् ।

एतर्हि दर्शनावरणस्य कर्मण उत्तरप्रकृतीः प्रकटयितुकाम आह- "**णयणे०**" इत्यादि, 'नयनेतराऽवधिकेवलदर्शनाऽऽवरणकम्' इतरेतरद्वन्द्वगर्भितः समासः, स्वार्थिकः कप्रत्ययः, "द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते" इति **न्यायेन** दर्शनाऽऽवरणशब्दः प्रत्येकं सम्बध्यते ततश्चाऽ**यमर्थः** - नयनदर्शनाऽऽवरणम्, इतरदर्शनाऽऽवरणम् = अनयनदर्शनाऽऽवरणमवधिदर्शनाऽऽवरणं केवलदर्शनाऽऽवरणं च । तत्र "णींग् प्रापणे" इति नीधातुः नीयते = प्राप्यते दृश्यमनेनेति नयनम् "करणाऽऽधारे" (सिद्धहेम०-५-३-१२९) इत्यनेन करणेऽनट्प्रत्ययः, नयनेन नयनाभ्यां वा दर्शनं = सामान्यग्राहिबोधरूपमिति नयनदर्शनं = रूपसामान्यग्रहणम्, तस्याऽऽवरणं नयनदर्शनावरणं = चक्षुर्दर्शनलब्धिविघातकारि चक्षुर्दर्शनाऽऽवरणमिति यावत् । इतरैः नयनवर्जैरिन्द्रियैर्मनसा च जायमानं दर्शनं = स्वस्वविषयसामान्यपरिच्छेद इति इतरदर्शनम्, तस्याऽऽवरणम् इतरदर्शनाऽऽवरणम् = अनयनदर्शनाऽऽवरणम् = अचक्षुर्दर्शनावरणमचक्षुर्दर्शनलब्धिविघातीत्यर्थः । अवधिना = रूपिद्रव्यमर्यादया दर्शनं = सामान्यार्थोपलम्भनमवधिदर्शनम्, अवधिरेव वा दर्शनमवधिदर्शनम्, तस्याऽऽवरणमवधिदर्शनावरणम् । केवलेन समस्तवस्तुतत्त्वग्रहणाऽऽत्मकेन दर्शनं = सामान्याऽर्थोपयोगलक्षणं केवलदर्शनम्, केवलमेव वा सकलजगद्भाविसमस्तवस्तुसामान्यपरिच्छेदरूपं दर्शनं केवलदर्शनम् = अशेषवस्तुसामान्यबोधाऽऽत्मकम्, तस्याऽऽवरणं केवलदर्शनावरणम्, "**णेयं**" ति 'ज्ञेयम्' दर्शनावरणस्य प्रकारचतुष्कं ज्ञातव्यम् ।

**उक्तञ्च श्रीमद्धरिभद्रसूरिपादैस्तत्त्वार्थभाष्यवृत्तौ -**

"पश्यत्यनेनाऽऽत्मेति चक्षुः सर्वमेवेन्द्रियमात्मनः सामान्यविशेषाऽवबोधस्वभावस्य करणद्वारम्, तद्द्वारकं च सामान्यमात्रोपलम्भनमात्मपरिणतिरूपं चक्षुर्दर्शनम् तल्लब्धिघाति चक्षुर्दर्शनावरणम्, शेषेन्द्रिय-मनोविषयमविशिष्टमचक्षुर्दर्शनं तल्लब्धिघाति अचक्षुर्दर्शनावरणम्, अवधावपि प्रथमसंपाते सामान्यमात्रोपलम्भनमवधिदर्शनम्, केवलदर्शनमपि सामान्योपयोगलक्षणम्, एतयोरावरणमवधिदर्शनाऽऽवरणं केवलदर्शनाऽऽवरणं च ।" (अ. ८, सू. ८/भा. २, पत्र. ३७५-३७६) इति ।

**एवं श्रीमत्सिद्धसेनगणिपादैरपि तत्त्वार्थभाष्यवृत्तावभिहितम् ।**

**ननु** यथाऽवधिदर्शनाऽऽवरणमुच्यते तथा मनःपर्यायज्ञानस्याऽपि दर्शनाऽऽवरणं कथं नोच्यते ? **इति चेद्, अभिधीयते**- मनःपर्यायज्ञानं तथाविधक्षयोपशमपाटवात् सर्वदा विशेषानेव गृह्णदुत्पद्यते, न सामान्यम्, अत एव सामान्यबोधलक्षणस्याऽनाकारोपयोगाऽऽत्मकस्य दर्शनस्याऽपि चतुर्विधत्वमेव दर्शितम्, न तु पञ्चविधत्वम् ।

**उक्तञ्च श्रीप्रज्ञापनावृत्तौ** – "अथ मनःपर्यायदर्शनमपि कस्मान्न भवति येन पञ्चमोऽनाकारोपयोगो न भवती**ति चेत् ? उच्यते**, - मनःपर्यायविषयं हि ज्ञानं मनसः पर्यायानेव विविक्तान् गृह्णदुपजायते पर्यायाश्च विशेषा, विशेषाऽऽलम्बनं च ज्ञानं ज्ञानमेव न दर्शनमिति मनःपर्यायदर्शनाभावस्तदभावाच्च पञ्चमाऽनाकारोपयोगाऽसम्भव इति ।" (प. २९, सू. ३१२/भा. २, पत्र. ५२७-२) इति ।

तेन तद्दर्शनाऽभावात्तदावरणाऽभावः, तदावरणाऽभावात्तदावरणं कर्माऽपि न भवति ।

अथाऽवशिष्टान् दर्शनाऽऽवरणस्य पञ्च भेदान् वक्तुकाम आह – "**निद्दा**" इत्यादि, 'निद्रा' "द्रांक् कुत्सितगतौ" नि = नियतं द्राति = अविस्पष्टतया कुत्सितत्वं गच्छति चैतन्यं यस्यां स्वापाऽवस्थायां सा निद्रा "भिदादयः" (सिद्धहेम०-५-३-१०८) इत्यनेनाऽधिकरणे स्त्रियामङ्प्रत्ययः नखच्छोटिकामात्रेण प्रबोधयोग्या स्वापाऽवस्था सुखबोधिकस्वापाऽवस्था निद्रेति यावत् । कारणे कार्योपचारात् तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रेत्यभिधीयते । तथा 'निद्रानिद्रा' निद्रातोऽतिशायिनी निद्रा निद्रानिद्रा । "मयूरव्यंसकेत्यादयः" (सिद्धहेम०-३-१-११६) । इत्यनेन मध्यमपदलोपी समासः, तस्यां हि चैतन्यस्याऽत्यन्तमस्फुटीभूतत्वाद् बहुभिर्घोलनाप्रकारैः प्रबोधो भवति, अत एव सुखप्रतिबोधरूपनिद्राऽपेक्षयाऽस्या अतिशायिनीत्वम्, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रानिद्रा, उपचारात् । "**पयला**" त्ति 'प्रचला' प्रचलति विघूर्णत उपविष्ट ऊर्ध्वस्थितो वा प्राणी यस्यां स्वापाऽवस्थायां सा प्रचला, तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचला । "**पयलपयला**" त्ति "दीर्घ-ह्रस्वौ मिथो वृत्तौ" (सिद्धहेम०-८-१-४) इत्यनेन प्राकृतव्याकरणसूत्रेण "पयल" इत्यत्र ह्रस्वत्वम् 'प्रचलाप्रचला' प्रचलातोऽतिशायिनी प्रचला प्रचलाप्रचला, प्राग्वन्मध्यपदलोपी समासः, सा हि चङ्क्रमणाऽऽदिकमपि कुर्वतो जन्तोरुदयमधिगच्छति, ततः स्थानस्थितस्वप्तृभवप्रचलाऽपेक्षयाऽस्या अतिशायिनीत्वम्, तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचलाप्रचला । "**थीणद्धि**" त्ति 'स्त्यानगृद्धिः' स्त्याना बहुत्वेन संघातमापन्ना पिण्डीभूता गृद्धिः अभिकाङ्क्षा जाग्रदवस्थाऽध्यवसिताऽर्थसाधनविषया यस्यां स्वापाऽवस्थायां सा सत्यानगृद्धिः, "गोणादयः" (सिद्धहेम०-८-२-१७४) इत्यनेन प्राकृतसूत्रेण 'थीणद्धी' इति निपात्यते । **यद्वा** धातूनामनेकार्थत्वात् स्त्याने = स्वप्ने गृध्यति यदुदयादात्मा रौद्रं बहु च कर्म करोति सा स्त्यानगृद्धिः अस्यां हि जाग्रदवस्थाऽध्यवसितमर्थमुत्थाय साधयति, **यद्वा** स्त्यानर्द्धिशब्दो हि "थीणद्धी" पदेन गृह्यते, स्त्याना = पिण्डीभूता ऋद्धिः = आत्मशक्तिर्यस्यां स्वापाऽवस्थायां सा स्त्यानर्द्धिः, एतत्सद्भावे हि प्रथमसंहननस्य केशवाऽर्धबलसदृशी शक्तिरुपजायते । **यदुक्तम्** –

"सुत्तस्स थीणगिद्धी, उप्पज्जइ पुव्वचित्तनिप्फन्नं । जेण निवाएइ गए, किं पुण सेसे ससुत्तो उ ॥ ॥" इति ।

तथा च श्रूयते **प्रवचने**- क्वचित्प्रदेशे कोऽपि क्षुल्लको द्विरदेन दिवा स्खलीकृतः । ततस्तस्मिन् द्विरदे बद्धाऽभिनिवेशो रजन्यां स्त्यानगृद्ध्युदये स्त्यानर्द्ध्युदये वा वर्तमानः समुत्थाय तद्दन्तयुगलमुत्पाट्य स्वोपाश्रयद्वारि च प्रक्षिप्य पुनः सुप्तवान् इत्यादि । तद्विपाकवेद्या कर्मप्रकृतिरपि स्त्यानगृद्धिः स्त्यानर्द्धिर्वा भवति ।

**तथा श्रीतत्त्वार्थवृत्तौ श्रीसिद्धसेनगणिपादैरुक्तम् -**

"स्त्यानर्द्धिरिति वा पाठः तदुदयाद्धि महाबलोऽर्धचक्रवर्तितुल्यबलः प्रकर्षप्राप्तौ भवति । अन्यथा जघन्यमध्यमाऽवस्थाभाजोऽपि संहननाऽपेक्षया सम्भवत्येवेति । स्त्यानस्य ऋद्धिः स्त्यानर्द्धिरिति ।" (अ.८, सू.८/भा.२, पत्र.१३५) इति ।

**उक्तञ्च** – "सुहपडिबोहो निद्दा, दुहपडिबोहो य निद्दनिद्दा य । पयला होइ ठियस्स उ, पयलापयला य चंकमओ ॥१॥
थीणद्धी पुण अइसंकिलिट्ठकम्मस्स वेयणे होइ । महणिद्दा दिणचिंतिय- वावारपसाहणी पायं ॥२॥" इति ।

**तथाऽन्यत्राऽपि** –

"सुहपडिबोहा णिद्दा, णिद्दाणिद्दा य दुक्खपडिबोहा । पयला होइ ठियस्स वि, पयलापयला य चंकमओ ॥ ॥
थिणगिद्धी उदयाओ, महाबलो केसवऽद्धबलसरिसो । भवइ य उक्कोसेणं, दिणचिन्तियसाहगो पायं ॥ ॥" इति ।

**ननु** निद्रापञ्चकस्य दर्शनाऽऽवरणत्वं कथ**मिति चेद् ? उच्यते-** निद्रापञ्चकं प्राप्ताया दर्शनलब्धेरुपघातं करोति, चक्षुर्दर्शनाऽऽवरणाऽऽदिचतुष्कं तु मूलत एव दर्शनलब्धिमुपहन्ति, **यदुक्तं गन्धहस्तिभिः –** "निद्राऽऽदयः समधिगताया एव दर्शनलब्धेरुपघाते वर्तन्ते, दर्शनाऽऽवरणचतुष्टयं तूद्गमोच्छेदित्वात्समूलघातं हन्ति दर्शनलब्धिम्" इति । तथा च प्राप्तस्य दर्शनस्य नाशकत्वेनाऽप्राप्तस्य च प्रतिबन्धकत्वेन नवानामपि प्रकृतीनां दर्शनाऽऽवरणत्वं परिभाषितं भवति ।

**तथा शतकचूर्णिकारैरपि –** "तत्थ मूलिल्लाणि पञ्च आवरणाणि लद्धाणं दंसणलद्धीणं उवघाए वट्टंति, उवरिल्ला चत्तारि वि दंसणलद्धिमेव घायन्ति । (गा. ३९/पत्र. ५१) इति **। श्रीतत्त्वार्थसूत्र-तद्भाष्य-वृत्त्यादिषु** पुनर्निद्रावेदनीयं निद्रानिद्रावेदनीयमित्याद्युच्यते । **यदुक्तं श्रीतत्त्वार्थसूत्रे -** "चक्षु-रचक्षु-रवधि-केवलानां निद्रा-निद्रानिद्रा-प्रचला-प्रचलाप्रचला-स्त्यानर्द्धिवेदनीयानि च । (अ. ८/, सू. ८, भा.२, पत्र. १३४)" इति । **तथा चाऽत्र भाष्यम् -** "निद्रावेदनीयं, निद्रानिद्रावेदनीयं प्रचलावेदनीयं प्रचलाप्रचलावेदनीयं स्त्यानर्द्धिवेदनीयमिति दर्शनावरणं नवभेदं भवति ॥८॥" (भा.२, पत्र.१३५) इति । **तथा चाऽत्र तत्त्वार्थवृत्तिः-** "स्वापो निद्रा सुखप्रतिबोधलक्षणा । वेदनीयम् अनुभवनीयं निद्रा चासौ वेदनीयं चेति सर्वत्र समानाऽधिकरणः । दर्शनावरणोत्तरप्रकृतिप्रस्तावे वेदनीयं प्रस्तावाऽपास्तमुपन्यस्तमित्यसमीचीनमिवाऽऽभाति । यतो वेदनीयं तृतीयमूलप्रकृतिरिति । **अत्रोच्यते-** दर्शनाऽऽवरणभेदा दर्शनाऽऽवरणजातीया एव निद्राऽऽदयो यतः समधिगताया एव दर्शनलब्धेः उपयोगघाते प्रवर्तन्ते । चक्षुर्दर्शनाऽऽवरणाऽऽदिचतुष्टयं तूद्गमोच्छेदित्वान्मूलघातं निर्हन्ति दर्शनलब्धिमित्यतो दर्शनाऽऽवरणभेदाः । वेदनीयशब्दस्तु सामान्येन सकलकर्माऽनुभववचनोऽपि प्रवचने प्रसिद्धतरत्वात्तृतीयमूलप्रकृतौ व्यवह्रियते अनुभवनीयत्वं तु सर्वकर्मणां परमार्थतः समस्तीत्यतो न दोषः ॥" (भा. २, पत्र. १३४-१३५) इति ।

अथ दर्शनावरणं समापयन्नाह - **"एवं"** इत्यादि, एवं = दर्शितप्रकारेण **"नवधा"** नवप्रकारं द्वितीयं दर्शनावरणं कर्म भवति ।

साम्प्रतं वेदनीयस्योत्तरप्रकृती कथयति - **"साय०"** इत्यादि, सातमसातं च 'द्विधा' द्विप्रकारकं 'तृतीयं' वेदनीयं कर्म भवति । **एतदुक्तं भवति -** सत्शब्दः प्रशस्तवाची, प्रशस्तता चाऽऽत्मनोऽभीष्टविषयत्वम् । **यदुक्तं श्रीसिद्धसेनगणिपादैस्तत्त्वार्थवृत्तौ -** सच्छब्दः प्राशस्त्ये । प्रशंसा चात्मनोऽभिमतविषयत्वम्"(अ. ८, सू.९/ भा. २ पत्र. १३६) इति । सदेव सातम्, "प्रज्ञादिभ्योऽण्" (सिद्धहेम०-७-२-१६५) इत्यनेन स्वार्थिकोऽण्प्रत्ययः, यदुदयादारोग्यविषयोपभोगाऽऽदिजनितमाह्लादलक्षणं सातं वेद्यते तत्सातवेदनीयम्, तद्विपरीतमसातवेदनीयम् ॥४-५॥

इदानीं सार्धगाथात्रयेण मोहनीयस्योत्तरप्रकृतीरभिधातुकामः प्रक्रमते ग्रन्थकारः –

**होएज्जं मोहणीयं, दुविहं दंसण-चरित्तभेआओ ।**
**दंसणमोहो तिविहो, सम्मं मीसं च मिच्छत्तं ॥६॥**

(प्रे०) **"होएज्ज"** इत्यादि, 'मोहनीयम्' मोहयति सदसद्विवेकविकलं करोति प्राणिनमिति मोहनीयम्, "प्रवचनीयाऽऽदयः" (सिद्धहेम०-५-१-८) इत्यनेन कर्तर्यनीयप्रत्ययाऽन्तो निपातः, तच्च कतिविधमित्याह - **"दुविहं"** ति द्विविधं = द्विप्रकारं भवति, कथमित्याह 'दंसण-चरित्तभेआओ त्ति दर्शनचारित्रभेदात् । **अयमर्थः -** दर्शनमोहनीयं चारित्रमोहनीयं चेति द्विभेदं मोहनीयं कर्म भवति । तत्र दृष्टिर्दर्शनं = तत्त्वश्रद्धानम्, तन्मोहनाद् दर्शनमोहनीयम् । चर्यतेऽनेनेति चरित्रम्, "लू-धू-सू-खनि-चर-सहा-ऽर्ते" (सिद्धहेम०-५-२-८७) इत्यनेन सूत्रेण इत्रप्रत्ययः, चरित्रमेव चारित्रम्, "प्रज्ञादिभ्योऽण्" (सिद्धहेम०-७-२-१६५) इत्यनेन सूत्रेण स्वाऽर्थेऽण्प्रत्ययः, तच्च प्राणाऽतिपाताऽऽदिविरमणलक्षणम्, तन्मोहनाच्चारित्रमोहनीयम् ।

अथोद्देशाऽनुसारेण प्रथमं दर्शनमोहनीयस्योत्तरप्रकृतीः प्रदर्शयति - "**दंसणमोहो**" इत्यादि; दर्शनमोहः, दर्शनं = यथाऽवस्थितवस्तुपरिच्छेदस्तद् मोहयतीति "कर्मणोऽण्" (सिद्धहेम०-५-१-७२) इत्यण्प्रत्यये दर्शनमोहः 'त्रिविधः' त्रिप्रकारः के च त इत्याह - "**सम्मं**" इत्यादि, 'सम्यक्त्वं' सम्यक् = सत्यं तथ्यमित्येकार्थाः, तस्य भावः "भावे त्वतल्" (सि०७-१-५५) इत्यनेन त्वप्रत्यये सम्यक्त्वम् = सम्यक्त्वमोहनीयं 'मिश्रं' सम्यङ्मिथ्यात्वं सम्यङ्मिथ्यात्वमोहनीयं 'मिथ्यात्वं' मिथ्या = अलीकमतथ्यमित्याद्येकार्थाः तस्य भावः, मिथ्यात्वं = मिथ्यात्वमोहनीयं च ।

**उक्तञ्च प्राचीनप्रथमकर्मग्रन्थे –**

"दंसणमोहं तिविहं , सम्मं मीसं च तह य मिच्छत्तं । सुद्धं अद्धविसुद्धं, अविसुद्धं तं जहाकमसो ॥३६॥" इति ।

मिथ्यात्वमेकमेव बद्धं सन् जीवाऽऽत्मना विशुद्धिप्रकर्षेण शोधितं तु मदनकोद्रववत् शुद्धमर्धशुद्धमशुद्धं च भवति, तत्र शुद्धं मिथ्यात्वपुद्गलकदम्बकं सम्यक्त्वमोहनीयम्, अर्द्धविशुद्धं मिश्रमोहनीयम्, अविशुद्धं पुनर्मिथ्यात्वमोहनीयम् ।

**यदुक्तम् –**

सम्यक्त्वगुणेन ततो, विशोधयति कर्म तच्च मिथ्यात्वम् । यद्वच्छकृत्प्रभृतिभिः , शोध्यन्ते कोद्रवा मदनाः ॥१॥

यत्सर्वथाऽपि तत्र वि- शुद्धं तद् भवति कर्म सम्यक्त्वम् । मिश्रं तु दरविशुद्धं, भवत्यशुद्धं च मिथ्यात्वम् ॥२॥" इति ।

तत्र सम्यक्त्वमोहनीयोदयाज्जीवो जिनप्रणीतजीवाऽऽदितत्त्वं सम्यक् श्रद्धत्ते सम्यक्त्वमोहनीयस्य विशुद्धपुद्गलरूपत्वेन विकृत्यकरणात् । **उक्तञ्च बृहत्कर्मग्रन्थे –**

"केवलनाणुवलद्धे , जीवाऽऽइपयत्थ सद्दहे जेणं । तं सम्मत्तं कम्मं, सिवसुहसंपत्तिपरिणामं ॥३७॥" इति ।

**न च** सम्यक्त्वमोहनीयं दर्शनमोहनीयाऽजनकत्वात्कथं दर्शनमोहनीयमिति **वाच्यम्,** यतो यद्यपि सम्यक्त्वमोहनीयं तत्त्वश्रद्धानं नाऽवरुणद्धि, तथाऽपि तस्य मिथ्यात्वप्रकृतित्वेनाऽतिचारोत्पादनक्षमत्वाद्दर्शनमोहनीयमुच्यते ।

मिश्रमोहनीयोदयात्तु जीवो नालिकेरद्वीपवासिमनुष्यान्नरुचिवज्जिनप्रणीततत्त्वं न सम्यक् श्रद्धत्ते नाऽपि निन्दति, अर्थाज्जिनप्रवचनप्रीतिद्वेषविकलः संशयज्ञानवान् भवति, न तु सम्यग्निश्चयज्ञानी । **उक्तञ्च बृहच्छतकबृहच्चूर्णौ–**

"जहा नालिकेरदीववासिस्स अइछुहाइयस्स वि पुरुसस्स इत्थ ओयणाइए अणेगविहे वि ढोइए तस्स आहारस्स उवरिं न रुई न य निंदा जेण कारणेण सो ओयणाइओ आहारो कयाइ दिट्ठो नाऽवि सुओ । एवं सम्मामिच्छदिट्ठिस्स वि जीवाऽऽइयपयत्थाणं उवरिं न रुई न य निंदा ।" (**नव्यकर्म**. गा. १६ वृत्तौ/पत्र.३८/**सप्ततिका**५ गाथामलयगिरिवृत्तौ पत्र./ १७०) इति ।

**तथा प्राचीनप्रथमकर्मग्रन्थेऽपि –**

"रागं नवि जिण धम्मे, न वि दोसं जाइ जस्स उदएणं । सो मीसस्स विवागो, अंतमुहुत्तं भवे कालं ॥३८॥" इति ।

**अन्यत्राऽपि च –**

"मीसा न रागदोसो, जिणधम्मे अंतमुहु जहा अन्ने । नालिअरदीवमणुणो , मिच्छं जिणधम्मविवरीयं ॥ ॥" इति ।

तथा गुड-दधिमिश्रादिवद् वडवा-खरसंयोगोत्पन्नजात्यन्तरवद्वाऽपि मिश्रभावो ज्ञेयः ।

मिथ्यात्वमोहनीयोदयात्प्राणी मदनकोद्रवाऽऽशकवत्परवशां याति, जिनेश्वरप्रणीतजीवाऽऽदितत्त्वञ्च न श्रद्धत्ते, किन्तु विपरीतमेव श्रद्धत्ते, भ्रमज्ञानिवद्; तस्य दर्शनमपि विपरीतमेव जायते, पित्तकमलाऽक्षरोगिवत्; तस्मै सद्धर्मोऽपि न रोचते, किन्तु स जिनोक्तधर्मे प्रद्वेषं गच्छति पित्तोदये घृतवत् । **यदुक्तम्** -

"मिथ्यात्वस्य ह्युदये, जीवो विपरीतदर्शनो भवति । न च तस्मै सद्धर्मः, स्वदते पित्तोदये घृतवत् ॥ ॥" इति ।

**तथा प्राचीनकर्मविपाके** -

"जिणधम्मम्मि पओसं, वहइ य हियएण जस्स उदएण । तं मिच्छत्तं कम्मं, संकिट्ठो तस्स उ विवागो ॥३९॥" इति ।

**तथाऽन्यत्राऽपि** - (**शतक**नवमगाथाचूर्णिपत्र.२२) (तत्त्वार्थसूत्र अ. ८, सू. १०/ भा. २, पत्र. १३८)

"मिच्छत्ततिमिरपच्छाइयदिट्ठी रागदोससंजुत्ता । धम्मं जिणपन्नत्तं, भव्वा वि णरा ण रोचेन्ति ॥१॥
मिच्छादिट्ठी जीवो, उवइट्ठं पवयणं ण सद्दहइ । सद्दहइ असब्भावं, उवइट्ठं वा अणुवइट्ठं वा ॥२॥" इति ।

तच्च मिथ्यात्वं सामान्यतो विपर्यासबोधरूपमेकविधमेव, विशेषविवक्षया पुनर्द्विविधं वा त्रिविधं वा पञ्चविधं वा त्रिषष्ट्यधिकशतत्रयविधं वाऽपरिमितभेदं वा । इह सांशयिका-ऽऽभिग्रहिका-ऽनाभिग्रहिकभेदात्त्रिविधम् । **यदुक्तम्** –

"तं मिच्छत्तं जमस-द्दहणं तच्चाण जाण अत्थाण । संसइयमभिग्गहियं, अणभिग्गहियं च तं तिविहं ॥१॥" इति ।

**तथा नवपदशतके**

"तं मिच्छत्तं जमस- द्दहणं तच्चाण जाण भावाणं । संसइंगमभिग्गहियं, अणभिग्गहियं च तिविहं च ॥१॥" इति ।

एतत्त्रिविधस्य मिथ्यात्वस्य स्वरूपमनन्तरं पञ्चविधमिथ्यात्वस्वरूपे भणिष्यते । पञ्चविधं मिथ्यात्वं पुनराभिग्रहिका-ऽनाभिग्रहिका-ऽभिनिवेशिक-सांशयिका-ऽनाभोगभेदात् । **उक्तञ्च प्राचीनषडशीतौ** –

"आभिग्गहियं [1]अणभिग्गहं च तह अभिनिवेसियं चेव । संसइयमनाभोगं, मिच्छत्तं पंचहा एवं ॥७५॥" इति ।

तत्राऽभिग्रहः = परोपदेशाऽऽदिप्रभवः कदाग्रहः = इदमेव दर्शनं शोभनं नाऽन्यद् इत्येवंरूपस्तस्माद् यातमाभिग्रहिकम् । येन कुदर्शनानामन्यतमदभिगृह्णाति । तद्विपरीतमनाभिग्रहिकमज्ञानाङ्गवादीनाम् **यद्वा** ईषन्माध्यस्थ्यात्सर्वाण्यपि दर्शनानि शोभनानीत्येवंरूपा यतः प्रतिपत्तिरनभिगृहीतदर्शनविशेषाणामिति । यद्यपि आभिग्रहिकविपर्यस्तरूपतया-ऽभिनिवेशिकाऽऽदित्रयमप्यनाभिग्रहिकेऽन्तर्भवति, तदपेक्षया चाऽभिग्रहिका-ऽनाभिग्रहिकरूपं द्विभेदमेव मिथ्यात्वं भवति । तथाऽपि प्रकृतपञ्चविधत्वे पुनः "अपवादविषयं परिहृत्योत्सर्गाः प्रवर्तन्ते" इति **न्याया**दाभिनिवेशिकाऽऽदित्रयाद्भिन्नविषयमनाभिग्रहिकं ज्ञेयम् । अभिनिवेशः = अवलेपः, यद्वशीभूत एकेन वस्तुतत्त्वे प्ररूपिते मात्सर्याऽऽदिना वस्तुतत्त्वमन्यथा प्ररूपयति; उत्सूत्रं वा स्वयमेव प्ररूपितं स्वलाघवभीत्या समर्थयते, वस्तुतत्त्वमजानानो वाऽन्येन पृष्टो मा मामज्ञं ज्ञासीदयमिति यथाकथञ्चिदुत्तरयति; तस्माद् यातमाभिनिवेशिकम्, यथा गोष्ठामहिलाऽऽदीनाम् । यदर्हता जीवाऽऽदितत्त्वमभिहितं तन्न जाने किं तथैव भवेदुताऽन्यथेत्येवंभूतात् संशयाद् यातं सांशयिकम्, संशयाऽऽपन्नानां लाघव-परिवार-भक्ताऽऽदिभियाऽन्यापुच्छमाणानाम् । आभोगः = विशिष्टज्ञानम्, स न विद्यतेऽत्र तदनाभोगम्, पृथ्व्यादीनाम्; **यद्वा** शुद्धं प्ररूपयितुकामेणाऽप्यनाभोगतो यदशुद्धं परूपितम्, तदप्यनाभोगम्, अन्येषां मिथ्यात्वहेतुत्वात् ।

१ "अणभिग्गहियं" इत्यपि **पाठः** ।

**उक्तञ्च लोकप्रकाशे**–(द्र. लो.स.३, द्वा. २५/ पु. भा.१, पत्र. १८०-१८१)

''मिथ्यादृष्टिर्विपर्यस्ता , जिनोक्ताद्वस्तुतत्त्वतः । सा स्यान्मिथ्यात्विनां तच्च, मिथ्यात्वं पञ्चधा मतम् ॥६८८॥
आभिग्रहिकमाद्यं स्या- दनाभिग्राहिकं परम् । तृतीयं किल मिथ्यात्व- मुक्तमाभिनिवेशिकम् ॥६८९॥
तुर्य सांशयिकाऽऽख्यं स्या- दनाभोगिकमन्तिमम् । अभिग्रहेण निर्वृत्तं, तत्राऽऽभिग्रहिकं स्मृतम् ॥६९०॥
नानाकुदर्शनिष्वेक - मस्मात्राणी कुदर्शनम् । इदमेव शुभं नाऽन्य- दित्येवं प्रतिपद्यते ॥६९१॥
मन्यतेऽङ्गी दर्शनानि, यद्वशादखिलान्यपि । शुभानि माध्यस्थ्यहेतु- रनाभिग्रहिकं हि तत् ॥६९२॥
यतो गोष्ठामाहिलाऽऽदि- वदात्मीयकुदर्शने । भवत्यभिनिवेशस्त - त्रोक्तमाभिनिवेशिकम् ॥६९३॥
यतो जिनप्रणीतेषु, देशतः सर्वतोऽपि वा । पदार्थेषु संशयः स्या- त्तत्सांशयिकमीरितम् ॥६९४॥
अनाभोगेन निवृत्त- मनाभोगिकसंज्ञकम् । यत्स्यादेकेन्द्रियाऽऽदीनां , मिथ्यात्वं पञ्चमं तु तत् ॥६९५॥'' इति ।

**यद्वा** पञ्चविधं त्वेकान्त-वैनयिक-सांशयिक-मूढ-विपरीतभेदाज्ज्ञेयम् । **यदुक्तं शतकचतुर्दशगाथाचूर्णौ** -

''एगंतमिच्छत्तं, वेणइयमिच्छत्तं, संसइयमिच्छत्तं, मूढमिच्छतं, विवरीयमिच्छत्तमिति ।'' (पत्र. ३६) इति ।

तत्र एकान्तः अनेकधर्माऽऽत्मकस्य वस्तुन एकनयाऽध्यवसायाऽवधारणम्, **यथा**-अस्त्येव जीवः, नाऽस्त्येव जीवः, नित्यमेव, अनित्यमेवेत्यादि, स एव मिथ्यात्वम्, एकान्तमिथ्यात्वम्, समस्तनयग्रामस्यैव सम्यक्त्वात्। ऐहिका-ऽऽमुष्मिकसुखानि विनयावानेव लभते, न ज्ञान-दर्शनो-पवास-ब्रह्मचर्यप्रभृतिक्लेशवानित्यभिनिवेशो वैनयिकमिथ्यात्वम् । सम् = सर्वात्मना, अनेकस्मिन् विषयेऽनिश्चायकतया शेत इव बोधविशेषः संशयः । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये**-

''जमणेगत्थाऽऽलंबण-मपज्जुदासपरिकुंठियं चित्तं । सेय इव सव्वपयओ, तं संसयरूवमन्नाणं ॥१८३॥'' इति ।

स एव मिथ्यात्वम्, संशयमिथ्यात्वम् यथा किममी मच्चित्तस्य विभ्रमकारिणो जिनप्रवचनदर्शिता जीवाऽऽदयः पदार्थास्तथाऽन्यथा वा भवेयुरिति । **अथवा**ऽनन्तरप्रागुक्तवद्व्युत्पत्त्यादिकं बोध्यम् । मूढानाम् अतिगहननयमताऽनुसारिनित्याऽनित्याऽऽदिपर्यायालोचनासु व्याकुलितमतीनामर्थात्तत्त्वाऽतत्त्वविवेकशून्यमनस्कानां पृथ्वीकायाऽऽदीनां मिथ्यात्वम्, मूढमिथ्यात्वम् । विपरीतः = विपर्यस्तवस्तुस्वभावाऽध्यवसायः = मिथ्यात्वा-ऽज्ञान-हिंसा-ऽनृत-स्तेया-ऽब्रह्म-परिग्रहादीनां स्वभावत एव भवभ्रमणहेतुत्वेऽप्येतेभ्य एव निवृत्तिरित्यभिनिवेशवान् बोधो विपरीतमिथ्यात्वम् । **उक्तञ्च नास्तिकदर्शने** –

''सत्यं वच्मि हितं वच्मि, सारं वच्मि पुनः पुनः । अस्मिन्नसारे संसारे, सारं सारङ्गलोचना ॥ ॥
प्रियादर्शनमेवाऽस्तु , किमन्यैर्दर्शनान्तरैः । प्राप्यते यत्र निर्वाणं, सरागेणाऽपि चेतसा ॥ ॥'' इत्यादि ।

तत्र [१]जीवा-[२]ऽजीव-[३]पुण्य-[४]पापा-[५]ऽऽश्रव-[६]संवर-[७]निर्जरा-[८]बन्ध-[९]मोक्षाऽऽख्या नव पदार्थाः, नित्येनाऽनित्येन च सह क्रमात्स्व-पराभ्यां क्रमेण काले-श्वरा-ऽऽत्म-नियति-स्वभावभेदसहिताभ्यामस्तित्वेन चिन्त्यमाना अशीत्युत्तरं शतं विकल्पानाविर्भावयन्ति क्रियावादिनाम् । **तद्यथा**-अस्ति जीवः स्वतो नित्यः कालतः १, तथाऽस्ति जीवः स्वतोऽनित्यः कालतः २, इति स्वतो भङ्गद्वयम् । एवं परतोऽपि भङ्गद्वयम् । सर्वेऽपि चत्वारः कालेन लब्धाः । एवमीश्वराऽऽदिभिश्चतुर्भिरपि प्रत्येकं चत्वारो लभ्यन्ते । ततः पञ्चभिश्चतुष्कैर्विंशतिर्जाता । सा च जीवपदेन लब्धा । एवमजीवाऽऽदिभिरष्टाभिः पृथक् पृथग्विंशतिर्लभ्यत इति नव विंशतयो मीलिता अशीत्युत्तरशतं भवति । **उक्तञ्च**-

''आस्तिकमतमात्माद्या, नित्याऽनित्याऽऽत्मका नवपदार्थाः । कालस्वभावनियती-श्वराऽऽत्मकृतकाः स्व-परसंस्थाः ॥१॥'' इति ।

तथा [1]जीवा[2]ऽजीवा[3]ऽऽश्रव[4]संवर[5]निर्जरा[6]बन्ध[7]मोक्षाऽभिधाः सप्त पदार्थाः स्व-परभेदाभ्यां प्रत्येकं क्रमात्कालेश्वराऽऽत्मनियतिस्वभावयदृच्छायुताभ्यां नास्तित्वेन चिन्त्यमानाश्चतुरशीतिभेदानुत्पादयत्यक्रियावादिनाम् । **तथाहि-** नाऽस्ति जीवः स्वतः कालतः १, नाऽस्ति जीवः परतः कालत इति द्वौ । एवमीश्वराऽऽदिभिः पञ्चभिः प्रत्येकं द्वौ द्वौ लभ्यते । सर्वेऽपि द्वादश, एते च जीवाऽऽदिसप्तकेन गुणिताश्चतुरशीतिः । **यदाह –**

''कालयदृच्छानियति - स्वभावेश्वराऽऽत्मभिश्चतुरशीतिः । नास्तिकवादिगणमते , न सन्ति भावाः स्व-परसंस्थाः ॥ ॥'' इति ।

तथा जीवाऽऽदयो नवपदार्थाः सन् १, असन् २, सदसन् ३, अवक्तव्यः ४, सदवक्तव्यः ५, असदवक्तव्यः ६, सदसदवक्तव्यः ७, इत्येतैः सप्तभिः प्रकारैर्नैते ज्ञातुं शक्यन्ते । ज्ञातैर्वा किमेभिः प्रयोजनमिति बुद्ध्या व्यासितैस्त्रिषष्टि विकल्पान् जनयन्ति । यथा सन् जीव इति को वेत्ति किं वा तेन ज्ञातेन प्रयोजनमित्यादयः सप्त जीवेन लब्धाः । एवमजीवाऽऽदिभिरपि । सप्तभिः पदैः प्रत्येकं सप्त लभ्यन्त इति नव सप्तकास्त्रिषष्टिः । एतन्मध्ये चाऽमी चत्वारः क्षिप्यन्ते । यथा सती भावोत्पत्तिरिति को वेत्ति किं वा ज्ञातयेति सर्वत्र योज्यते । सदवक्तव्याऽऽदिकं तु विकल्पत्रयमुत्तरं कालं भावाऽवयवाऽपेक्षम्; अतोऽत्र न सम्भवतीति नोक्तम् । इत्थं च सप्तभङ्गी **सूत्रकृदादिवृत्त्यनु**वृत्त्या दर्शिता । **विशेषाऽऽवश्यका**दौ त्ववक्तव्य इति तृतीयेन सदसन्निति चतुर्थेन भङ्गेन सेति । **यदुक्तं विशेषावश्यके –**

''सब्भावा-ऽसब्भावो - भयप्पिओ स-परपज्जओभयओ । कुम्भा-ऽकुम्भा-ऽवत्तव्वोभयरूवाऽऽइभेओ सो ॥२२३२॥'' इति ।

**तदेवं सप्तषष्टिराज्ञानिकानां भवति । उक्तञ्च –**

''अज्ञानिकवादिमतं , नवजीवादीन् सदाऽऽदिसप्तविधान् । भावोत्पत्तिं सदसद्-द्वेधाऽवाच्यां च को वेत्ति ॥ ॥'' इति ।

तथा सुर-नृपति-यति-ज्ञाति-स्थविरा-ऽवम-मातृ-पितॄणामष्टानां स्थानानां प्रत्येकं कायेन वचसा मनसा दानेन च विनय इत्यष्टभिश्चतुष्कैर्द्वात्रिंशद्वैनयिकभेदाः । **यदुक्तम् –**

''वैनयिकमतं विनय- श्चेतोवाक्कायदानतः कार्यः । सुरनृपतियतिज्ञाति-स्थविराऽवममातृपितृषु सदा ॥ ॥'' इति ।

तदेवं सन्ति जीवाऽऽदयः पदार्था इत्याद्येवंरूपक्रियाया वदनशीलानां क्रियावादिनामशीत्युत्तरशतं विकल्पाः, तद्विपरीतशीलानामक्रियावादिनां चतुरशीतिर्विकल्पाः, अज्ञानमेव श्रेयः, कः किं यथावदवबोद्धुं क्षमः न वा किञ्चिद् ज्ञातेन प्रयोजनमित्यज्ञानस्य वदनशीलानामज्ञानवादिनां सप्तषष्टिविकल्पाः; विनय एव वैनयिकम्, वैनयिकादेव समस्तैहिकाऽऽमुष्मिकफललाभः, न पुनस्तपःप्रभृतिक्रियाऽनुष्ठानादिति वैनयिकस्य वदनशीलानां वैनयिकवादिनां द्वात्रिंशद्विकल्पाः; सर्वे मिलितास्त्रिषष्ट्यधिकशतत्रयं भवति । तावद्विधं मिथ्यात्वम् । **उक्तञ्च –**

''असियसयं किरियाणं, अकिरियवाईण जाण चुलसीई । अन्नाणि य सत्तट्ठी, वेणइयाणं च बत्तीसं ॥ ॥'' इति ।

**अथवा** नयवादमिताः परसमयाः, तावत्प्रकारमेव मिथ्यात्वम्; नयवादानाञ्चाऽपरिमितत्वान्मिथ्यात्वमप्यपरिमितभेदं भवति । **तथा चोक्तम् –** (बृहत्कल्पभाष्यगाथा ८३१ वृत्ति./भा. २, पत्र. २६५)

''जावइया, णयवाया, तावइया चेव होंति परसमया । जावइया परसमया, तावइया चेव मिच्छत्ता ॥ ॥'' इति ।

**तथा सम्मतितर्केऽपि** - (सम्मतितत्त्वसोपाने श्लो. १४४/पत्र.२८४)

''जावइया वयणवहा, तावइया चेव होंति णयवाया । जावइया नयवाया, तावइवा चेव परसमया ॥३-४७॥'' इति ।

मिथ्यात्वस्य द्वि-त्रि-पञ्चाऽऽदिविकल्पा अपि स्थूलभावेन । परमार्थतो विपर्यासरूपं मिथ्यात्वम् । तेन हि- नैतज्जिनाऽऽयतनं मया न मम पूर्वपुरिषैर्वा कारितम्, ततः किमत्र मम पूजासत्काराऽऽद्यादरविधानेन; **अथवा** एतज्जिनप्रतिमा मया मम पूर्वपुरुषैर्वा कारिता, ततोऽत्र पूजाऽऽदिकं करोमि; किं परकीयजिनबिम्बेषु ममाऽर्चाऽऽदिकरणेन; एवं तस्य न सर्वज्ञप्रत्यया प्रवृत्तिः; अन्यथा सर्वेष्वपि जिनबिम्बेष्वर्हन्नेव व्यपदिश्यते, सोऽर्हन् यदि परकीयो भवेत्तदा पत्थरलेपपित्तलाऽऽदिकमेवाऽऽत्मीयम्, न च पत्थराऽऽदिषु वन्द्यमानेषु कर्मक्षयः किन्तु तीर्थकरगुणपक्षपातेनैव; अन्यथा शङ्कराऽऽदिबिम्बेष्वपि वन्द्यमानेषु कर्मक्षयः स्यात्; **यद्वा** मत्सरेण परकारितचैत्याऽऽलये विघ्नं कुर्वतो महामिथ्यात्वम्, तस्य ग्रन्थिभेदोऽपि न सम्भाव्यते । ये पुनः पार्श्वस्थाऽऽदिकुदेशनया मोहिताः, सुविहितसाधूनां बाधाकरा भवन्ति; तेषामपि महामिथ्यात्वम् । एतस्मिन् च विपर्यासरूपे मिथ्यात्वे सति सुबहु पठन्नपि अज्ञान्येव; विपरीतमतेर्ज्ञानस्य कार्याऽसाधकत्वात् । अतिदुष्कराऽपि तपश्चरणक्रिया न मोक्षसाधिका, यतः स जीवरक्षाऽऽदि कुर्वन्नप्यविरतः कथ्यते; देशविरतेः पञ्चमगुणस्थानके सर्वविरतेः षष्ठगुणस्थानके एव सम्भवः, न पुनः प्रथमगुणस्थानकेऽपीति कृत्वा । किञ्च सूत्रोपदिष्टमेकं पदमक्षरं वाऽनङ्गीकुर्वतः शेषं सर्वमप्यङ्गीकुर्वतोऽपि मिथ्यात्वम् ।

**उक्तञ्च-**पयमक्खरं च इक्कं, पि जो ण रोचेइ सुत्तणिद्दिट्ठं । सेसं रोएन्तो वि हु, मिच्छादिट्ठी मुणेयव्वो ॥'' इति ॥६॥

सम्प्रति सार्धगाथाद्वयेन चारित्रमोहनीयस्योत्तरप्रकृतीश्चिकथयिषुरादावेकगाथामाह ग्रन्थकृत् —

### दुविहो चरित्तमोहो, सोलकसायणवणोकसायेहिं ।
### तहि कोहमाणमाया- लोहऽक्खा चउविहकसाया ॥७॥

(प्रे०) ''**दुविहो**'' इत्यादि, चारित्रमोहः = चारित्रमोहनीयम्, षोडशकषाय-नवनोकषायेभ्यः ''गम्ययपः कर्माऽऽधारे'' (सिद्धहेम०-२-२-७४) इत्यनेन गम्यमानस्य यबन्तस्य कृदन्तस्य कर्मणि पञ्चमीविभक्तित्वात्, षोडशकषाय-नवनोकषायानाश्रित्य 'द्विविधः' द्विप्रकारको भवति । तत्र षोडशकषायाः कषायमोहनीयमभिधीयते,हास्याऽऽदिनवनोकषाया नोकषायमोहनीयमुच्यते। **तत्त्वार्थ-तद्भाष्य-तद्वृत्त्यादिषु** चारित्रमोहनीयं कषायवेदनीय-नोकषायवेदनीयभेदात् द्विविधमुक्तम् । तत्र **तत्त्वार्थभाष्यम् -** ''चारित्रमोहनीयाऽऽख्यो द्विविधः । कषायवेदनीयं नोकषायवेदनीयं चेति ।'' (अ. ८, सू. १०/भा. २, पत्र. १३१) इति । अत्र निद्रावेदनीयमित्यादिप्रागुक्तवच्छब्दकृतो भेदः, अर्थतो नाऽस्ति कश्चिद् भेदः । एवं सम्यक्त्ववेदनीयमित्याद्यन्यत्राऽपि बोध्यम् । ''कष् हिंसायाम्'' कष्यन्ते बाध्यन्ते प्राणिनो दुर्गतौ संसारे वैभिरिति कषायाः ''कुलिलुलिकलिकषिभ्यः कायः'' (सि०-उणादि०-३७२) इत्यनेन करणे औणादिकः कित् आयप्रत्ययः।**अथवा** कष्यन्ते नरकाऽऽदिस्थानेषु जन्तवोऽनेनेति कषं = कर्म, तस्याऽऽयः = लाभो येभ्यस्ते कषायाः, इति बहुव्रीहिः **यद्वा** कषस्य = कर्मण आयाः = प्रापका उपादानानि वा, तल्लाभहेतुत्वादिति कषायाः षष्ठीतत्पुरुषसमासः । कषं = कर्माऽयन्ते = गच्छन्ति = प्राप्नुवन्तीति यावद् एभिरिति कषायाः । **अथवा** कष्यन्ते = हिंस्यन्ते परस्परं प्राणिनोऽस्मिन्निति, **यद्वा** कष्यन्ते = घृष्यन्ते शरीर-मानसिकदुःखलक्षैः प्राणिनोऽस्मिन्निति कषः = संसारः कषं = संसारम् अयन्ते = गच्छन्ति एभिरिति कषायाः, कषं = संसारम् अयन्ते = अन्तर्भूतण्यर्थत्वात् गमयन्ति = प्रापयन्ति ये ते कषायाः; ''कर्मणोऽण्' (सिद्धहेम०-५-१-७२) इत्यनेनाण्प्रत्ययः । कषस्य = संसारस्याऽऽयः = लाभो येभ्यस्ते कषायाः, कषस्य = संसारस्याऽऽयाः = प्रापकाः, उपादानकारणत्वादिति कषायाः; **अथवा** कषं = संसारं भवं वा आययन्ति = गमयन्ति प्रापयन्तीति कषायाः । **उक्तञ्च विशेषाऽऽवश्यके-**

''कम्मं कसं भवो वा, कसमाओ सिं जओ कसाया तो । कसमाययंति व जओ, गमयन्ति कसं कसायत्ति ॥ ॥ आओ व उवादाणं, तेण कसाया जओ कसस्साया ।...॥'' (गा.१२२८-२९) **यद्वा** (गा.२९७८-७९) इति ।

**यद्वा** कृषन्ति = विलिखन्ति कर्मक्षेत्रं सुखदु:खफलयोग्यं कुर्वन्ति, कलुषयन्ति वा जीवमिति निर्युक्तिविधिवशात् कषाया: । **उक्तञ्च–**

''सुहदुक्ख १ बहुसईयं, कम्मक्खेत्तं कसंति ते जम्हा । कलुसंति जं च जीवं, तेण कसायत्ति वुच्चंति ॥ ॥ '' इति ।

अत्र कषायस्य नाम-स्थापनाऽऽदिभिर्बहु वक्तव्यम्, किन्तु ग्रन्थगौरवभिया नोच्यते । तदर्थिना तु **विशेषाऽऽवश्यकभाष्याऽऽदिग्रन्था** अवलोकनीया: ।

ते च कषाया: क्रोध-मान-माया-लोभाऽऽख्याश्चत्वार: प्रत्येकमपि चतुर्धाऽनन्तानुबन्ध्यादिभेदात् । तेन कषाया: षोडश ।

**''तहि''** इत्यादि, 'तत्र' तस्मिन् कषायमोहनीयप्रस्तावे 'क्रोध-मान-माया-लोभाख्या' क्रोध- मान-माया-लोभसंज्ञकाश्चतुर्विधा: कषाया: । तत्र क्रोध: = अक्षान्तिस्वरूपोऽप्रीतिलक्षणो वा, मान: = अहङ्कारो जात्याद्युद्भवो गर्वो वा, माया = परवञ्चनाऽऽत्मिका परिणति: शठता वा, लोभ: = असंतोषरूपो गार्ध्यपरिणाम: तृष्णा वा । **एतदुक्तं भवति** - क्रोधनं क्रोध:, क्रुध्यति वा येन स क्रोध: । क्रुध्धातो: ''भावाऽकर्त्रो:'' (सिद्धहेम०-५-३-१८) इत्यनेन घञ्प्रत्यय: । क्रोध: क्रुधा क्रुध् कोपो रोषो रुषा रूषा रुट् द्वेषोऽक्षमाऽक्षान्ति: संज्वलन: कलहो वृद्धिर्भण्डनं चाण्डिक्यं झंझा विवादो भाम इत्यादय: क्रोधाऽभिधायका: शब्दा: । तत्र क्रुध्धातो: ''भिदादय:'' (सिद्धहेम०-५-३-१०८) इत्यनेनाऽङ्प्रत्यये क्रुधा, ''क्रुध्-संपदादिभ्य: क्विप्'' (सिद्धहेम०-५-३-११४) इत्यनेन क्विप्रत्यये च क्रुध्, द्वयोरपि क्रोधशब्दवच्छब्दाऽर्थ: कार्य: । कोपनं कोप: = पूर्वाऽवस्थातोऽन्यथा परिणाम:, प्राग्वदत्र घञ्प्रत्यय: । रोषणं रोषो रुषा रुट् वा, तत्परिणामेनाऽऽरुषितत्वादात्मन: पूर्वोक्तवत्क्रमेण घञ्- अङ्-क्विप्प्रत्यया: द्वेषणं द्वेष:, तत्परिणामस्य वचनद्वारेण प्रकाशनात् निर्देशनात्, अप्रीतिमात्रो वा; अत्राऽपि घञ्प्रत्यय: । क्षमणं क्षमा क्षान्तिर्वा क्रमेण ''षितोऽङ्'' (सिद्धहेम०-५-३-१०७) इत्यनेनाऽङ्प्रत्यय: ''स्त्रियां क्ति:'' (सिद्धहेम०-५-३-९१) इत्यनेन ''श्वादिभ्य:'' (सि०-५-३-९२) इत्यनेन वा क्तिप्रत्यय: । न क्षमा क्षान्तिर्वा, अक्षमा अक्षान्ति: परकृताऽपराधानामसहनमित्यर्थ: । सम् = सम्यग् ज्वलति स्व-परोपतापकारित्वादिति संज्वलन:, ''नन्द्यादिभ्योऽन:'' (सिद्धहेम०-५-१-५२) इत्यनेनाऽनप्रत्यय: कल्यते = क्षिप्यतेऽत्र कलह:,कृ-पृ-कटि... (सि०-उणादि०-५८९) इत्यनेनाऽहप्रत्यय:, **यद्वा** कलं = हीनबलं हन्तीति कलह:, ''क्वचित्'' (सि०५-१-१७१) इत्यनेनडप्रत्यय:, **यद्वा** कलां जहातीति कलह:, ''ङ्यापो बहुलं नाम्नि'' (सिद्धहेम०-२-४-९९) इत्यनेन पूर्वपदस्य ह्रस्वत्वम्, कलह: = महता शब्देन परस्परमसमञ्जसभाषणम्, वर्धन्ते वैराऽऽदयोऽस्या इति वृद्धि:, अपादाने क्तिप्रत्यय: । भण्डनं = दण्डाऽऽदिभिर्युद्धम्, चाण्डिक्यम् = रौद्राऽऽकारकरणम्, झंझा = तीव्रतरसंक्लेशपरिणाम: । विरुद्धो वादो विवाद: = स्पर्धा = संघर्ष:, **यद्वा** विवाद: = विप्रतिपत्तिसमुत्थवचनम्, उपचाराद् विवादोऽपि क्रोधपर्याय: भाम: क्रोधविशेष इर्ष्यालक्षण इति पर्यायनामानि । एतेषां व्याख्यानं **तत्त्वार्थभाष्यवृत्त्याद्य**नुसारेण कृतं ज्ञेयम् । **उक्तञ्च व्याख्याप्रज्ञप्तौ –**

''अह भंते [१]कोहे [२]कोवे [३]रोसे [४]दोसे [५]अखमे [६]संजलणे [७]कलहे [८]चंडिक्के [९]भण्डणे [१०]विवादे ।'' ॥ इति ।

१ ''बहुशस्यं'' इति ।

तथैव **समवायाङ्गे**ऽपि क्रोधस्य दशपर्यायवाचकाः शब्दाः । **तथा च तद्ग्रन्थः-**

''[१]कोहे [२]कोवे [३]रोसे [४]दोसे [५]अखमा [६]संजलणे [७]कलहे [८]चंडिक्के [९]भण्डणे [१०]विवाए ।'' इति । **कषायप्राभृतचूर्णावपि -** क्रोधपर्यायवाचिनो दश शब्दाः सन्ति, किन्तु चाण्डिक्य-भण्डनयोः स्थाने वृद्धिझंझे स्तः ।

**तदक्षराणि त्वेवम्–**

''कोहो य कोव-रोसो, अक्खम-संजलण-कलह-वड्ढी य । झंझा दोस-विवादो, दस कोहेयट्ठिया होंति ॥ ॥'' इति ।

**तत्त्वार्थभाष्ये पुनः-** ''क्रोधः कोपो रोषो द्वेषो भण्डनं भाम इत्यनर्थान्तरम्'' (अ. ८, सू. १०/भा. २, पत्र. १४३) इति ।

मन्यु-प्रतिघशब्दावपि क्रोधपर्यायौ । तत्र मन्यते मन्युः, ''यजिशुन्धि...'' (सि०-उणा०-८०१) इति युप्रत्ययः । प्रतिहन्यतेऽनेनेति प्रतिघः ''क्वचित्'' (सि०-५-१-१७१) इत्यनेन डप्रत्ययः, मेघाऽऽदित्वात्साधुः ।

**उपदेशमालायां** पुनः 'खारो'(क्षारः)प्रभृतिशब्दा अपि क्रोधपर्यायत्वेन पठिताः । **तथा च तद्ग्रन्थः–**

''कोहो कलहो खारो, अवरुप्परमच्छरो अणुसओ अ । चंडत्तणमणुवसमो , तामसभावो अ संतावो ॥३०२॥

निच्छोडण निब्भंछण- निराणुवत्तित्तणं असंवासो । कयनासो अ असम्मं, बंधइ धणचिक्कणं कम्मं ॥३०३॥'' इति ।

**तथा चाऽत्र रामदेवगणिकृतविवरणम् –** '' 'कोहो इति' क्रोधोऽप्रीतिमात्रं, कलहो वचनराटिः 'खारो-इति' परोपरि दुष्टाऽऽशयः परस्परं मत्सरोऽन्योन्यं मत्सरधारणं तदपि क्रोधभेदः, क्रोधात्पश्चात्तापः समुत्पद्यते, अतः क्रोधस्याऽप्यनुशय इति नाम, चण्डत्वं वक्रभृकुटित्वम्, अनुपशमः शाम्याऽभावः, तामसभावः, च पुनः संतापः एते सर्वेऽपि क्रोधस्य पर्याया इत्यर्थः ॥३०२॥ 'निच्छोडण इति' निच्छोडणशब्देन क्रोधादात्मनो मलिनीभवनम्, निर्भर्त्सनं नाम क्रोधात्परस्परतर्जनं 'निराणुवत्तित्तणं' क्रोधात्परच्छन्दाऽननुवर्तित्वं तदपि क्रोधस्य पर्यायः कथ्यते, संवसनं परिवारमध्ये वसनं संवासः तदभावोऽसंवासः क्रोधादेकाकी विचरति, अतः क्रोधस्याऽपि 'असंवास' इति नाम, कृतस्योपकारस्य नाशनं, कृतनाशकोऽपि क्रोधपर्यायः, अशाम्यं शमताभावः, एतेषु क्रोधपर्यायेषु वर्तमानो जीवो घनं निबिडं, चिक्कणमतिकटुकरसयुक्तं निकाचितं कर्म बध्नाति, अतः क्रोधस्त्याज्य एवेत्यर्थः ॥३०३॥'' इति ।

जात्यादिभिर्मत्समो नाऽस्तीति जात्यादिगुणवानहमेवेत्येवं मननम् = अवगमनं मानः, मन्यते वाऽनेनेति मानः, मन्धातोर्घञ्प्रत्ययः । एवमुत्तरत्राऽपि यथासम्भवमनुक्ते ''भावा-ऽकर्त्रोः''(सिद्धहेम०-५-३-१८) इत्यनेन घञ्प्रत्ययो ज्ञेयः ।

(१) सर्वदाऽऽत्मपूजा सत्काराद्याकाङ्क्षित्वाद् मानः, (२) मदनं मदो मद्यादिमदवदनालापदर्शनाद् ''व्यध-जप-मद्भ्यः'' (सिद्धहेम०-५-३-४७) इत्यनेनाऽल्प्रत्ययः । (३) दर्पणं दर्पो बलकृतः, (४) स्तम्भनात्स्तम्भः = अवनतेरभावादनम्रता (घञ्) (५-६-७) उत्कर्ष-प्रकर्ष-समुत्कर्षा अभिमानपर्यायत्वेन रूढाः, (८) आत्मोत्कर्षः = अहमेव जात्यादिभिरुत्कृष्टो न मत्तः परतरोऽन्योऽस्तीत्यध्यवसायः, **यद्वा** परेभ्यः सकाशाद् गुणैरात्मन उत्कृष्टाऽभिमानम् । (९) परिभवनं परिभवः = पराऽवमानः, ''भूश्यदोऽल्'' (सिद्धहेम०-५-३-२३) इत्यनेनाऽल्प्रत्ययः । (१०) उत्सेकः = ज्ञानाऽऽदिभिराधिक्य आत्मनोऽभिमानः । एते च दश मानपर्यायवाचित्वेन **कषायप्राभृतचूर्णा**वभिहिताः । **तथा च तद्ग्रन्थः-**

माणमददप्पथंभो, उक्कासपगास तह समुक्कस्सो । अत्तुक्करिसो परिभव , उस्सिद दसलक्खणो माणो ॥ ॥'' इति ।

एवमहङ्कारा-ऽभिमानाऽऽदयः शब्दा अपि मानपर्यायवाचकत्वेन ज्ञेयाः । अहङ्कृतिरहङ्कारः = अहमेव रूपसौभाग्यसम्पन्न इति अभिमननम् अभिमानः, गर्वणं गर्वः (घञ्) **यद्वा** गिरतीव परमिति ''लटिखटिखलिनलिकण्यशौसृशृकृगृदॄपृशपिश्याशालापदिहसीण्भ्यो वः'' (सि०-उणादि०-५०५) इत्यनेन गृधातोर्वप्रत्यये गर्वो जात्यादिप्रभवः, स्मयनं स्मयः परोपहसनप्रायत्वात्, पराऽपराधाऽसहनप्रायत्वादिति **तत्त्वार्थभाष्यवृत्तौ,** चित्तस्योन्नतिश्चित्तोन्नतिरित्यादि । **उक्तञ्च तत्त्वार्थभाष्ये –**

''मानः स्तम्भः गर्वः उत्सेकः अहङ्कारः दर्पः मदः स्मय इत्यनर्थान्तरम्'' । (अ.८, सू. १०-/भा.२, पत्र. १४५) इति ।

**धर्मदासगणिभिः** परपरिवादाऽऽदयोऽपि मानपर्यायवाचका दर्शिताः । **तदक्षराणि त्वेवम् -**

''माणो मयहंकारा, परपरिवाओ अ अत्तउक्करिसो । परपरिभवो वि य तहा, परस्स निंदा असूआ अ ॥३०४॥
हीला निरोवयारि- त्तणं निरवणामया अविणओ अ । परगुणपच्छायणया , जीवं पाडंति संसारे ॥३०५॥'' इति ।

**तथा चाऽस्य रामदेवगणिविहिता टीका -** '' 'माणो इति' मानोऽभिमान इति सामान्यनाम, मदो जात्याद्युत्कर्षः, अहङ्करणमहङ्कारो हुङ्कार इत्यर्थः, परेषां परिवादोऽवर्णवादः परपरिवादो माननाम कथ्यते 'अ इति' च पुनरात्मोत्कर्ष आत्मन उत्कर्षः स्वकीयोच्चत्वदर्शनं मानपर्यायः अपि चेति समुच्चये, 'तहा इति' तथा परपरिभवः, परेषां पराभवकरणं, सोऽपि मानहेतुत्वान्मान उच्यते, परस्य निन्दनं निन्दाकरणमपि मान उच्यते, असूया गुणेषु दोषाऽऽविष्करणं मानपर्यायः ॥३०४॥ 'हीला इति' हीलनाशब्देन हीलनं परेषां जात्याद्युद्घाटनं मानपर्यायः, निरुपकारित्वमुपकाररहितत्वं मानः कथ्यते, निरवमानता स्तब्धत्वमनम्रत्वमिति यावत् अविनयो गुर्वादेरभ्युत्थानाऽऽसनप्रदानाऽऽदेरकरणं सोऽपि मानपर्यायः परेषां गुणा ज्ञानाऽऽदयस्तेषां प्रच्छादनताऽऽच्छानं मानपर्यायः, एते सर्वेऽपि मानपर्यायाः सेव्यमानाः सतो जीवं प्राणिनं संसारे चतुर्गतिरूपे पातयन्ति अतः शत्रुकार्यकारित्वान्मानस्त्याज्य एवेत्यर्थः ॥३०५॥'' इति ।

मीयतेऽनया जन्तोस्तिर्यग्योन्यादिजन्मेति माया ''स्था-छा-मा.....'' (सि०-उणा०-३५७) इत्यनेन माधातोर्यप्रत्ययः, ''आत्'' (सिद्धहेम०-२-४-१८) इत्यनेन स्त्रियामाप्प्रत्ययः, **यद्वा** मानं = हिंसनं वञ्चनमिति माया, प्रणिधानं प्रणिधिः = व्रताऽपरिणतावासक्तिः । ''उपसर्गाद् दः किः'' (सिद्धहेम०-५-३-८७) इत्यनेन कित् इप्रत्ययः, बाह्यचेष्टया उपधीयते = बाह्यत इत्युपधिः = चित्तस्याऽन्यथापरिणामः, अनन्तरोक्तसूत्रेण कित् इप्रत्ययः निक्रियते = परिभूयते परोऽनयेति निकृतिः, **यद्वा** निकृष्टा कृतिरिति निकृतिः, **यद्वा** नितरां करणं निकृतिः पूर्वकृतमायाप्रच्छादनाऽर्थं मायान्तरकरणम् आदाकरणेन परवञ्चनम्, आचर्यते = अभिगम्यते भक्ष्यते वा परस्तयोपायभूतयेत्याचरणम् = वृक-मार्जार-गृहकोलिकाऽऽदीनाम्, **यद्वा** परप्रतारणाय विविधक्रियाणामाचार आचरणम्, वञ्च्यते = विप्रलभ्यते = प्रतार्यतेऽनया सा वञ्चना, दम्भनं दम्भः = वेषवचनाद्यनुमेयः,कूट्यते दह्यतेऽमुना परः परिणामान्तरेणेति कूटम्, सत्त्वग्रहणं वा कूटम्, तद्वत्परिणामः अतिसंधीयतेऽनेन पर इत्यतिसंधानम् = अतीवाऽनुप्रविश्य सन्धानमन्तरङ्गताप्रदशनं ततो विनाशः, ऋजोर्भावः आर्जवम्, तद्विपरीतम् अनार्जवं कायवाग्मनोवक्रता'' एते मायाऽऽदयो दश शब्दास्तु **तत्त्वार्थभाष्यकारे**णैकाऽर्थत्वेन दर्शिताः । **तथा च तद्ग्रन्थः-** ''माया प्रणिधिः उपधिः निकृतिः आचरणं वञ्चना दम्भः कूटम् अतिसन्धानम् अनार्जवमित्यनर्थाऽन्तरम् ।'' (अ. ८, सू. १०/भा. २, पत्र. १४६) इति । **अस्य वृत्तौ श्रीसिद्धसेनगणिभिः पूज्यपादैरनन्तरोक्तव**न्मायादीनां व्याख्यानं कृतमिति । उक्ताऽतिरिक्ता अपि शब्दा मायावाचकाः सन्ति, **तद्यथा-**सातियोगः = अविश्रम्भसम्बन्धः- सातिशयेन वा द्रव्येन निरतिशयस्य योगस्तत्प्रतिरूपकरणमित्यर्थः, ग्रहणं = परकीयं मनोज्ञाऽर्थमादाय निह्नवनम्, मनोज्ञस्याऽर्थस्य परतो मिथ्याविनयाऽऽदिभिः स्वीकाराऽभिप्रायो मनोज्ञाऽर्थमार्गणम् । कुहकम् असद्भूतमन्त्रतन्त्रोपदेशाऽऽदिभिर्लोकोपजीवनम्, गूहनं = गोपायनमन्तर्गतदुराशयस्य बहिराकारसंवरणम्, **यद्वा** गहनं परव्यामोहाय वचनजालम्, छन्नं = छद्मप्रयोगः ।

**उक्तञ्च कषायप्राभृतचूर्णौ -**

''माया य सादिजोगो, णियदी विय वंचणा अणुज्जगदा । गहणं मणुण्णमग्गण-कक्ककुहकगूहणच्छण्णो ॥ ॥'' इति ।

एवं शठस्य भाव इति शठता शाठ्यम्; कुत्सिता सृतिर्हिंसार्थमिति कुसृतिः, कम्पयत्यनेन इति कपटम्, छ्यति = छिनत्त्यनेन इति छलम्, "छोर्ङ्गादिर्वा" (सि०-उणादि०-४७१) इति साधुः, प्रतार्यते इति प्रतारणमित्यादयोऽपि शब्दा वाच्याः।

**धर्मदासगणिप्रणीतोपदेशमालायां** तु 'कुडङ्गि' प्रमुखा अपि मायापर्यायाऽभिधायकत्वेन प्रतिपादिताः। **तथाहि** –

"मायाकुडंगिपच्छन्न - पावया कूडकवडवंचणया। सव्वत्थ असब्भावो, परनिक्खेवाऽवहारो अ ॥३०६॥

छलछोमसंवइयरो , गूढाऽऽयारत्तणं मई कुटिला। वीसंभघायणं पि य, भवकोडिसएसु वि नडंति ॥३०७॥" इति।

**व्याख्यातञ्चेह रामदेवगणिभिः-** " 'माया इति' माया इति सामान्यनाम, 'कुडंगित्ति' महागहनं मायापर्यायः, प्रच्छन्नं पापकर्मणः करणं माया कथ्यते कूडशब्देन छद्म मायापर्यायः, कपटमपि कथ्यते, वञ्चनता मायया परस्परं वञ्चनम्, सर्वेषामर्थानामसद्भावोऽसत्प्ररूपणं, अन्यद्भवति कथयति चाऽन्यत्। परनिक्षेपस्य परकीयन्यासस्याऽपहरणमपलपनं परनिक्षेपाऽपहारः स्थापनिकामोष इत्यर्थः, सोऽपि मायाभेद एव ॥३०६॥ 'छलछोम इति' मायया परं छालयतीत्यतश्छलमिति नाम छोमशब्देन छद्मनाम कथ्यते, संव्यतिकरो मायया ग्रथिलत्वं करोति स्वकीयकार्यसाधनाऽर्थ, सोऽपि मायाभेदः, गूढाऽऽचारित्वं कुटिला वक्रा मतिरपि मायाभेदः, च पुनर्विश्रम्भघातनमपि विश्वासघातकरणमपि माया कथ्यते एते मायापर्याया भवकोटीनां शतानि भवकोटिशतानि तेष्वपि नडन्ति = दुःखदायिनो भवन्ति, न तु मायाजनितानि कर्माण्यभुक्तानि क्षयं यान्तीत्यर्थः ॥३०७॥" इति।

लोभनम् = अभिकाङ्क्षणं लोभः, लुभ्यते वाऽनेनेति लोभः; "भावा-ऽकर्त्रोः" (सिद्धहेम०-५-३-१८) इत्यनेन सूत्रेण घञ्प्रत्ययः। आत्मरञ्जनाद् रागः, प्राप्तेष्टवस्तुषु गार्ध्यम्, अभिरक्षणाऽऽदिकार्यं गृद्धिः एषणम् इच्छा = अभिलाषस्त्रैलोक्यविषयः, "मृगयेच्छा....." (सि०-५-३-१०१) इत्यनेन निपातः, मूर्च्छनं मूर्च्छा = प्रकर्षप्राप्ता मोहवृद्धिः, परिग्रहसंरक्षणाऽनुबन्धः, स्निह्यत्यनेनेति स्नेहः = पितृ-पुत्र-पत्न्यादिषु प्रीतिविशेषः, भविष्यत्कालोपादानविषया काङ्क्षा, अभिष्वङ्गः = बाह्याऽभ्यन्तरोपकरणविषयसुखे राग आसक्तिः, एते च **तत्त्वार्थभाष्यवृत्त्य**नुसारेण व्याख्याताः। **उक्तञ्च तत्त्वार्थभाष्ये-** लोभो रागो गार्ध्यं इच्छा मूर्च्छा स्नेहः काङ्क्षाऽभिष्वङ्ग इत्यनर्थान्तरम् ॥" (अ. ८, सू. १०/भा. २, पत्र. १४६) इति। तथा कमनं कामः इष्टदाराऽपत्याऽऽदिपरिग्रहाऽभिलाषः, जन्मान्तरसम्बन्धेन निदीयते सङ्कल्पयत इति निदानम् = परोपभोगसमृद्धिदर्शनात् संक्लिष्टस्याऽऽत्मनो जन्माऽन्तरे कथं नामैवं भोगपरिसम्पन्नता मे स्यादित्यादिरूपं सङ्कल्पनम्, छन्दनं छन्दः = मनोऽनुकूलविषयं मनःप्रणिधानम्, सूयते = अभिषिच्यते विविधविषयाऽभिलाषक्लुषसलिलपरिषेकैरिति सुतः, प्रेयश्चाऽसौ दोषश्च प्रेयोदोषः आह्लादनमात्रत्वनिबन्धनात् परिग्रहाऽभिलाषस्य प्रेयत्वे सत्यपि संसारप्रवर्धननिमित्तत्वाद् दोषोपपत्तेः इष्टवस्तुन्यनुरञ्जनम् अनुरागः, आश्यत्यनयेत्याशा = अविद्यमानस्याऽर्थस्य लिप्सा, **अथवा** मम पुत्रस्य शिष्यस्य वा इदमिदं भूयादित्यादिरूपा आशीः, "उपसर्गादातः" (सि०५-३-११०) इत्यनेन करणे स्त्रियामङ्प्रत्ययः, गृद्धिः = गार्ध्यम्। शाश्वद्भवः शाश्वतः "भवे" (सि०६-३-१२३) इति सूत्रेणाऽण्प्रत्ययः, अस्य शाश्वतता परिग्रहलाभात् प्राक् पश्चाच्चाऽस्योपलम्भेन बोध्या, प्रकर्षेणाऽर्थनं प्रार्थना = परं प्रति अभीष्टाऽर्थयाञ्चा लालसनं = आभीक्ष्ण्येन स्पृहणं लालसा, अविरमणमविरतिः, विरमणं वा विरतिः, न विद्यते विरतिः सूक्ष्मसम्परायगुणस्थानकं यावद् यस्य, सोऽविरतिः, तर्षणं तृष्णा = विषयपिपासा "मृगयेच्छा-याञ्चा-तृष्णा०...." (सिद्धहेम०-५-३-१०१) इत्यनेन निपातः, वेदनं विद्या विद्येव विद्या तदधीनत्वाल्लोभोऽपि तथा व्यवह्रियते, जिह्वेव जिह्वा असन्तोषसाधर्म्यात्तथाव्यपदेशः। **उक्तञ्च कषायप्राभृतचूर्णौ** –

"कामो रागणिदाणो, छंदो य सुदो य पेज्जदोसो य। णेहाऽणुराग आसा, इच्छा मुच्छा य गिद्धी य ॥ ॥

सासद पत्थण लालस- अविरदि तण्हा य विज्जजिब्भा य। लोभस्स णामधेज्जा, वीसं एगट्ठिया भणिया ॥ ॥ " इत्ति।

एवं लब्धुमिच्छा लिप्सा, स्पृहणं स्पृहा "भीषि भूषि" (सि०-५-३-१०९) इत्यङ्प्रत्ययः, आशंसनमाशंसा, वाञ्छनं वाञ्छा । ईहनमीहा "क्तेटो... (सि०-५-३-१०६) इत्यनेन स्त्रियामप्रत्ययः, घञि प्रत्यये तु ईह इत्यपि, मन एव रथो दूरगामि यत्र मनोरथः, मनोगवी, अभिलषणमभिलाष इत्यादयोऽन्ये शब्दा अपि लोभपर्यायवाचका बोध्याः ।

तथाऽतिसंचयशीलाऽऽदिशब्दा अपि लोभैकार्थत्वेन गृहीता दृश्यते ।

**तथा चाऽत्रोपदेशमालापाठः-**

"लोभो अइसंचयशीलया य किलिट्ठत्तणं अइममत्तं । कप्पन्नअपरिभोगो , नट्ठविणट्ठे य आगल्लं ॥३०८॥
मुत्था अइबहुधणलोभया य तब्भावभावणा य सया । बोलंति महाघोरे , जरमरणमहासमुद्दम्मि ॥३०९॥" इति ।

**व्याख्यातञ्चेदं रामदेवगणिभिः-** " 'लोभो इति' प्रथमं लोभं इति सामान्यनाम, लोभेनाऽनेकवस्तुनामेकवस्तुनो वाऽतिसंचयोऽतिसंग्रहस्तत्करणशीलत्वं लोभभेदः कथ्यते क्लिष्टत्वं लोभेन मनसः कलुषीकरणत्वं वस्तूपर्यतिममत्वं ममकारः कल्प्यं भोक्तुं योग्यं यदन्नादि वस्तु तस्याऽपरिभोगः, कृपणतया कुत्सिताऽन्नाऽऽदिभोगो लोभभेदः, नष्टेऽश्वाऽऽदिके वस्तुनि, विनष्टे धान्याऽऽदिके, आगल्लं रोगाऽऽदिभवनं, तन्नष्टविनष्टाकल्पं नाम लोभभेदः कथ्यते ॥३०८॥ 'मुत्था इति' मूर्च्छा मौढ्यं अर्थेषु तीव्रराग इति यावत् अत्यर्थं बहुषु धनेषु लोभस्तद्भावस्तत्राऽतिबहुधनलोभता लोभभेदः, तद्भावेन लोभभावेन मनसो भावश्चिन्तनं तद्भावभावना लोभभेदः, 'सया इति' सदा एते सर्वेऽपि सामान्यविशेषा लोभभेदाः संसारिणं महाघोरेऽतिभयंकरे, जरामरणान्येव प्रवाहरूपत्वान्महासमुद्रस्तस्मिन् बोलंति निमज्जयन्ति अतो दारुणत्वात्त्याज्य एव लोभः ॥३०९॥" इति ।

**ननु** क्रोधाऽऽदीनामेवं क्रमोपन्यासोऽत्र सहेतुको निर्हेतुको वा ? **इति चेत्,** सहेतुक इति ब्रुमः, **तथाहि** - सर्वाऽनुगामित्वादादौ क्रोधस्य, तदनु तत्सम्बन्धत्वान्मानस्य, लोभाऽर्थं मायोपादीयत इति ततो लोभकारणत्वान्मायायाः, ततस्तत्कार्यत्वात्सर्वदोषाऽऽश्रयात्सर्वगुरुत्वात्सर्वोपरिक्षपणक्रमाद्वा लोभस्योपादानम् ॥७॥

भणिताश्चत्वारः कषायाः । साम्प्रतमेकैकस्य चातुर्विध्यमाह —

**चउहा पत्तेगमण-अ- पच्चक्खा-णियर-संजलणभेआ ।**
**हुन्ति णवणोकसाया, हस्स-रई-अरइ-सोग-भय-कुच्छा ॥८॥** (गीतिः)

(प्रे०) "**चउहा**" इत्यादि तत्र "**पत्तेगं**" ति 'प्रत्येकम्' क्रोध-मान-माया—लोभानामेकैकः "**चउहा**" त्ति 'चतुर्धा' चतुष्प्रकारो भवति । "**अण**" त्ति पदैकदेशे पदसमुदायोपचाराद् अनशब्देनाऽनन्ताऽनुबन्धिनोऽप्रत्याख्यानशब्देनाऽप्रत्याख्यानाऽऽवरणाः । इतरशब्देन च प्रत्याख्यानाऽऽवरणा ग्राह्याः, ततश्चाऽयमर्थः- अनन्तानुबन्ध्य-प्रत्याख्यानाऽऽवरण-प्रत्याख्यानाऽऽवरण-सञ्ज्वलनभेदात् । **इदमुक्तं भवति–** क्रोधकषायश्चतुर्विधः, अनन्ताऽनुबन्धी अप्रत्याख्यानाऽऽवरणः प्रत्याख्यानाऽऽवरणः संज्वलनश्चेति, एवं मानमायालोभा अपि वक्तव्याः ।

तत्र अनन्तं = संसारं नारकाऽऽदिभवजन्मजरामरणपरम्परालक्षणमनुबध्नन्ति = प्राणिभिः संबद्धं कुर्वन्ति = अविच्छिन्नं कुर्वन्तीत्येवंशीला अनन्ताऽनुबन्धिनः । **यदुक्तम् –**

"यस्मादनन्तं संसारमनुबध्नन्ति देहिनाम् । ततोऽनन्तानुबन्धीति, संज्ञाऽऽद्येषु निवेशिता ॥ ॥" इति ।

**तथाऽन्यत्राऽपि -** अनन्तान्यनुबध्नन्ति, यतो जन्मानि भूतये । ततोऽनन्तानुबन्ध्याख्याः, x क्रोधाऽऽद्येषु नियोजिताः ॥ ॥"
(स्थानाङ्गसूत्राऽभयदेवसूरिवृत्तिपत्र. १९४-२ । स्था. ४, उ.१ सू. २४९) इति ।

x **पाठान्तरे** - *"संज्ञाऽऽद्येषु नियोजिताः ॥" इति, "क्रोधाद्याऽऽद्येषु दर्शिता ॥"* इत्यपि वा ।

अनन्ताऽनुबन्धिनः कषायाः संयोजना इति नाम्नाऽपि व्यवह्रियन्ते; तदपि नाम साऽन्वर्थम्, **तद्यथा**-संयोज्यन्ते = सम्बध्यन्तेऽसङ्ख्यैर्भवैर्जन्तवो यैस्ते संयोजनाः । करणेऽनट्प्रत्ययः **यद्वा** कर्मणा तत्फलभूतेन संसारेण वा सह संयोजयन्तीति संयोजनाः "नन्द्यादिभ्योऽनः" (सि०-५-१-५२) इत्यनेन कर्तर्यनप्रत्ययः । **उक्तञ्च**–

"संयोजयन्ति यन्नर-मनन्तसङ्ख्यैर्भवैः कषायास्ते । संयोजनताऽनन्ता-ऽनुबन्धिता वाऽप्यतस्तेषाम् ॥ ॥" इति ।

**यद्वा**ऽनन्ताः = अनन्तभवाऽऽत्मकोऽनुबन्धः = प्रवाह एषामस्तीत्यनन्ताऽनुबन्धिनः, ते च चत्वारः, अनन्ताऽनुबन्धिक्रोधोऽनन्ताऽनुबन्धिमानोऽनन्ताऽनुबन्धिमायाऽनन्ताऽनुबन्धिलोभश्चेति । यद्यप्यमीषां शेषाऽप्रत्याख्यानाऽऽवरणाऽऽदिकषायोदयरहितानामुदयो नाऽस्ति । तथाऽप्यवश्यमनन्तभवमूलकारणस्य मिथ्यात्वोदयस्याऽऽक्षेपकत्वादेतेषामेवाऽनन्ताऽनुबन्धित्वव्यपदेशः । न तूदययौगपद्ये सत्यपि शेषकषायाणाम्, यतस्ते न नियमेन मिथ्यात्वोदयमाक्षिपन्ति । तेनाऽनन्ताऽनुबन्धिकषायाणामेवाऽनन्ताऽनुबन्धिनामाऽसाधारणमस्ति ।

एते चाऽनन्ताऽनुबन्धिनः कषायाः प्रथमकषाया इत्यपि कथ्यन्ते, सर्वप्रथमोपादानात्सर्वोत्कटत्वाच्च । एवमुत्तरोत्तरोपादानाद् यथोत्तरमुत्कृष्टताया हीयमानत्वाच्च द्वितीयाऽऽदिकषाया अपि अप्रत्याख्यानाऽऽवरणाऽऽदीनां भणिताः संज्ञात्वेन ।

**यदाहाऽऽवश्यकनिर्युक्तौ** – "पढमिल्लुयाण उदए, नियमा संजोयणा कसायाणं ।" (गा. १०८) इति ।

तथा प्रतिशब्दः प्रतिषेधवाची प्रति = प्रतिषेधस्याऽऽख्यानं = प्रकाशनम् = आचार्याऽऽदिसन्निधौ भावतः 'सर्वान् प्राणिनो न हन्मि यावज्जीवम्' इत्यादिरूपमुच्चारणं = प्रत्याख्यानम् । न = ईषत् प्रत्याख्यानम् अप्रत्याख्यानम् अणुव्रताऽऽदिरूपा देशविरतिः । नञत्र "अनुदरा कन्ये" त्यादिवदीषदर्थे वर्तते । **यदुक्तम्** –

"तत्सादृश्यमभावश्च, तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च, नञर्थाः षट् प्रकीर्तिताः ॥ ॥" इति ।

अप्रत्याख्यानमावृण्वन्ति = स्थगयन्तीत्यप्रत्याख्यानावरणाः, ये स्वल्पमावृण्वन्ति प्रत्याख्यानं ते सर्वविरतिलक्षणं प्रत्याख्यानमावृण्वन्त्येवेति नाऽस्त्यत्र चित्रम् ।

**उक्तञ्च सिद्धसेनगणिभिस्तत्त्वार्थभाष्यवृत्तौ** - (अ.८, सू.१०/भा.२, पत्र. १४०)

"आवृण्वन्ति प्रत्या-ख्यानं स्वल्पमपि येन जीवस्य । तेनाऽप्रत्याख्याना-वरणास्ते निर्विशेषोक्त्या ॥१॥" इति ।

उक्तोऽल्पाऽर्थो नञ्शब्दः । अथोपमाऽर्थो वा नञ्शब्दो भण्यते, यथा अब्राह्मणः, प्रत्याख्यानाऽऽवरणवदप्रत्याख्यानाऽऽवरणाः ।

**उक्तञ्च श्रीसिद्धसेनीयतत्त्वार्थभाष्यवृत्तौ** - (अ. ८, सू. १०/भा. २, पत्र. १४०)

"प्रत्याख्यानाऽऽवरणस-दृक्त्वाद् वा तत् तथा भवति सिद्धम् । तत्त्वब्राह्मणवचने, तत्सदृशः पुरुष एवेष्टः ॥ ॥" इति ।

किमत्रौपम्यं = सादृश्यम् **इति चेत् ? उच्यते**– यथा प्रत्याख्यानाऽऽवरणा विरतिं स्थगयन्ति, तथैवाऽप्रत्याख्यानाऽऽवरणा अपि । केवलमयं विशेषः, प्रत्याख्यानाऽऽवरणैः केवला सर्वविरतिरेव स्थग्यते; अप्रत्याख्यानैः पुनर्देशविरतिरपि ।

**केचन प्राचीननव्यकर्मग्रन्थमूल-वृत्तिकारप्रभृतयस्तु** - अप्रत्याख्यानाः कषाया इति भणन्ति ।

तेषां मते नञ्शब्दः प्रसज्यप्रतिषेधाऽर्थो व्याख्येयः, न विद्यते स्वल्पमपि देश-सर्वविरतिलक्षणं प्रत्याख्यानं येषामुदयात्तेऽप्रत्याख्यानाः प्रसज्यप्रतिषेधस्य निषेधमात्रपरत्वात् । **उक्तञ्च**–

"नाऽल्पमप्युत्सहेद्येषां, प्रत्याख्यानमिहोदयात् । अप्रत्याख्यानसंज्ञाऽतो, द्वितीयेषु निवेशिता ॥ ॥" इति ।

**तथा प्राचीनकर्मग्रन्थेऽपि –**

''कोहो मानो माया, लोभो बीया अपच्चखाणा उ । एयाणुदए जीवो, विरयाविरइं न पावेइ ॥४४॥'' इति ।

ते च चत्वारः, अप्रत्याख्यानावरणः क्रोधो मानो माया लोभश्चेति एते द्वितीयकषाया इति संज्ञयाऽप्यभिधीयन्ते ।

**उक्तञ्चाऽऽवश्यकनिर्युक्तावपि –** ''बीअकसायाणुदए, अप्पच्चक्खाणनामधिज्जाणं ।'' (गा. १०९) इति ।

तथा प्रत्याख्यानं = सर्वविरतिलक्षणमावृण्वन्ति = आच्छादयन्ति ते प्रत्याख्यानावरणाः । **यदाह -**

''सर्वप्रत्याख्यानं, येनाऽऽवृण्वन्ति तदभिलषतोऽपि । तेन प्रत्याख्याना-ऽऽवरणास्ते निर्विशेषोक्त्या ॥ ॥'' (तत्त्वा. अ.१०/२-१४०) इति ।

**तथाऽन्यत्राऽपि-** (स्थानाङ्गसूत्रवृत्तिपत्र. १९४-२)

''सर्वसावद्यविरतिः, प्रत्याख्यान ▲ मिहोच्यते । तदावरणसंज्ञाऽत-स्तृतीयेषु निवेशिता ॥ ॥'' इति ।

एते च तृतीयकषाया इति नाम्नाऽपि व्यवह्रियन्ते ।

**यदुक्तमावश्यकनिर्युक्तौ -** ''तइअकसायाणुदए, पच्चक्खाणावरणनामधिज्जाणं ।'' (गा. ११०) इति ।

**ननु** किमेते कषायाः सत उताऽसतः प्रत्याख्यानस्याऽऽवरणाः ?, न तावदेकान्तेन सतः अभव्यानामपि प्रत्याख्यानसत्त्वेन विरतिमत्त्वप्रसङ्गात्, नाऽप्येकान्तेनाऽसतः, खरविषाणस्याऽपि तत्प्रसङ्गा**दिति चेत्, उच्यते**-सर्वज्ञशास्त्रस्य द्रव्यार्थिक-पर्यायार्थिकोभयनयाऽऽत्मकत्वादिह द्रव्यार्थिकनयेन सतः प्रत्याख्यानस्याऽऽवरणाः, पर्यायार्थिकनयेन पुनरसतः प्रत्याख्यानस्याऽऽवरणा इति; तथा सत्यभव्यानां द्रव्यार्थिकनयेन जीवद्रव्यरूपतया तत्सत्त्वेऽपि पर्यायार्थिकनयेन तत्परिणामजन्माऽभावान्नास्ति, संयतत्वप्रसक्तिः । अत एव यदुदयादात्मा प्रत्याख्यानपर्यायेण न परिणमति, ते प्रत्याख्यानाऽऽवरणाः, प्रत्याख्यानपरिणत्युत्पत्तिविघातकाः प्रत्याख्यानाऽऽवरणा इत्यर्थः । **उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

''नाऽसंतस्साऽऽवरणं, न सतोऽभव्वाइविरमणपसंगा । पच्चक्खाणाऽऽवरणा , तम्हा तस्संभवाऽऽवरणा ॥१२३६॥
उदए विरइपरिणई, न होइ जेसिं खयाइओ होइ । पच्चक्खाणाऽऽवरणा , त इह जहा केवलाऽऽवरणं ॥१२३७॥'' इति ।

**नन्व**प्रत्याख्यानकषाय-प्रत्याख्यानाऽऽवरणकषाययोः कः प्रतिविशेषः ? यतोऽप्रत्याख्यानशब्दे नञा प्रतिषेधात्सर्वथा प्रत्याख्यानं नाऽस्तीत्यर्थो जायते, तथा प्रत्याख्यानाऽऽवरणशब्देऽप्याऽऽवरणशब्देन निषेधात्सर्वस्य प्रत्याख्यानस्य निषेधो गम्यत **इति चेत्; अत्रोच्यते-** तत्राऽप्रत्याख्यानशब्दे नञ्शब्दः सर्वनिषेधाऽभिधायी, इह पुनः प्रत्याख्यानाऽऽवरणशब्दे पुनराङ्शब्दो मर्यादेषदर्थवाची; आ = सर्वविरतिप्रत्याख्यानमर्यादया, **अथवा** ईषत् = सावद्ययोगाऽनुमतिमात्रविरतिरूपं प्रत्याख्यानमावृण्वन्तीति प्रत्याख्यानावरणा इति व्युत्पत्तेः सर्वविरतिरूपप्रत्याख्याननिषेधाऽर्थ एवाऽऽवरणशब्दोऽत्राऽस्ति, न तु देशविरतिप्रत्याख्याननिषेधे इति ।

ते च प्रत्याख्यानाऽऽवरणाश्चत्वारः, प्रत्याख्यानाऽऽवरणः क्रोधो मानो माया लोभश्चेति ।

सम् = ईषद् ज्वलयन्ति = दीपयन्ति परीषहोपसर्गोपनिपाते सति निःशेषपापस्थानविरामभाजं चारित्रिणमपीति संज्वलनाः ''नन्द्यादिभ्योऽनः'' (सिद्धहेम०-५-१-५२) इत्यनेन कर्तर्यनप्रत्ययः ।

▲ ''मुदाहृतम्'' इत्यपि **पाठः** ।

14554

**उक्तञ्च–** "परीषहोपसर्गोप-निपाते यतिमप्यमी । समीषद् ज्वलयन्त्येव, तेन संज्वलनाः स्मृताः ।" इति ।

**यद्वा** सम् = दुःसहपरीषहाऽऽदिसंपाते ज्वलयन्ति = दीपयन्ति सर्वपापविरतं मुनिमपीति संज्वलनाः । **अथवे**न्द्रियाऽर्थसम्पाते संज्वलन्ति = दीप्यन्त इति संज्वलनाः । **यदुक्तम्** - (त. अ. ८ सू. १०वृ./भा.२, पत्र. १४२)

"संज्वलयन्ति यतिं यत्, संविग्नं सर्वपापविरतमपि । तस्मात् संज्वलना इ-त्यप्रशमकरा निरुच्यन्ते ॥१॥" इति ।

**अन्यत्राऽप्युक्तम्** - (स्थानाङ्गसूत्राभयदेवसूरिवृत्तिपत्र. १९४-२)

"शब्दादीन् विषयान् प्राप्य, संज्वलन्ति यतो मुहुः । अतः संज्वलनाऽऽह्वानं, चतुर्थनामिहोच्यते ॥ ॥" इति

**यद्वा** सम् = झटिति = सपदि ज्वलयन्ति = दुर्वचनाऽऽदिकमवाप्योदयमश्नुवन्ति शीघ्रमुपशाम्यन्ति चेति संज्वलनाः । इत्येवं संशब्दस्येहेषत्संपातझटितिरूपाऽर्थत्रयम् ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये -**

"ईसिं सयराहं वा, संपाए वा परीसहाऽऽईणं । जलणाओ संजलणा, नाऽहक्खायं तदुदयम्मि ॥१२४६॥" इति।

एते च कषायाः तूर्यकषाया इत्युच्यन्ते ।

तत्रोत्कृष्टतोऽनन्तानुबन्धिनः क्रोधाऽऽदयश्चत्वारः कषाया यावज्जीवस्थायिनो भवन्ति, अप्रत्याख्यानावरणाः कषाया वर्षं यावत्तिष्ठन्ति, प्रत्याख्यानावरणाः कषायाश्चतुर्मासस्थितिकाः सन्ति, संज्वलनाः कषायाः पाक्षिका भवन्ति ।

**उक्तञ्च नव्यप्रथमकर्मग्रन्थे -** "जा जीववरिसचउमासपक्खगा" (गा. १८/पत्र. ३५/ ४०) इति ।

**तथा च पश्चाऽऽनुपूर्व्या विशेषाऽऽवश्यकभाष्येऽपि–** "पक्खचउमासवच्छर-जावज्जीवाणुगामिणो कमसो ।" (गा. २९९२) इति ।

इदञ्च व्यवहारनयमाश्रित्य ज्ञेयम्, बाहुबलिप्रमुखाणामन्यथादर्शनात् ।

**उक्तञ्च देवेन्द्रसूरिपादैः स्वोपज्ञकर्मविपाकवृत्तौ -**

"यावज्जीवानुगा अनन्तानुबन्धिनः, वर्षगा अप्रत्याख्यानावरणाः, चतुर्मासगाः प्रत्याख्यानावरणाः,पक्षगाः संज्वलनाः । इदञ्च —

"फरुसवयणेण दिणतवं, अहिक्खिवंतो य हणइ मासतवं । वरिसतवं सवमाणो, हणइ हणंतो य सामन्नं ॥" (उपदेशमाला गाथा १३४)

इत्यादिवद् व्यवहारनयमाश्रित्योच्यते; अन्यथा बाहुबलिप्रभृतीनां पक्षाऽऽदिपरतोऽपि संज्वलनाऽऽद्यवस्थितिः श्रूयते, अन्येषां च संयताऽऽदीनामाकर्षाऽऽदिकाले प्रत्याख्यानावरणानामप्रत्याख्यानावरणानामनन्तानुबन्धिनां चाऽन्तर्मुहूर्ताऽऽदिकं कालमुदयः श्रूयत इति ।" (गा. १८/पत्र. ३५/४०) इति ।

अनन्तानुबन्धिक्रोधाऽऽदिकषायवन्तो नरकेऽप्रत्याख्यानकषायभाजस्तिर्यग्गतौ प्रत्याख्यानावरणकषाययुता मनुष्यगतौ संज्वलनकषायाऽनुगा देवलोके गच्छन्ति । **उक्तञ्च नव्यकर्मग्रन्थे –** "नरयतिरियनरअमरा" (गा. १८) इति ।

**एवं पश्चाऽऽनुपूर्व्या विशेषाऽऽवश्यकभाष्येऽपि–** "देवनरतिरियनारय-गइसाहणहेयवो नेया ॥२९९२॥" इति ।

अत्र पाठद्वयेऽप्यनन्तानुबन्ध्यादीत्यादिप्रकरणगम्यम् । इदमपि व्यवहारनयं प्रतीत्य भणितम्, अन्यथा मिथ्यादृष्ट्यादीनां देवगत्याद्युत्पत्त्यसम्भवात् ।

**गदितञ्च श्रीमद्देवेन्द्रसूरिभिः स्वोपज्ञाऽऽद्यकर्मग्रन्थटीकायाम्** - (गा. १८/पत्र. ३५/४१)

''अनन्ताऽनुबन्ध्युदये मृतो नरकगतावेव गच्छति; अप्रत्याख्यानावरणोदये मृतस्तिर्यक्षु, प्रत्याख्यानावरणोदये मृतो मनुष्येषु, संज्वलनोदये पुनर्मृतोऽमरेष्वेव गच्छति । **उक्तश्चाऽयमर्थः पश्चानुपूर्व्याऽन्यत्राऽपि-**

'पक्खचउमासवच्छर-जावज्जीवाणुगामिणो भणिया । देवनरतिरियनारय-गइसाहणहेयवो नेया ॥' (विशे.गा. २९९२) ।

इदमपि व्यवहारनयमधिकृत्योच्यते; अन्यथा हि अनन्तानुबन्ध्युदयवतामपि मिथ्यादृशां केषाञ्चिदुपरितनग्रैवेयकेषूत्पत्तिः श्रूयते, प्रत्याख्यानावरणोदयवतां देशविरतानां देवगतिः, अप्रत्याख्यानावरणोदयवतां च सम्यग्दृष्टिदेवानां मनुष्यगतिः ।'' इति ।

अनन्तानुबन्ध्य-ऽप्रत्याख्यानावरण-प्रत्याख्यानावरण-संज्वलनाः क्रोधाऽऽदिकषायाः क्रमशः सम्यक्त्व-देशविरति-सर्वविरति-यथाख्यातचारित्रविघातिनः सन्ति । **उक्तञ्च तत्त्वार्थसूत्रभाष्ये** – (अ. ८, सू. १०/भा. २, पत्र. १४२) ''अनन्तानुबन्धी सम्यग्दर्शनोपघाती, तस्योदयात् सम्यग्दर्शनं नोत्पद्यते, पूर्वोत्पन्नमपि च प्रतिपतति । अप्रत्याख्यानकषायोदयाद् विरतिर्न भवति । प्रत्याख्यानावरणकषायोदयाद् विरताऽविरतिर्भवति उत्तमचारित्रलाभस्तु न भवति । संज्वलनकषायोदयाद् यथाख्यातचारित्रलाभो न भवति ।'' इति ।

**तथा विशेषाऽऽवश्यकभाष्येऽपि** –

''पढमिल्लुआण उदए, णियमा संजोयणाकसायाणं । सम्मदंसणलंभं , भवसिद्धीया वि न लहंति ॥१२२६॥
बीअकसायाणुदए , अप्पच्चक्खाणनामधेयाणं । सम्मदंसणलंभं , विरयाविरइं न उ लहंति ॥१२३१॥
तइअकसायाणुदए , पच्चक्खाणावरणणामधेज्जाणं । देसेक्कदेसविरइं , चरित्तलंभं न उ लहंति ॥१२३४॥
मूलगुणाणं लंभं, न लहइ मूलगुणघाइणो उदए । संजलणाणं उदए, न लहइ चरणं अहक्खायं ॥१२३८॥'' इति ।

एताश्चतस्रोऽपि गाथाः **श्रीभद्रबाहुस्वामिकृताऽऽवश्यकनिर्युक्तिसत्काः** १०८ तः १११ पर्यन्ताः सन्ति ।

**तथा नव्यकर्मविपाककर्मग्रन्थेऽपि-** ''सम्माणुसव्वविरइअहक्खायचरित्तघायकरा ॥१८॥''(पत्र. ३५/४०) इति ।

**एवं प्राचीनकर्मविपाकाऽऽदिग्रन्थेष्वपि ।**

**ननु** सम्यक्त्वप्रतिबन्धकत्वेन मिथ्यात्वदर्शनमोहनीयवदनन्तानुबन्धिकषायाणामपि दर्शनमोहनीयत्वव्यपदेशः स्या**दिति चेत्, उच्यते-** अनन्तानुबन्धिनो हि सम्यग्दर्शनसहभाविक्षमाऽऽदिरूपोपशमाऽऽदिचरणलवप्रतिबन्धिनः सन्ति, **न च** दर्शितोपशमाऽऽदिभिश्चारित्री स्या**दिति वाच्यम्**, लवमात्रत्वात् । **एतदुक्तं भवति** - यथाऽल्पधनत्वान्निर्धनो न धनी, किन्तु विपुलधनसत्त्व एव धनिकः; तथैवाऽल्पोपशमाऽऽदिभिर्न चारित्री, किन्तु महाव्रताऽऽदिरूपे चारित्रे सत्येव चारित्री । **श्रीमज्जिनभद्रगणिक्षमाश्रमणैस्तु** –

''पढमिल्लुआण उदए, णियमा संजोयणाकसायाणं । सम्मदंसणलंभं, भवसिद्धीका वि न लहंति ॥१२२६॥''

इत्यनया **विशेषाऽऽवश्यकभाष्यो**क्त्या सम्यक्त्वप्रतिबन्धकताऽनन्तानुबन्धिकषायाणामुक्ता या सा तु सम्यक्त्वसहभाव्युपशमाद्यावरकतया ज्ञेया, अन्यथाऽनन्तानुबन्धिनैव सम्यक्त्वस्याऽऽवृतत्वात् किमपरेण मिथ्यात्वेन ? आवृतस्याऽप्यावरणेऽनवस्थाप्रसङ्गः । तस्माद् यथा ''केवलियणाणलंभो, नन्नत्थ खए कसायाणं ।'' इत्यत्र केवलज्ञानस्य कषायाणामनावरकत्वेऽपि कषायक्षयः केवलज्ञानकारणतयाऽभिहितः, तस्मिन्नेव तस्य भावाद्; तथाऽनन्तानुबन्धिकषायक्षयोपशम एव सम्यक्त्वलाभ उच्यते, तस्मिन् सति तद्भावात्, यतो नाऽनन्तानुबन्धिकषायेषूदितेषु मिथ्यात्वं क्षयोपशममुपयाति, तदभावाच्च न सम्यक्त्वमिति । किञ्च सास्वादनगुणस्थानक उत्कृष्टतः षडावलिका यावदनन्तानुबन्धिकषायोदयेऽपि सम्यक्त्वाऽऽस्वादनं भवत्येव, तस्मादनन्तानुबन्धिचतुष्कं न सम्यक्त्वाऽऽवारकम् । यत्तु दर्शनसप्तकमित्यादिना दर्शनमोहनीयस्य सप्तविधत्वमप्यन्यत्र श्रूयते तत्तु सम्यक्त्वसहचरितत्वेनोपशमाऽऽदिगुणेषूपचारादिति मन्य इत्यलं प्रपञ्चेन । **उक्तञ्च श्रीस्थानाङ्गसूत्रवृत्तौ श्रीमदभयदेवसूरिभिः**-

''अनन्तं भवमनुबध्नाति = अविच्छिन्नं करोतीत्येवंशीलोऽनन्तानुबन्धी, अनन्तो वाऽनुबन्धोऽस्येत्यनन्तानुबन्धी = सम्यग्दर्शनसहभाविक्षमाऽऽदिस्वरूपोपशमाऽऽदिचरणलवविबन्धी, चारित्रमोहनीयत्वात्, तस्य, न चोपशमाऽऽदिभिरेव चारित्री अल्पत्वाद्यथाऽमनस्को न संज्ञी किन्तु महता मूलगुणाऽऽदिरूपेण चारित्रेण चारित्री मनःसंज्ञया संज्ञिवत् अत एव त्रिविधं दर्शनमोहनीयं पञ्चविंशतिविधं चारित्रमोहनीयमिति, ननु **'पढमिल्लुयाण उदए नियमे'** त्यादि विरुध्यते, चारित्राऽऽवारकस्य सम्यक्त्वाऽऽवारकत्वाऽनुपपत्तेः अत एव सप्तविधं दर्शनमोहनीयमेकविंशतिविधं चारित्रमोहनीयमिति मतं सङ्गतमाभातीति अत्रोच्यते **'पढमिल्लुयाणे'** त्यादि यदुक्तं तदनन्तानुबन्धिनां न सम्यक्त्वाऽऽवारकतया किन्तु सम्यक्त्वसहभाव्युपशमाद्यावारकतया अन्यथाऽनन्तानुबन्धिभिरेव सम्यक्त्वस्याऽऽवृतत्वात् किमपरेण मिथ्यात्वेन प्रयोजनम् ?, आवृतस्याऽप्यावरणेऽनवस्थाप्रसङ्गात्, तस्माद्यथा **'केवलियनाणलंभो, नन्नत्थ खए कसायाणं '** ति इह कषायाणां केवलज्ञानस्याऽनावरकत्वेऽपि कषायक्षयः केवलज्ञानकारणतयोक्तः, तस्मिन्नेव तस्य भावाद्, एवमनन्तानुबन्धिक्षयोपशम एव सम्यक्त्वलाभ उच्यते, तस्मिन् सति तस्य भावात्; यतो नाऽनन्तानुबन्धिकषायेषूदितेषु मिथ्यात्वं क्षयोपशममुपयाति तदभावाच्च न सम्यक्त्वमिति; यच्च सप्तविधं सम्यग्दर्शनमोहनीयमिति मतान्तरं तत्सम्यक्त्वसहचरितत्वेनोपशमाऽऽदिगुणानां सम्यक्त्वोपचारादिति मन्यामह इति ।'' (स्था. ४, उद्दे. १, सू. २४९/ भा. १, पत्र. १९४) इति।

तदेवमनन्तानुबन्ध्य-प्रत्याख्यानावरण-प्रत्याख्यानावरण-संज्वलनभेदात्क्रोधश्चतुर्विधो भवति । एवं मान-माया-लोभा अपि चतुष्प्रकाराः सन्ति । तत्राऽन्तानुबन्ध्यादिचतुर्विधः क्रोधः पर्वत-भूमि-वालुका-जलराजिसदृशः, मानः शैला-ऽस्थि-दारु-तृण-तिनिशलतासमानः, माया घनवंशीमूल-मेषविषाण-गोमूत्रिका-ऽवलेखिकासमा, लोभः कृमि-कर्दम-खञ्जन-हरिद्रारागोपमः समधिगम्यः । **उक्तञ्च पश्चाऽऽनुपूर्व्या विशेषाऽऽवश्यकभाष्ये–**

''जलरेणुभूमिपव्वय - राईसरिसो चउव्विहो कोहो । तिणिसलयाकट्ठट्ठिय - सेलत्थंभोवमो माणो ॥२९९०॥
मायावलेहिगोमुत्ति - मेढसिंगघणवंसिमूलसमा । लोहो हलिद्दखंजण - कद्दमकिमिरागसामाणो ॥२९९१॥'' इति ।

एते एव द्वे गाथे १९-२० तमे **नव्यकर्मविपाककर्मग्रन्थे**ऽपि स्तः । नवरं 'भूमि' शब्दस्थाने 'पुढवि' शब्दः ।

**तथाऽऽनुपूर्व्याः पुनस्तत्त्वार्थभाष्ये –** (अ. ८, सू. १०/भा. २, पत्र. १४३-१४७)

''तस्याऽस्य क्रोधस्य तीव्र-मध्य-विमध्य-मन्दभावाऽऽश्रितानि निदर्शनानि भवन्ति । **तद्यथा-**पर्वतराजिसदृशो भूमिराजिसदृशो वालुकाराजिसदृश उदकराजिसदृश इति ।...... तस्याऽस्य मानस्य तीव्राऽऽदिभावाऽऽश्रितानि निदर्शनानि भवन्ति । **तद्यथा-**शैलस्तम्भसदृशः, अस्थिस्तम्भसदृशः, दारुस्तम्भसदृशः, तृणस्तम्भसदृश इति ।.... तस्या मायायास्तीव्राऽऽदिभावाऽऽश्रितानि निदर्शनानि भवन्ति । **तद्यथा-** वंशकुडङ्गसदृशी मेषविषाणसदृशी मेषगोमूत्रिकासदृशी निर्लेखनसदृशीति । ....तस्याऽस्य लोभस्य तीव्राऽऽदिभावाऽऽश्रितानि निदर्शनानि भवन्ति । **तद्यथा-** लाक्षारागसदृशः, कर्दमरागसदृशः, खञ्जनरागसदृशः हरिद्रारागसदृश इति ।'' इति ।

**इदमुक्तं भवति -** पर्वतः पाषाणपुञ्जः, तदेकदेशोऽप्युपचाराच्छिलाऽऽदिविभागः पर्वतः, तत्र राजिः = भिदा = रेखेति यावत् पर्वतराजिः, तया सदृशः पर्वतराजिसदृशः । यथा शिलायामुत्पन्ना राजिर्यावत् शिलारूपं तावदवतिष्ठते, न च तस्याः सन्धानं भवति, तथाऽनन्तानुबन्धी क्रोध उत्पन्नः सन् भवाऽपेक्षया यावत्तत्र भवे जीवति तावदप्यनुवर्तते, न कथमपि निवर्तयितुं शक्यः ।

यथा भूमौ राजिरुद्भूता कचवराऽऽदिभिः पूर्यमाना कष्टतमेन निधनमायाति तथाऽप्रत्याख्यानावरणक्रोधोऽपि महता कष्टेन प्रशाम्यति । यथा यष्ट्यादिभिर्वालुकायामुद्गता राजिश्चिरेण वाय्वीरणाऽऽदिभिर्भूयः सन्धत्ते । तथा प्रत्याख्यानावरणक्रोधोऽपि कष्टेनोपशाम्यति ।

**तत्त्वार्थभाष्यकाराऽभिप्रायेण** तु प्रत्याख्यानावरणक्रोधो जघन्यतोऽहोरात्रम्, उत्कृष्टतश्च वर्षं यावत्तिष्ठते। **तथा चोक्तं तत्त्वार्थभाष्ये-**

''वालुकाराजिसदृशो नाम यथा वालुकायां काष्ठ-शलाका-शर्कराऽऽदीनामन्यतमेन हेतुना राजिरुत्पन्ना वाय्वीरणाद्यपेक्षसंरोहा अर्वाग् मासस्य संरोहति एवं यथोक्तनिमित्तो यस्य क्रोधोऽहोरात्रं पक्षं मासं चतुर्मास्यं संवत्सरं वाऽवतिष्ठते स वालुकाराजिसदृशो नाम।'' (अ.८, सू.१०/ भा. २, पत्र १४५-१४६) इति।

यथा यष्ट्यादिभिर्जले समुद्भूता राजिः शीघ्रमेव संरोहति, एवं संज्वलनक्रोधोऽपि विदुषोऽप्रमत्तस्य प्रत्यवमर्शनेनोत्पत्त्यनन्तरमेव व्यावर्तते।

अथ चतुर्विधमाननिरूपणम् - शिलाया विकारः शैलः = शिलायां घटितः ''विकारे'' (सि०-६-२-३०) इत्यनेनाण्प्रत्ययः, शैलश्चासौ स्तम्भः शैलस्तम्भः, यथा शैलस्तम्भः कथमपि नमितुमयोग्यः, तथाऽनन्तानुबन्धिमानोऽपि। तत्तद्वतोरभेदोपचारात्। **एवमग्रेऽपि।**

यथाऽस्थिस्तम्भो बहुतरैरुपायैर्महता कष्टेन च नमति, तथाऽप्रत्याख्यानावरणमानोऽपि।

यथा काष्ठस्तम्भोऽग्निस्वेदाऽऽदिबहूपायैः कष्टेन नमति, तथा प्रत्याख्यानावरणमानोऽपि।

यथा तिनिशलतास्तम्भोऽल्पप्रयासैः सुखेन नमति, तथा संज्वलनमानोऽपि।

अथ चतुर्विधमायाव्याख्या-यथा निबिडवंशीमूलस्य कुटिलता किलाऽग्निनाऽपि नाऽवगच्छति, तथाऽनन्तानुबन्धिमायाजनितमनःकुटिलताऽपि कथमपि न निवर्तते, ततो घनवंशीमूलसदृश्यनन्तानुबन्धिनी मायाऽभिहिता।

यथा मेषशृङ्गवक्रता महता कष्टेनाऽपवर्तते तथैवाऽप्रत्याख्यानावरणमायोद्भूतकुटिलताऽप्यतिदुःखेनाऽपगच्छति। तेन मेषशृङ्गसमा सा गदिता।

गौः = बलीवर्दः, तस्य मार्गे गच्छतो वक्रतया पतिता मूत्रधारा गोमूत्रिका कथ्यते, यथा च सा शुष्का पवनाऽऽदिभिः कष्टेनाऽपाऽऽक्रियते, एवं प्रत्याख्यानावरणमायाऽपि कष्टेनाऽपनीयते, अतः सा गोमूत्रिकासमाना प्रोक्ता।

यथा धनुरादीनां वर्धकयोल्लिख्यमानानां याऽवलेखिका वक्रत्वग्रूपा पतति सा कोमलत्वात्सुखेनैव प्राञ्जलीक्रियते। एवं संज्वलनमायासमुत्पन्नहृदयवक्रता सत्वरमेवाऽपनीयते। अतः संज्वलनमायाऽवलेखिकोपमा गद्यते।

अथ चतुर्विधलोभप्ररूपणा - यथा कृमिरागरक्तं वस्त्रमुपायशतेनाऽपि रागं नैव मुञ्चति तथाऽनन्तानुबन्धिलोभोऽपि कथमप्यपनेतुं न शक्यते।

यथा वस्त्रे लग्नो निबिडकर्दमः कष्टतराऽपनेयो भवति, तथाऽप्रत्याख्यानावरणलोभोऽपि।

यथा वस्त्रादिविलग्नं प्रदीपाऽऽदिखञ्जनं कष्टेनाऽपगच्छति, तथा प्रत्याख्यानावरणलोभोऽपि।

यथा वाससि लग्नो हरिद्राराग: सूर्याऽऽतपस्पर्शमात्रादेवाऽपैति, तथा संज्वलनलोभोऽपि सुखेन निवर्तते।

एवं क्रोधाऽऽदीनां चतुर्णां प्रत्येकमनन्तानुबन्धिभेदेन चतुर्विधत्वात्कषायाः षोडश भवन्ति। तद्विपाकवेद्याः कर्मप्रकृतयोऽपि षोडश भवन्ति।

इदानीं नवनोकषायान् व्याचिख्यासुराह – **''हुन्ति''** इत्यादि, नव नवसङ्ख्याका नोकषाया भवन्ति । **ननु** कषाय-नोकषाययोः कः प्रतिविशेषः ? **इति चेत्, उच्यते** - कषायैकदेशत्वात् कषायविशेषत्वाद्वा नोकषाया इत्यभिधीयन्ते । **यद्वा** नोशब्दो मिश्रार्थे नोकषाया हि कषायसहकृता एव चारित्रोपघातरूपस्वकार्यनिवर्तनप्रत्यलाः, न ह्यमीषां पृथक् सामर्थ्यमस्ति । अत्र मिश्राऽर्थो नोशब्दः । साहचर्यवाची वा नोशब्दः, तेन यद्दोषश्च यः कषायस्तत्सहचारिण एतेऽपि तत्तद्दोषा एव भवन्ति, कषायैः सहचारिणः = सहवर्तिनो ये ते नोकषाया इति कृत्वा । **इदमुक्तं भवति-** एषां हि केवलानां न प्राधान्यमस्ति, किन्तु कषायैरनन्तानुबन्ध्याऽऽदिभिः सहोदयं यान्ति, तद्विपाकसदृशमेव विपाकं दर्शयन्ति बुधग्रहवदन्यसंसर्गमनुवर्तन्ते । **उक्तञ्च तत्त्वार्थभाष्यवृत्तौ** - ''अनन्तानुबन्ध्यादिसहचरितास्तत्स्वभावका एव जायन्ते, तस्मादेतेऽपि चरणोपघातकारित्वात्तत्तुल्यतयैव ग्राह्याः ॥'' (अ.८, सू. १०/ भा. २, पत्र, १४१) इति । **तथा प्राचीनषडशीतिवृत्तौ श्रीयशोभद्रसूरिभिरपि-** ''नोशब्दस्य साहचर्यवाचित्वात्कषायैः सहचरा नोकषायाः, तेषां हि केवलानां न प्राधान्यम्, किन्तु तेषां यैः सहोदयमायान्ति कषायविपाकसममेव च विपाकमुपदर्शयन्ति ।'' (गा. ७६/पत्र. ५०) इति । ननु कैः कषायैः , सहचारित्वमिति चेद्, आद्यैर्द्वादशभिः । **तथाहि-** नाऽऽद्येषु द्वादशकषायेषु क्षीणेषु नोकषाया अवतिष्ठन्ते; तदनन्तरमेव तेषामपि क्षपणाय क्षपकस्य प्रवृत्तेः । **यद्वै**ते समुज्जृम्भमाणा अवश्यं कषायानुद्दीपयन्ति ततः कषायसहचराः । **यदुक्तम्–**

''कषायसहवर्तित्वात्, कषायप्रेरणादपि । हास्याऽऽदिनवकस्योक्ता, नोकषायकषायता ॥'' इति ।

के ते नोकषायाः ? इत्याह - **''हस्स०''** इत्यादि, इतरेतरद्वन्द्वसमासः, ''दीर्घ-ह्रस्वौ मिथो वृत्तौ'' (सि०-८-१-४) इत्यनेन प्राकृतत्वात्, रतेरिकारो दीर्घः 'हास्यरत्यरतिशोकभयकुत्सा' इति । एते कृतेतरद्वन्द्वाः प्रथमया निर्दिष्टाः ।

'हास्य' हसनीयं हास्यः, ''ऋवर्ण-व्यञ्जनाद् घ्यण्'' (सिद्धहेम०-५-१-१७) इत्यनेन घ्यण्, यदुदयात्सकारणं निष्कारणं वा जीवो हसति = स्मयते रङ्गाऽवतीर्णनटवत्, तद् हास्यमोहनीयम् ।

**उक्तञ्च प्राचीनकर्मविपाकसंज्ञकप्रथमकर्मग्रन्थे –**

''सनिमित्तऽनिमित्तं वा, जं हासं होइ इत्थ जीवस्स । सो हासमोहणीयस्स होइ कम्मस्स उ विवागो ॥५५॥'' इति ।

तत्र दर्शन-भाषण-श्रवणरूपं बाह्यकारणाऽपेक्षं सनिमित्तं तद्विना किमप्यन्तःस्मृतवतोऽनिमित्तं भवति ।

**उक्तञ्च श्रीस्थानाङ्गसूत्रे -** (स्था.४, उद्दे. १, सू. २६९/भा.१, पत्र० २०३-१)

चउहिं ठाणेहिं हासुप्पत्ती सिआ । तं जहा-पासित्ता भासेत्ता सुणेत्ता संभरेत्ता ॥'' इति ।

'रति' रमणं रतिः ''स्त्रियां क्तिः'' ( सिद्धहेम०-५-३-९१) इत्यनेन भावे क्तिप्रत्ययः । यस्योदयात्स-चित्ताऽचित्तेषु बाह्याऽभ्यन्तरेषु वस्तुषु सनिमित्तं वा निर्निमित्तं वा जीवः प्रमोदमाधत्ते तद् रतिमोहनीयम्।

**उक्तञ्च प्राचीनप्रथमकर्मग्रन्थे–**

''सच्चित्ताऽचित्तेसु य, बाहिरदव्वेसु जस्स उदएण । होइ रई रइमोहे, सो उ विवागो वियाणाहिं ॥५६॥'' इति ।

अत्र विवक्षाविशेषात्केवलबाह्यद्रव्योपादानम् ।

'अरति' न रतिः = अरतिः, यदुदयात्सचित्तादिबाह्याऽभ्यन्तरेषु वस्तुषु सनिमित्तमनिमित्तं वा जीवस्याऽप्रीतिर्जायते, तद् अरतिमोहनीयम् ।

**न च** प्रीत्यप्रीती साताऽसाताऽऽत्मक एवेति वेदनीयकर्मणैवाऽनयोरन्यथासिद्धिरित्या**शङ्कनीयम्**, तदुपनीतसुखदुःखहेतुसंनिधानेऽपि चित्ताऽन्यथाभावस्यैतद्व्यापारत्वात् । **यदुक्तम् -**

सच्चित्ताचित्तेसु य, बाहिरदव्वेसु जस्स उदएण । अरई होइ हु जीवे, सो उ विवागो अरइमोहे ॥५७॥'' इति ।

अत्राऽपि पूर्ववद्विवक्षाविशेषः ।

'शोक' ''शुच् शोके'' शोचनं शोकः ''भावा-ऽकर्त्रोः'' (सिद्धहेम०-५-३-१८) इत्यनेन भावे घञ्प्रत्ययः, यस्योदयवशात्सनिमित्तमन्यथा वा जीवः सोरस्ताडमाक्रन्दति, परिदेवते च, स्वमस्तकाद्यवयवांश्च हन्ति, दीर्घं च निःश्वसिति भूपीठे च लुठति, तच्छोकमोहनीयम् ।

**यदाह-** ''सोगरहियम्मि जीवे, जस्सिह उदएण होइ कम्मस्स । अक्कंदणाऽऽइसोगो, तं जाणह सोगमोहणियं ॥५९॥'' इति ।

'भय' भीतिर्भयम् ''युवर्णवृदृवशरणगमृद्ग्रहः'' (सिद्धहेम०-५-३-२८) इत्यनेन सूत्रेण भावेऽल्प्रत्ययः । यदुदयात्सनिमित्तमितरथा वा जीवो बिभेति त्रस्यत्युद्विजते वेपते तद् भयमोहनीयम् ।

**उक्तञ्च -** ''भयवज्जियम्मि जीवे, जस्सिह उदएण हुन्ति कम्मस्स । सत्त वि भयठाणाइं, भयमोहे सो विवागो उ ॥५८॥'' इति ।

'कुत्सा' ''कुत्सिण् अवक्षेपे'' इति कुत्स्धातुः कुत्सनं कुत्सा = जुगुप्सा ''भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्यः'' (सिद्धहेम०-५-३-१०९) इति सूत्रे बहुवचनात्प्रकृते भावेऽङ्प्रत्ययः, यदुदयवशाज्जीवस्य सनिमित्तं निर्निमित्तं वा शुभाऽशुभबाह्याऽन्तरवस्तुविषयं व्यलीकं = चित्तस्याऽन्यथाभावं मुखमोटननासाऽऽकुञ्चनाऽऽदिकमुपजायते, तत्कुत्सामोहनीयमित्यर्थः । **उक्तञ्च बृहत्कर्मविपाके –**

दुग्गंधमलिणगेसु य, अब्भिंतरबाहिरेसु दव्वेसु । जेण विलीयं जीवे, उप्पज्जइ सा दुगंछा उ ॥६०॥'' इति ।

अत्र केवलान्यशुभानि द्रव्याणि विषयतया गृहीतानि, एवं **नव्यप्रथमकर्मग्रन्थवृत्तावपि** । तथाऽप्यन्यत्र **तत्त्वार्थभाष्यवृत्ति-बन्धशतकचूर्णि-सप्ततिकावृत्त्यादिषु पुनः** शुभद्रव्यविषयाऽपि जुगुप्सा दर्शिता । **तथा चाऽत्र तत्त्वार्थभाष्यटीका-** ''जुगुप्सामोहनीयोदयात्शुभाऽशुभद्रव्यविषयं व्यलीकमुपजायत इत्यादि'' (अ.८, सू.१०/भा. २, पत्र. १४२) इति ।

**इदन्त्ववधेयम्** - हास्य-रतिरूपमेकं युगलं भवति, तच्च बन्धोदयाऽऽदिषु युगपदेव भवति ॥८॥

एतर्हि वेदनोकषायभेदत्रयमायुर्भेदचतुष्कञ्च तथा मोहनीयाऽऽयुषोरुपसंहारमेकया गाथया व्याहर्तुकाम आह ग्रन्थकृद्–

**थी-पुरिस-णपुमवेआ , इइ होइ चउत्थमट्ठवीसविहं ।**
**णरय-तिरि-णर-सुराउग - भेएहिं पंचमं चउहा ॥९॥**

(प्रे०) ''**थी**'' इत्यादि, ''स्त्रीपुरुषनपुंवेदाः' एते कृतेतरेतरद्वन्द्वाः प्रथमया निर्दिष्टाः । वेद्यन्ते = अनुभूयन्त इति वेदाः, **यद्वा** वेद्यन्ते = अनुभूयन्ते इन्द्रियोद्भूतं सुखमेभिरिति वेदाः, भावे करणे च ''भावा-ऽकर्त्रोः'' (सि०-५-३-१८) इत्यनेन घञ्-प्रत्ययः, वेदशब्दश्च ''द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते'' इति **न्याया**त्प्रत्येकमभिसम्बध्यते, ततश्चा**ऽयमर्थः**- स्त्रीवेदः, पुरुषवेदः, नपुंवेदश्च । तत्र स्तृणाति = आत्मानं परं च दोषैराच्छादयतीति स्त्री = योषित् ''स्त्री'' (सि०-उणादि०-४५०) इत्यनेन डित्रट्प्रत्ययः, ङीप्रत्ययश्च टित्त्वात् । **यद्वा** धातूनामनेकार्थत्वात् स्तृणाति = पुरुषं कामयत इति स्त्री = पुंसकामेत्यर्थः, पूर्ववद् डित्रट्प्रत्ययः । **अथवा** ''षोंच् अन्तकर्मणि'' इति सोधातुः, ''षूङौच् प्राणिगर्भविमोचने'' इति सूधातुः, इत्यादिधातुभ्योऽपि ''स्त्री'' (सि०-उणादि०-४५०) इत्यनेन डित्रट्प्रत्यये स्त्रीशब्दसिद्धिः स्त्री चाऽसौ वेदश्च = स्त्रीवेदः, **यद्वा** स्त्रिया वेदः स्त्रीवेदः ।

पृणाति पुरुषार्थानिति पुरुषः "विदिपृभ्यां कित्" (सि०- उणा०-५५८) इत्युषप्रत्ययः । **यद्वा** पुरि = शरीरे शेते पुरुषः; पृषोदरादित्वात् । पुरुषश्चाऽसौ वेदश्च पुरुषवेदः, **यद्वा** पुरुषस्य वेदः पुरुषवेदः । न पुमान् न स्त्रीति नपुंसकम्, नपुंसको वा "नखाऽऽदयः" (सि०-३-२-१२८) इत्यनेन निपातनात् नञोऽकाराऽभावः स्त्रीपुंसयोः पुंसकाऽऽदेशश्च । तच्च स चाऽसौ वेदश्च, तस्य वा वेदो नपुंसकवेदः । तत्र यदुदयवशात् स्त्रियाः = योषितः पुरुषं प्रत्यभिलाषो भवति, यथा पित्तोदयवशाद् मधुरद्रव्यं प्रति स स्त्रीवेदः करीषदाहोपमः । **इदमुक्तं भवति** - यथा यथा कारिषदाहो = फुम्फुमाऽग्निश्चाल्यते तथा तथा ज्वलति दहति च बृहंति च; एवमबलाऽपि यथा यथा पुरुषेण संस्पृश्यते तथा तथाऽस्या अधिकतरोऽभिलाषो जायते, अभुज्यमानायां तु च्छन्नकरीषदाहतुल्योऽभिलाषो मन्दो भवति । **यदुक्तं वृहत्कर्मविपाके–**

"पुरिसं पइ अहिलासो, उदएणं होइ जस्स कम्मस्स । सो फुंफुमदाहसमो, इत्थीवेयस्स उ विवागो ॥५१॥" इति ।

यदुदयात्पुरुषः स्त्रीं सेवितुमभिलषति श्लेष्मोदयेऽम्लाऽभिलाषवत्, स पुरुषवेदस्तृणदाहसमः । **अयम्भावः-** यथा तृणानां दाहे ज्वलनं झटिति विध्यापनं च भवति; एवं पुंवेदोदये स्त्रियाः सेवनं प्रत्युत्सुकोऽभिलाषो जायते, तत्सेवने च शीघ्रं निवर्तते । **उक्तञ्च-**

"इत्थीए पुण उवरिं, जस्सिह उदएण रागउप्पज्जे । सो तणदाहसमाणो, होइ विवागो पुरिसवेए ॥५२॥" इति ।

यद्वशात्स्त्रीपुंसोरुभयोरप्युत्कटाऽभिलाष उत्पद्यते पित्तश्लेष्मोभयोदयवशान्मज्जिकाऽभिलाष इव, स नपुंसकवेदो महानगरदाहसमानः **इदं तात्पर्यम्** - यथा नगरं दह्यमानं महता कालेन दह्यते विध्याति च महतैव कालेन एवं नपुंसकवेदोदयेऽपि स्त्रीपुरुषोः सेवनं प्रत्यभिलाषाऽतिरेको महताऽपि कालेन न निवर्तते, नाऽपि सेवने तृप्तिः, अर्थाद् बहुकाले गते प्रशमोऽस्य भवति । **यदाह प्राचीनकर्मविपाके -**

"इत्थीपुरिसाणुवरिं, जस्सिह उदएण रागउप्पज्जे । नगरमहादाहसमो, सो उ विवागो अपुमवेए ॥५३॥" इति ।

**तथा लोकप्रकाशेऽपि –** (द्र. लो. स. ३, द्वा. २४/ पु. भा. १, पत्र. १६२)

"वेदस्त्रिधा स्यात्पुंवेदः, स्त्रीवेदश्च तथा परः । क्लीबवेदश्च तेषां स्यु- र्लक्षणानि यथाक्रमम् ॥५८९॥
पुसां यतो योषिदिच्छा, स पुंवेदोऽभिधीयते । पुरुषेच्छा यतः स्त्रीणां, स स्त्रीवेद इति स्मृतः ॥५९०॥
यतो द्वयाऽभिलाषः स्यात्, क्लीबवेदः स उच्यते । तृणफुम्फुमकद्रङ्ग - ज्वलनोपममिता इमे ॥५९१॥" इति ।

**"इइ"** इत्यादि, 'इति' इतिशब्द एवमर्थे एवं = भणितप्रकारेण चतुर्थं = मोहनीयं कर्म 'अष्टाविंशतिविधम्' अष्टाविंशतिर्विधाः = प्रकारा यस्य तद् अष्टाविंशतिविधम् = अष्टाविंशतिप्रकारकं भवतीति । तदेवं मोहनीयकर्मोत्तरप्रकृतयः प्रदर्शिताः ।

अथाऽऽयुष उत्तरप्रकृतीराह-**"णरय०"** इत्यादि, 'नरकतिर्यङ्नरसुरायुष्कभेदैः' इहेतरेतरद्वन्द्वगर्भितषष्ठीतत्पुरुषसमासः, स्वार्थिकप्रत्ययान्त आयुष्कशब्दश्च प्रत्येकमभिसम्बध्यते, ततश्चा**ऽयमर्थः-** नरकायुष्कं तिर्यगायुष्कं नरायुष्कं = मनुष्यायुष्कं सुरायुष्कञ्चेति नरकायुष्क-तिर्यगायुष्क-नरायुष्क-सुरायुष्काणि तेषां भेदाः नरकायुष्क-तिर्यगायुष्क-नरायुष्क-सुरायुष्कभेदाः तैः नरकायुष्क-तिर्यगायुष्क-नरायुष्क-सुरायुष्कभेदैः । तत्र ★ नरान् उपलक्षणत्वात् तिरश्चोऽपि प्रभूतपापकारिणः कायन्तीव =

★ **घवलाकारास्तु** *"नरान् = प्राणिनः कायति = पातयति = खलीकरोति इति नरकः कर्म, तस्य नरकस्याऽपत्यानि नारका...... ...... ....... ... / **अथवा** द्रव्य-क्षेत्र-काल-भावेष्वन्योऽन्येषु च विरताः नरताः ....... ..... ....... ...... /"* इत्यपि भणन्ति ।
(षट्खण्डागमे प्रथमखण्डे जीवस्थाने प्रथमायां सत्पदप्ररूपणायां सू.२४/पु. १, पत्र. २०१-२०२)

आह्वयन्तीवेति नरका: = नरकावासा: सीमन्तकाऽऽदय:, **यद्वा** नरा उपलक्षणत्वात्तिर्यञ्चोऽपि कायन्ति = दु:खपीडिता रटन्त्यस्मिन्निति नरका:, **यद्वा** नरान् कृतन्ति कृणोति वेति नरका:, **अथवा** नृणन्ति = शिक्षयन्ति पापिनो नरका: दृ कृ नॄ सृ भृ धृ वृ.........'' (सि०-उणादि०-२७) इत्यनेनाऽकप्रत्यय:, नरका: = नरकावासा: सीमन्ताऽऽदयो विशिष्टाऽऽकृतयोऽपुण्यसंभारजनितगौरवाणां सत्त्वानामुत्पत्तिस्थानविशेषा: ''तात्स्थ्यात्तदुपचार:'' इति **न्यायेन** तत्र स्थिता जीवा अपि नरका: ''मञ्चा आक्रोशन्ति'' इतिवत् । **यद्वा** नरको विद्यते येषां ते नरका: ''अभ्रादिभ्य:'' (सिद्धहेम०-७-२-४६) इत्यनेन मत्वर्थीयोऽप्रत्यय:; आयुरेवाऽऽयुष्कम्, स्वार्थिककप्रत्यय:, नरकाणामायुष्कं नरकाऽऽयुष्कम्, येन ते तेषु स्थीयन्ते । तिरोऽञ्चन्ति = गच्छन्तीति तिर्यञ्च:, तिरस्पूर्वकस्याऽञ्चधातो: ''क्विप्'' (सि०-५-१-१४८) इत्यनेन कर्तरि क्विप्प्रत्यय: तिरस्शब्दस्य च 'तिरसस्तिर्यति'' (सिद्धहेम०-३-२-१२४) इत्यनेन 'तिरि' इत्यादेश:, व्युत्पत्तिनिमित्तं चैतद् प्रवृत्तिनिमित्तं तु तिर्यग्गतिनाम, तदुदयवन्तश्चैकेन्द्रियाऽऽदयस्तिर्यञ्च:, तेषामायुष्कं तिर्यगायुष्कम्, येन तेष्ववस्थितिर्भवति । नृणन्ति = निश्चिन्वन्ति वस्तुतत्त्वमिति नरा: = मनुष्या:, ''अच्'' (सि०-५-१-४९) इत्यनेन कर्तर्यच्प्रत्यय:, **यद्वा** ''अ:'' (सि०-उणादि०-२) इत्यौणादिक: कर्तर्यप्रत्यय:, तेषामायुष्कं नराऽऽयुष्कम्, तद्भवाऽवस्थानहेतु: । ''राजृग् दीप्तौ'' सुष्ठु राजन्ते = दीप्यन्ते = शोभन्त इति सुरा:, सुपूर्वकाद् राज्धातो: ''क्वचित्'' (सिद्धहेम०-५-१-१७१) इत्यनेन बाहुलकाद् डप्रत्यय:, **यद्वा** ''सुरत् ऐश्वर्य-दीप्त्यो:'' सुरन्ति = विशिष्टमैश्वर्यमनुभवन्ति, **यद्वा** दिव्याभरणकान्त्या सहजशरीरकान्त्या च दीप्यन्त इति सुरा: ''तुदादिविषिगृहिभ्य: कित्'' (सि० उणादि० ५) इत्यनेन ''नाम्युपान्त्य-प्री-कृ-गॄ-ज्ञ: क:'' (सिद्धहेम० ५-१-५४) इत्यनेन वा कर्तरि कित् अप्रत्यय: **यद्वा** सुष्ठु रान्ति = ददति प्रणतानामीप्सतमर्थं लवणाऽधिपसुस्थित इव लवणजलधौ मार्गं जनार्दनस्येति सुरा:, **यद्वा** सुरा एषामस्तीति सुरा: ''अभ्रादिभ्य:'' (सिद्धहेम०-७-२-४६) इति सूत्रेण मत्वर्थे अप्रत्यय:, यतोऽब्धिजा सुरा तै: पीतेति **लौकिकशास्त्रे कविसमये** वा प्रसिद्धि: तेषामायुष्कं सुराऽऽयुष्कम् = देवाऽऽयु:, येन तेषु ध्रियन्ते । नरकाऽऽयुरादिभेदै: पुनरायु: कियत्प्रकारमित्याह- **''पंचमं''** इत्यादि, 'पञ्चमम्' आयु: कर्म 'चतुर्धा' चतुर्विधं भवति ॥९॥

अधुनाऽवसरप्राप्तस्य नामकर्मण उत्तरप्रकृतयो निरूपणीया:, ताश्च पिण्डप्रकृति-प्रत्येकप्रकृति-सप्रतिपक्षप्रकृतिभेदानाश्रित्य त्रिविधा भवन्ति, तत्राऽऽदौ पिण्डप्रकृतीर्व्याख्यातुमना: प्राहैकगाथाम्

**गइ-जाइ-तणु-उवंगा, बंधण-संघायणाणि संघयणं ।**
**संठाण-वण्ण-गंध-रस-फास-अणुपुव्वि-विहयगई ॥१०॥**

(प्रे०) **''गइ०''** इत्यादि, इह नाम्न: प्रस्तावात्सर्वत्र नामेत्युपस्कार: कार्य: । **''गइजाइतणुउवंगा''** इत्यत्र पुस्त्वं प्राकृतत्वात्, तत: 'गतिजातितनूपाङ्गानि' गतिनाम, जातिनाम, तनुनाम, उपाङ्गनाम चेति, 'बन्धनसंघातने' बन्धननाम संघातननाम चेति, 'संहननम्' संहनननाम, 'संस्थानवर्णगन्धरसस्पर्शाऽऽनुपूर्वीविहायोगतय:' संस्थाननाम, वर्णनाम, गन्धनाम, रसनाम, स्पर्शनाम, आनुपूर्वीनाम, विहायोगतिनाम चेति ।

तत्र गम्यते = तथाविधकर्मसचिवैर्जीवै: प्राप्यते या, सा ※ गति:, ''स्त्रियां क्ति:'' (सिद्धहेम०-५-३-९१) इत्यनेन कर्मणि स्त्रियां क्तिप्रत्यय:, ※ गति: = नारकाऽऽदिपर्यायपरिणति:, तद्विपाकवेधा कर्मप्रकृतिरपि ※ गति:, उपचारात्, सैव नाम गतिनाम ।

---

※ **सर्वार्थसिद्धिकारास्त्वाहु:-** *''यदुदयादात्मा भवान्तरं गच्छति सा गति:''* इति ।

**ननू**क्तव्युत्पत्त्या सर्वेषामपि पर्यायाणां गतित्वप्रसङ्गः स्यात्, यतः सर्वेऽपि पर्याया जीवेन गम्यत **इति चेत्, उच्यते**– नामकर्मोदयाऽभिमुखो जीवो गतिपर्यायेण विशेषितत्वात् तं परिणमति गच्छतीति वा गतिः, **यद्वा**ऽविशेषेण व्युत्पादिता अपि शब्दा रूढिवशाद् गोशब्दवत्प्रतिनियतमेवाऽर्थं विषयीकुर्वन्तीत्यदोषः । **उक्तञ्च बन्धशतकचूर्णौ** – "जति गम्मइ त्ति गई तो जीवेण सव्वे पज्जवा गम्मंते तम्हा सव्वपज्जवाणं गइप्पसंगो ? ण, वीसेसियत्ताओ गइपज्जवेण अप्पा तं णामकम्मोदयाऽभिमुहो परिणमइ गच्छतीति वा गती ।..... .......... *'णिरयगइतिरियमसुभं, विसेसओ मणुयदेवसुभउत्ति । जीवो उ चाउरन्तं, गच्छइ तम्हा गई तेण ॥१॥'* " इति ।

**तथा नव्यकर्मविपाकवृत्तावपि** – "ननु सर्वेऽपि पर्याया जीवेन गम्यन्ते प्राप्यन्त इति सर्वेषामपि तेषां गतित्वप्रसङ्गः, तथा च प्राग्गतिशब्दस्येयमेव व्युत्पत्तिर्दर्शितेति, नैवम् यतोऽविशेषेण व्युत्पादिता अपि शब्दा रूढितो गोशब्दवत् प्रतिनियतमेवाऽर्थं विषयीकुर्वन्तीत्यदोषः ।" (गा. ३२/पत्र. ४३/५०) इति ।

तच्च चतुर्विधम्, नरकाऽऽदिभेदात् ।

जननं जातिः एकेन्द्रियाऽऽदीनामेकेन्द्रियाऽऽदिशब्दप्रवृत्तिनिबन्धनं तथाविधसमानपरिणतिलक्षणं सामान्यम्, तद्विपाकवेद्या कर्मप्रकृतिरपि जातिः । **यदुक्तं श्रीसप्ततिकावृत्तौ श्रीपञ्चसंग्रहवृत्तौ च श्रीमन्मलयगिरिसूरिपादैः**-

"एकेन्द्रियाऽऽदीनामेकेन्द्रियत्वाऽऽदिरूपसमान ★ परिणतिलक्षणमेकेन्द्रियाऽऽदिशब्दव्यपदेशभाग् यत्सासान्यं सा जातिः, तद्विपाकवेद्या कर्मप्रकृतिरपि जातिः ।" (सप्त. गा.५/पत्र. १४९/१७२) (पञ्चसं. द्वा. ३, गा. ६ / पञ्चसं. भा. १, पत्र. ११३-२) इति ।

**यद्वा** जननं जातिः = एकेन्द्रियाऽऽदिशब्दव्यपदेशेन पर्यायेणैकेन्द्रियाऽऽदिजीवानामुत्पत्तिः, तद्भावनिबन्धनभूतं नाम जातिनाम । **तथैव व्युत्पादितं नव्यकर्मविपाकवृत्तौ ।**

**ननु** एतेन जातिनाम्ना किं साध्यते ? किं भावेन्द्रियमेकाऽऽदिरूपम् ? उत द्रव्येन्द्रियम् ? आहोस्विदेकेन्द्रियोऽयं द्वीन्द्रियोऽयमित्यादिव्यपदेशः ? **इति पक्षत्रयम्,** तत्र तावन्नाद्यः पक्षो युक्तः, भावेन्द्रियस्य स्पर्शाऽऽदीन्द्रियाऽऽवरणक्षयोपशमसामार्थ्येन जन्यत्वात्, "क्षायोपशमिकानीन्द्रियाणि" इति **वचना**त्, यदि द्वितीयः पक्षः, तर्ह्यपि न युज्यते, द्रव्येन्द्रियस्येन्द्रियपर्याप्तिनामसामर्थ्यवशेनैव सिद्धत्वात् । अतः पारिशेष्यात्तृतीयपक्षोऽङ्गीकार्यः ।

**यदुक्तं श्रीसप्ततिकावृत्तौ श्रीमलयगिरिसूरिपादैः**- "द्रव्यरूपमिन्द्रियमङ्गोपाङ्गेन्द्रियपर्याप्तिनामकर्मसामर्थ्यात् सिद्धम्, भावरूपं तु स्पर्शनाऽऽदीन्द्रियाऽऽवरणक्षयोपशमसामर्थ्यात् 'क्षायोपशमिकानीन्द्रियाणि' इति वचनात् । यत्पुनरेकेन्द्रियाऽऽदिशब्दप्रवृत्तिनिबन्धनं तथारूपसमानपरिणतिलक्षणं सामान्यं तदव्यभिचारसाध्यत्वाद् जातिनाम साध्यम् ।" (गा.-५/प.-१४९-१७२) इति ।

एवं **श्रीपञ्चसंग्रहवृत्तावपि । एवमेव कर्मप्रकृतिवृत्ति-नव्यकर्मविपाकवृत्त्यादिष्वपि ।**

**न चै**काऽऽदीन्द्रियज्ञानाऽऽवरणक्षयोपशमेन्द्रियपर्याप्तिनामवशादेवैकेन्द्रियाऽऽदिव्यपदेशोऽपि सेत्स्यति, किमर्थं जातिः कल्पयत **इति वाच्यम्,** यत इन्द्रियज्ञानाऽऽवरणक्षयोपशमो भावेन्द्रियजनने चरिताऽर्थः, केवलज्ञानिनां च तदभावेन पञ्चेन्द्रियव्यवहारो न प्रसज्येत । बकुलाऽऽदीनाञ्चाऽनुमानाऽऽदिसिद्धेनेन्द्रियपञ्चकाऽऽदिक्षयोपशमेन पञ्चेन्द्रियाऽऽदिव्यवहारप्रसङ्गो भवेत् । न चेष्टम् । **उक्तञ्च बन्धशतकचूर्णौ** - "फासिंदियाऽऽवरणस्स (कम्मस्स) खओवसमेणं एगिंदियलद्धी, जइ तस्स जाइणामं ण होज्जा तो एगिंदियो त्ति संज्ञा न लभते, तम्हा संज्ञाकरणं यत्कर्म तन्नामोच्यते ॥"(गा. ३९/पत्र. ५५) इति ।

★ **पञ्चसंग्रहे** पुनरत्र शब्दकृतः **पाठभेदः** । न पुनरर्थभेदोऽस्ति **तद्यथा** - *"परिणति"* शब्दस्थाने *"परिणाम"* शब्द इति ।

तथेन्द्रियपर्याप्तिर्द्रव्येन्द्रियनिष्पादने कृताऽर्था, विग्रहगतौ च तदभावेनैकेन्द्रियत्वाऽऽदिव्यपदेशेनाऽनुपपत्तिः स्यात्; पञ्चेन्द्रियाऽऽदीनामपि जीवानां जातीयबधिरत्वाऽन्धत्वाऽऽदिना विघातकर्णचक्षुरादिद्रव्येन्द्रियाणामेकाऽऽदिद्रव्येन्द्रियोनत्वेन चतुरिन्द्रियाऽऽदिव्यपदेश उत्पद्येत । तदप्यनभीष्टम् ।

एवमन्यत्र कृताऽर्था ज्ञानाऽऽवरणक्षयोपशमेन्द्रियपर्याप्तिनाम्नी कथमेकेन्द्रियाऽऽदिव्यपदेशनिबन्धनपरिणतिलक्षणं कार्यान्तरं जनयितुमलम् ? न ह्यन्यसाध्यं कार्यमन्यो निष्पाद्यते, अतिप्रसङ्गात् । तस्माद् एकेन्द्रियाऽऽदीनां जीवानां समानजातीयजीवान्तरेण सह समाना बाह्या काचित् परिणतिरेकेन्द्रियाऽऽदिशब्दवाच्या जातिनामकर्मोदयत एव स्वीकर्तव्या, तदनन्यसाध्यत्वात् । **उक्तञ्च** - "अव्यभिचारिणा सादृश्येन एकीकृतोऽर्थात्मा जातिः" (सप्त. गा. ५ वृ. / पत्र. १७३) इति । अत एव बकुलाऽऽदीनामनुमानाऽऽदिसिद्धे इन्द्रियपञ्चकाऽऽदिक्षयोपशमे सत्यपि पञ्चेन्द्रियशब्दव्यपदेश्यपञ्चेन्द्रियजातिनामकर्मोदयजन्यविशिष्टबाह्यपरिणत्यभावान्न पञ्चेन्द्रियव्यपदेशः प्राप्यते । **यदुक्तं विशेषाऽऽवश्यकभाष्ये** - "पंचेंदिउव्व बउलो, नरोव्व सव्वविसओवलंभाओ । तह वि न भण्णइ पंचें-दिउ त्ति बज्झेंदियाऽभावा ॥३००१॥" इति ।

**तथैव बन्धशतकचूर्णिटिप्पनकेऽपि** - "बकुलाऽऽदेः कथञ्चित् सकलेन्द्रियव्यापारेऽपि पञ्चेन्द्रियजातिवैकल्येन बाह्येन्द्रियाऽभावान्न पञ्चेन्द्रियव्यपदेशः ।" (गा. ३९/पत्र.५५) इति ।

**ननु** शब्दप्रवृत्तिनिमित्ततया न जातिसिद्धः, **अन्यथा** हर्यादिपदप्रवृत्तिनिमित्ततया हरित्वाऽऽदिकमपि जातिर्भवेत्, तत एकेन्द्रियाऽऽदिव्यवहार उपाधि(विशेषण)विषय एवाऽस्त्विति किं जातिनाम्ना, यदि चैवमप्येकेन्द्रियाऽऽदिव्यवहारहेतुतयैकेन्द्रियत्वाऽऽदिजातिरभ्युपगम्यते तदा नारकत्वाऽऽदिकमपि नारकाऽऽदिव्यवहारनिमित्तपञ्चेन्द्रियत्वाऽऽदिव्याप्या जातिरेवाऽस्त्विति कृतं गतिनाम्ने**ति चेत्, उच्यते**-अपकृष्टचैतन्याऽऽदिनियामकतयैकेन्द्रियत्वाऽऽदिजातिसिद्धिस्तदेव चैकेन्द्रियाऽऽदिव्यवहारनिमित्तं लाघवात्तन्निबन्धनतया जातिसिद्धिः । नारकत्वाऽऽदिकं च न जातिरूपम्, तिर्यक्त्वस्य पञ्चेन्द्रियत्वाऽऽदिना साङ्कर्यात्, किन्तु सुखदुःखविशेषोपभोगनियामकपरिणामविशेषरूपं तन्निबन्धनतया च गतिनामसिद्धिः ।

**ननु** तथाऽपि पञ्चेन्द्रियव्यपदेशस्य गो-तुरग-भुजग-मातङ्गाऽऽदिपर्यायविशेषस्याऽपि कारणं किञ्चित् कर्माऽभ्युपगन्तव्यम् ? **इति चेद्, नैवम्,** जातिनामकर्मवैचित्र्यादेव तत्सिद्धेः । न चाऽत्रैकान्तेन युक्त्युपन्यास एवाऽऽग्रहः कार्यः, आगमोपपत्तिभ्यां गम्यत्वात्तत्त्वस्य । **यदवादि-** "आगमश्चोपपत्तिश्च, सम्पूर्णं दृष्टिलक्षणम् । अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥" इत्यलं प्रसङ्गेन ।

तच्च जातिनाम पञ्चविधम्, एकेन्द्रियाऽऽदिभेदात् ।

"तनूयी विस्तारे" तनोति = विस्तारयत्यात्मप्रदेशान् जन्तुर्यस्याम्, सा तनुः "भृमृतृत्सरितनि........" (सि०- उणादि०-७१६) इत्युप्रत्ययः, तज्जनकं कर्माऽपि तनुः, सैव नाम तनुनाम = शरीरनाम औदारिकाऽऽदिशरीरं प्राणिनां संपद्यते यदुदयात्तद् इति यावत् । यदुदयवशात् औदारिकाऽऽदिशरीरप्रायोग्यान् पुद्गलान् समादायौदारिकाऽऽदिशरीरतया परिणमय्य च जीवप्रदेशैः सहाऽन्योऽन्याऽनुगमरूपतया सम्बन्धयति तद् इत्यर्थः । तच्च, पञ्चविधम् औदारिकाऽऽदिभेदैः ।

उपाङ्गनाम "ते लुग्वा" (सि०-३-२-१०८) इति व्याकरणसूत्रेण **यद्वा** "भामा सत्यभामा" इति **न्यायाद्** अङ्गोपाङ्गनाम, तत्र "अञ्जौप् व्यक्ति-म्रक्षण-गतिषु" अञ्ज्यन्ते = व्यक्तीभवन्ति गर्भोत्पत्तेरारभ्य म्रक्ष्यन्ते च जन्मप्रभृतेरित्यङ्गानि; तानि च शिरःप्रमुखाण्यष्टौ, तदवयवभूतान्यङ्गुल्यादीन्युपाङ्गानि, शेषाणि तु प्रत्यवयवभूतान्यङ्गुलिपर्वरेखाऽऽदीन्यङ्गोपाङ्गानि ।

**यदुक्तं प्राचीनकर्मविपाके –**

''सीसमुरोयरपिट्ठी, दो बाहू ऊरुआ य अट्ठंगा । अंगुलिमाइ उवंगाइं, अंगोवंगाइ सेसाइं ॥९१॥'' इति ।

ततश्चाऽङ्गानि च उपाङ्गानि चेति अङ्गोपाङ्गानि, अङ्गोपाङ्गानि च अङ्गोपाङ्गानि चेति अङ्गोपाङ्गानि ''स्यादावसंख्येयः'' (सिद्धहेम०-३-१-११९) इत्यनेनैकशेषः तन्निबन्धनं नामाऽङ्गोपाङ्गनाम यदुदयात् शरीरतयोपात्ता अपि पुद्गला अङ्गोपाङ्गविभागेन परिणमन्ति तत् ।

**उक्तञ्च वृहत्कर्मविपाके**

''अंगोवंगविभागो, उदएणं होइ जस्स कम्मस्स । तं अंगवंगनामं, तस्स विवागो इमो होइ ॥९०॥'' इति ।

तच्चाऽङ्गोपाङ्गनाम त्रिधा, औदारिकाऽऽद्यङ्गोपाङ्गभेदात् ।

बध्यन्ते = गृह्यमाणपुद्गलाः पूर्वगृहीतपुद्गलैः सह श्लिष्टाः क्रियन्ते येन तद् बन्धनम् = शरीरनामकर्मोदयवशाद् गृहीतानां गृह्यमाणानां च पुद्गलानां परस्परमेकत्वमुपजायते काष्ठद्वयस्येव जतुसम्बन्धात्, ''करणाऽऽधारे'' (सिद्धहेम० ५-३-१२९) इत्यनेन सूत्रेणाऽनट्प्रत्ययः । **यदाऽऽह प्रज्ञापनामूलटीकाकारः**-''विद्यते तत्कर्म, यन्निमित्ताद् द्व्यादिसंयोगाऽऽपत्तिराविर्भवति, यथा काष्ठद्वयैकत्वकरणे जतुकारणमिति ।'' इति । तथैव **वन्धशतकचूर्णावपि भणितम् ।**

**यद्वा** यदुदयाद् गृहीतानां गृह्यमाणानां वा शरीरत्वेन परिणतानामपि च परस्परमविघटनं तद् बन्धननाम, काष्ठजतुवद् भवति, अन्यथा वालुकापुरुषशरीरवद् विश्लिष्टतृणादिवद्वा विघटनं स्यात् । **उक्तञ्च तत्त्वार्थसूत्रभाष्यवृत्तौ -** ''शरीरनामकर्मोदयाद् गृहीतेषु गृह्यमाणेषु वा तद्योग्यपुद्गलेष्वात्मप्रदेशस्थितेषु शरीराऽऽकारेण परिणामितेष्वपि परस्परमवियोगलक्षणं यदि बन्धननाम काष्ठजतुवद् न स्यात् ततो वालुकापुरुषवद् विघटेरन् शरीराणि'' (अ. ८,सू. १२ / भा. २, पत्र. १५२) इति ।

बन्धनं च तद् नाम चेति बन्धननाम, तच्च पञ्चदशभेदमुत पञ्चविधम्, औदारिकाऽऽदिभेदैः ।

**तथैव वन्धशतकचूर्णावपि -** ''गहियघेप्पमाणाणं पोग्गलाणं अन्नशरीरपोग्गलेहिं वा समं बन्धो जस्स कम्मस्स उदएणं भवइ तं बंधणणामं सो पञ्चविहो । तं जहा - ओरालिय-वेउव्विय-आहारक-तेजस-कम्मइगशरीरबन्धणणामं ति, विद्यते तत्कर्म यन्निमित्ताद् द्व्यादिसंयोगाऽऽपत्तिराविर्भवति, यथा काष्ठद्वयभेदैकत्वकरणाय जतुकारणं । एवं जत्तियाणि जत्थ शरीराणि सम्भवन्ति तेसिं बन्धणं भासियव्वं अबद्धं हि ण संघायमावज्जइ वालुकापुरुषशरीरवत्, विश्लिष्टतृणादिवद्वा'' (गा. ३९ / पत्र. ५५-५६) इति ।

संघात्यन्ते = पिण्डीक्रियन्त औदारिकाऽऽदिपुद्गला अनेनेति संघातनम्, करणेऽनट्प्रत्ययः, **श्रीदेवेन्द्रसूरिपादैस्तु व्युत्पत्तिरेवं कृता -** ''स्वत एव संघ्नन्ति = संघातमापद्यन्ते, ततस्ते संघ्नन्तः सन्तः सङ्घात्यन्ते प्रत्येकं शरीरपञ्चकप्रायोग्याः पुद्गलाः पिण्डयन्ते येन तत्सङ्घातनम् ।'' (गा. २४/पत्र. ४६) इति । सङ्घातं च तन्नाम चेति सङ्घातनाम = यदुदयवशादौदारिकाऽऽदिपुद्गला औदारिकाऽऽदिशरीररचनाऽनुकारिसङ्घातरूपा जायन्ते तत्, **ननु** ''व्यापारवत्कारणं करणम्'' इति **वचना**दस्य को व्यापारः ? न पुद्गलसंहतिमात्रम्, तस्य ग्रहणमात्रादेव सिद्धत्वेन सङ्घातननामकर्मणोऽनुपयोगाद्, औदारिकाऽऽदिशरीररचनाकारिसङ्घातविशेषस्तद्व्यापार इत्यपि न, तन्तुसंहतेः पट इवौदारिकाऽऽदिवर्गणाप्रभवपुद्गल-संहतेरेवौदारिकशरीराऽऽदौ हेतुत्वेनाऽधिकविशेषाऽनाश्रया**दिति चेत्** ? **उच्यते-** प्रतिनियतप्रमाणौदारिकाऽऽदिशरीररचनाऽर्थं संहतिविशेषस्याऽवश्याऽऽश्रयणीयत्वात्तन्निमित्ततारतम्यभागितया सङ्घातनामकर्मसिद्धिः ।

**यदाह कर्मप्रकृतौ श्रीयशोविजयमहोपाध्यायैः**:- (गा. १/पत्र. ६-१)

"अथ कोऽस्य व्यापारः? संहतिमात्रमिति चेन्न, पुद्गलसंहतिमात्रस्य ग्रहणमात्रादेव सिद्धत्वात्तत्र सङ्घातननामकर्मणोऽनुपयोगात् औदारिकशरीररचनाकारिसङ्घातविशेषस्तद्व्यापार इति सम्प्रदायमतम्, तदपि न, तन्तुसंहतेः पट इवौदारिकाऽऽदिवर्गणाप्रभवपुद्गलसंहतेरेवौदारिकशरीरादौ हेतुत्वात् तत्राऽधिकविशेषाऽनाश्रयणा**दिति चेत्** ?, **सत्यम्,** प्रतिनियतप्रमाणौदारिकाऽऽदिशरीररचनार्थं संहतिविशेषस्याऽवश्याऽऽश्रयणीयत्वात्तन्निमित्ततारतम्यभागितया सङ्घातननामकर्मसिद्धिरिति सम्प्रदायाऽभिप्रायस्यैव युक्तत्वात् ।" इति **इदमत्र तात्पर्यम्** - "औदारिकाऽऽदिवर्गणानां ग्रहणमौदारिकाऽऽदिशरीरनामकर्मणा जायते, गृहीतपुद्गलैः सह गृह्यमाणानां पुद्गलानां सम्बन्धो बन्धननामकर्मणा भवति, औदारिकाऽऽदिपुद्गलानामौदारिकाऽऽदिशरीररचनासंहतिर्हि संघातनामकर्मणोपजायते । अत एवौदारिकाऽऽदिशरीरवतां स्त्रीपुरुषगवादीनां नानाशरीराणि भिद्यन्ते । **उक्तञ्च बन्धशतकचूर्णौ-** "पोग्गलरचनाविशेषः संघातः, तेसिं चेव गहियाणं पोग्गलाणं जस्स कम्मस्स उदयाओ सरीररचना भवइ, तं संघायणामं । पोग्गलेसु विवागो जस्स सो य पञ्चविहो" (गा. ३९/पत्र. ५५) इति । अन्यथा स्त्र्यादीनां शरीरभेदो न भवेत्, कारणाऽभावेन कार्याऽभावात् । भेदकारणं हि संघातननामकर्म । **प्रतिपादितञ्च श्रीमत्सिद्धसेनगणिपादैः श्रीतत्त्वार्थभाष्यवृत्तौ-** "बद्धानामपि च पुद्गलानां परस्परं *जतुकाष्ठन्यायेन* पुद्गलरचनाविशेषः सङ्घातः संयोगेनाऽऽत्मना गृहीतानां यस्य कर्मण उदयादौदारिकतनुविशेषरचना भवति तत्सङ्घातनामकर्म, पुद्गलरचनाकारेण विपच्यत इति पुद्गलविपाक्युच्यते तच्चौदारिकाऽऽदिभेदात्पञ्चधा, परस्परविभिन्नलेप्यकरचनाविशेषवच्छरीरपरिणाम एव ह्युपलक्ष्यते । स चैवंविधः कर्मभेदो यदि न स्यात् ततः प्रत्यक्षप्रमाणविनिश्चेयः पुरुषयोषिद्गवादिलक्षणो नानाशरीरभेदो नैव सम्भाव्येत सङ्घातकर्मविशेषाऽभावात् । कारणाऽनुविधायि च कार्यं लोके प्रतीतम् । सङ्घातविशेषादेव हि पुरुषाऽऽदिशरीरलक्षणो विभागेन व्यपदेशः । अपिशब्दः सम्भावनार्थः । चशब्दोऽवधारणार्थः । सत्येव बन्धननाम्नि न स्याद्विशेषः । यतः सङ्घातविशेषजनकं प्रचयविशेषात् सङ्घातनाम । सङ्घातविशेषस्य जनकमिति शेषलक्षणा षष्ठीति नास्ति समासप्रतिषेधः । स तु प्रतिपदविहितायाः षष्ठ्याः प्रतिषेधः प्रचयविशेषादिति । प्रचयविशेषाद्धेतोः पुद्गलानां विन्यासः पुरुषस्त्रीविशेषाऽऽत्मकः । चशब्दोऽवधारणार्थः । यन्निमित्तश्च स विन्यासस्तत् सङ्घातनाम तत्प्रसिद्धोदाहरणेन भावयन्नाह दारुमृत्पिण्डायःपिण्डसङ्घातवदिति । गद्यबन्धनाऽनुलोम्याच्चाऽत्र द्विः पिण्डग्रहणम् । दारुमृदयःपिण्डवदिति दुरुच्चारं स्यात्, अयोदारुमृत्पिण्डवदिति किं न कृतम् ? अपूतिवचनाः खल्वाचार्याः सकृदभिधाय न निवर्तन्ते, दारुपिण्डवन्मृत्पिण्डवत्, अयःपिण्डवच्चेति दृष्टान्तत्रयं सुलभत्वात् प्रतिपत्तुश्चाऽतिशायिप्रबोधहेतुत्वात् दार्ववयवसङ्घातो दारुपिण्डः । एवं मृदवयवसङ्घातो मृत्पिण्डः। तथाऽयोऽवयवानां सङ्घातोऽयःपिण्डः । त एवाऽत्रौदारिकाऽऽदिशरीरयोग्यपुद्गलाश्चेतनेनाऽऽत्मसात्कृत्य सङ्घातनामकर्मोदयात् परस्परं संहताः सन्तिष्ठन्त इति ।" (अ. ८, सू. १२ / भा. २, पत्र. १५२-१५३) इति ।

**बृहत्कर्मविपाककाराऽऽदयस्तु प्राहुः-** ये ह्यौदारिकाऽऽदिषु शरीरेषु शिरःप्रभृत्यवयवानां निर्वर्तका औदारिकाऽऽदिपुद्गला ये यस्य स्थानस्य योग्यास्ते तस्मिन्नेव शिरःप्रभृतिस्थानके भवन्ति, न पुनर्विपर्यासेन तद्धि संघातननामकर्मोदयात् ।

**उक्तञ्च बृहत्कर्मविपाके गर्गमहर्षिभिः–**

"ओरालाई जे देहपुग्गला होंति जम्मि ठाणम्मि । ते ठंति तम्मि ठाणे, संघायणकम्मणो उदए ॥१०७॥" इति ।

**तथा चाऽस्य वृत्तौ परमानन्दसूरिभिरभिहितम् -** "ये औदारिकपुद्गला यत्र योग्यास्तान् तत्र संघातयति यत्कर्म निजोदयात् । यथा शिरोयोग्यान् शिरसि, पादयोग्यान् पादयोः, शेषाऽङ्गयोग्यान् शेषाऽङ्गेषु तदौदारिकसंघातनाम, एवं वैक्रियाऽऽहारकतैजसकार्मणेष्वपि वाच्यम् इति ।" (पत्र. ५८) इति ।

**तथा प्राचीनप्रथमकर्मग्रन्थव्याख्यायां पूर्वाऽऽचार्यपादैस्तु -** संघात्यते येन तत्संघातननाम, यथा कञ्चुके पृथग्भूतानि खण्डानि संघात्यन्ते सीवकेन, तथा शरीरेऽपि येन कर्मणा बाहुकलाचीप्रभृतीनां संघातनसंयोगः क्रियते तत्संघातननाम ।" (गा. ७१ /पत्र.४१-४२) इति । **अपरे त्वेवमाहुः-** संघातयति = पिण्डीकरोति = एकीभावमापादयति = यदुदयात् औदारिकाऽऽदिशरीरत्वेन परिणतान् पुद्गलानन्योन्यसन्निधानेनाऽऽत्मा व्यवस्थापयति, तृणगणमिव दन्ताली, तत्संघातननाम ।

**उक्तञ्च नव्यकर्मविपाकवृत्तौ देवेन्द्रसूरिपादैः-** "यदुदयाद् औदारिकशरीरत्वपरिणतान् पुद्गलानात्मा सङ्घातयति = अन्योन्यसन्निधानेन व्यवस्थापयति तद् औदारिकसङ्घातननाम।........" (गा. ३५/पत्र. ४७/५४) इत्यादि।

**व्युत्पत्त्यवसरे पुनस्तैरेवैवमभिहितम् -** "स्वत एव संघ्नन्ति सङ्घातमापद्यन्ते, ततस्ते संघ्नन्तः सन्तः सङ्घात्यन्ते = प्रत्येकं शरीरपञ्चकप्रायोग्याः पुद्गलाः पिण्ड्यन्ते येन तत् संघातनं तदेव नाम सङ्घातननाम।" (गा. २४ पत्र. ४०/४६) इति।

**तत्त्वं पुनरत्र केवलिगम्यम्।**

तच्च संघातननाम पञ्चविधम्, औदारिकाऽऽदिसंघातनभेदात्।

संहन्यते = धातूनामनेकाऽर्थत्वाद् दृढीक्रियन्ते शरीरपुद्गलाः कपाटाऽऽदयो लोहपट्टिकाऽऽदिनेव येन तत्संहननम्, "करणाऽऽधारे" (सिद्धहेम०-५-३-१२९) इत्यनेन करणेऽनट्प्रत्ययः, तदेव नाम संहनननाम = अस्थिरचनाविशेषः = अस्थिबन्धनमिति यावत्। **उक्तञ्च शतकचूर्णौ-** "संघयणं ति अत्थिबन्धणं" (गा. ३९/पत्र. ५६) इति।

तच्चौदारिकशरीर एव नाऽन्यशरीरेषु, तेषामस्थिरहितत्वात्।

तच्च संहनननाम षोढा, वज्रर्षभनाराचाऽऽदिभेदात्।

संतिष्ठन्ते विशिष्टाऽवयवरचनाऽऽत्मिकया शरीराऽऽकृत्या जन्तवो भवन्ति येन, तत् संस्थानम् इति, "करणाऽधारे" (सिद्धहेम०-५-३-१२९) इत्यनेन करणसाधनः संस्थानशब्दः, **यद्वा** "अनट्" (सिद्धहेम०-५-३-१२४) इत्यनेन भावसाधनोऽपि, **तद्यथा-**संस्थितिः संस्थानम् आकृतिविशेषः, तद्भावनिबन्धनं कर्माऽपि संस्थानम्, तदेव नाम संस्थाननाम।

तच्च षड्विधम्,समचतुरस्राऽऽदिसंस्थानभेदात्।

वर्ण्यते = अलङ्क्रियते शरीरमनेनेति वर्णः = कृष्णाऽऽदिः,"भावा-ऽकर्त्रोः (सिद्धहेम०-५-३-१८) इत्यनेन घञ्प्रत्ययः, तन्निबन्धनं नाम वर्णनाम, **यद्वा** जन्तुशरीरे कृष्णाऽऽदिवर्णहेतुकं कर्माऽपि वर्णः, स एव नाम वर्णनाम = यस्योदयाच्छरीरेषु कृष्णाऽऽदिवर्णनिष्पत्तिर्जायते तद्।

तच्च वर्णनाम पञ्चविधम्, कृष्णाऽऽदिवर्णभेदात्। **उक्तञ्च श्रीतत्त्वार्थभाष्यवृत्तौ-** "यस्योदयाच्छरीरेषु कृष्णाऽऽदिपञ्चविधवर्णनिष्पत्तिर्भवति, तद् वर्णनाम कृष्ण-नील-लोहित-पीत-शुक्लभेदम्। (अ.८, सू.१२/ भा. २, पत्र. १५५) इति।

**तथा श्रीबन्धशतकचूर्णावपि-** "वण्णणामं ओरालियाऽऽइसु सरीरेसु जस्सोदयाओ कालाऽऽदिपञ्चविहवण्णणिप्फत्ती भवइ, जहा चित्तकम्माऽऽइसु तव्विधवण्णा समारद्धेसु कारणाऽणुरूववण्णणिप्फत्तिवद्।" (गा. ३९ पत्र. ५७) इति।

"गन्धिण् अर्दने" गन्ध्यते = आघ्रायते इति गन्धः "भावा-ऽकर्त्रोः" (सिद्धहेम०-५-३-१८) इत्यनेन भावे घञ्प्रत्ययः तन्निबन्धनं नाम गन्धनाम = यत्कर्मविपाकाच्छरीरविषयं सौरभं दुर्गन्धित्वं वा निष्पद्यते तद्। **उक्तञ्च श्रीबन्धशतकचूर्णौ-**

तेसु चेव सरीरेसु सुगन्धया दुगन्धया वा जस्स कम्मस्स उदएणं भवइ तं गन्धनामं' (गा. ३९/पत्र. ५७) इति।

**तथा श्रीतत्त्वार्थभाष्यटीकायामपि-** "शरीरविषयं सौरभं दुर्गन्धित्वं च यस्य कर्मणो विपाकान्निवर्तते तद् गन्धनाम। **अपरे** साधारणं गन्ध**माहु**स्तदसत्। सुरभिणा दुर्गन्धिना वा भवितव्यम्, न साधारणः कश्चिदस्तीति।" (अ. ८, सू. १२/ भा.२, पत्र. १५५) इति।

तच्च गन्धनाम द्विविधम्, सुरभि-दुरभिभेदात्।

'रसण् आस्वादन-स्नेहयोः" रस्यते = आस्वाद्यत इति रसः = तिक्तादिः, तत्कारणं नाम रसनाम = यदुदयवशाच्छरीरे

तिक्ताऽऽदिरसविशेष उपजायते तद् । **उक्तञ्च श्रीशतकचूर्णौ –**

"तेसु चेव सरीरपोग्गलेसु तित्ताऽऽइरसविसेसो जस्स कम्मस्स उदएणं भवइ तं रसनाम ।" (गा. ३९ / पत्र. ५७) इति ।

तच्च रसनाम पञ्चविधम्, तिक्ताऽऽदिरसभेदात् ।

**ननु तत्त्वार्थभाष्ये** वर्णनाम रसनाम चाऽनेकविधं प्रोक्तम्, **तथा च तद्ग्रन्थः-** "रसनामाऽनेकविधं तिक्तनामादि । ...वर्णनामाऽनेकविधं कालनामाऽऽदि" (अ. ८, सू. १२/भा.२१,पत्र. १५५) इति । तत्कथं पञ्चविधत्वभणने तेन सह विरोधो न ?, **इति चेत्, उच्यते-** तत्राऽनेकविधत्वग्रहणन्तु तिक्ताऽऽदीनामवान्तरभेदसूचनाऽर्थं कृतमिति नाऽस्ति कश्चिद् दोषः । **तथा चोक्तं तत्त्वार्थभाष्यवृत्तौ सिद्धसेनगणिपादैः-** "अनेकविधग्रहणं तिक्ताद्यन्तर्भेदप्रतिपादनाऽर्थम् । एवमन्यत्राऽप्यन्तर्भेदा वाच्याः ।" (अ. ८, सू. १२/भा. २, पत्र. ११५) इत्यादि । **ननु** तथाऽपि तत्र "रसनामाऽनेकभेदं तिक्त-कटु-कषाया-ऽम्ल-मधुर-लवणाऽऽख्यम् ।" (अ. ८, सू. १२/भा. २, पत्र. १५५) इत्युक्त्या षड्विधता भणिता, न पुनः पञ्चविधते**ति चेत्, सत्यम्,** तत्र लवणस्य पृथगुपादानेन षड्विधत्वेऽपीह तथा **प्राचीन-नव्यकर्मविपाकाऽऽदि**ग्रन्थेषु लवणस्य मधुराऽऽदिसंसर्गजत्वात् तदभेदेन विवक्षणात् ।

**तथा चोक्तं देवेन्द्रसूरिपादैः-** (गा. ४०/पत्र. ५९)

"स्थानान्तरे स्तम्भिताऽऽहारविध्वंसाऽऽदिकर्ता सिन्धुलवणाऽऽद्याश्रितो लवणोऽपि रसः पठ्यते स चेह नोपात्तः, मधुरादिसंसर्गजत्वात्तदभेदेन विवक्षणात् । सम्भाव्यते च तत्र माधुर्याऽऽदिसंसर्गः, सर्वरसानां लवणप्रक्षेप एव स्वादुत्वोपपत्तेरिति ।" इति ।

**केचित्तु** लवणस्य मधुरेऽन्तर्भावमिच्छन्ति ।

**उक्तञ्च तत्त्वार्थभाष्यवृत्तौ** - "लवणो मधुराऽन्तर्गत इत्येके" (अ. ८, सू. १२/ भा. २, पत्र. १५५) इति ।

"स्पृशंत् संस्पर्शे" स्पृश्यत इति स्पर्शः, तन्निदानं नाम स्पर्शनाम यदुदयाज्जन्तुशरीरे कर्कशाऽऽदिस्पर्शविशेषो भवति तद्।

तच्चाऽष्टविधम् । कर्कशाऽऽदिभेदात् । **यदुक्तं तत्त्वार्थभाष्यवृत्तौ** - (अ. ८, सू. १२/ भा. २, पत्र. १५५)

"औदारिकाऽऽदिषु शरीरेषु यस्य कर्मण उदयात् कठिनाऽऽदिः स्पर्शविशेषः समुपजायते तत् स्पर्शनामाऽष्टविधम् ।" इति ।

पूर्वस्य पश्चाद् अनुपूर्वम् "विभक्तिसमीप....." (सिद्धहेम०-३-१-३९) इत्यनेन **सिद्धहेमव्याकरण**सूत्रेणाऽव्ययीभावः समासः, यथा रथस्य पश्चाद् अनुरथम्, तस्य भाव आनुपूर्व्यम् ,"पतिराजान्तगुणाङ्गराजादिभ्यः कर्मणि च " (सिद्धहेम०-७-१-६०) इत्यनेन ट्यण्प्रत्ययः, टित्वात् "अणञेयेकण्०..... " (सिद्धहेम० २-४-२०) इत्यनेन ङीप्रत्यये आनुपूर्वी = कर्पूर-लाङ्गल-गोमूत्रिकाऽऽकाररूपेण यथाक्रमं द्वि-त्रि-चतुःसमयप्रमाणेन विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्याऽनुश्रेणिनियता गमनपरिपाटी तत्कारणं नामाऽपि आनुपूर्वीनाम । **एतदुक्तं भवति-** क्षीणपूर्वभवाऽऽयुःकर्मा तिर्यगादिर्यावत्स्वोत्पत्तिस्थानं नाऽऽप्नोति तावदन्तर्गतिरुच्यते, तत्र वर्तमानस्य कस्यचित्प्राणिन उपग्रहकर आनुपूर्वीनामकर्मोदयो भवति, जलमिव जलचरस्य । **तद्यथा-** अन्तर्गतिर्द्विप्रकारा, ऋज्वी वक्रा च । तत्र यदा ऋज्व्या समयप्रमाणया स्वोत्पत्तिस्थानमश्नुते तदाऽऽनुपूर्वीकर्मोदयं विनैव पूर्वभविकायुःकर्मव्यापारात्स्वोत्पत्तिस्थानं गच्छति, यदा वक्रगत्या द्वि-त्रि-चतुःसमयमानया भवान्तरं प्राऽऽप्नोति तदा वक्राऽऽरम्भसमय एव पूर्वभवाऽऽयुरानुपूर्वीनाम चोदयं गच्छतः तच्चैवमानुपूर्वीनामाऽध्वयष्टिकल्पं वृषभनासिकारज्जुस्थानीयं वा विग्रहगतावेवोदेति, विग्रहगत्यभावे नोदेति । **ननु** ऋज्व्या गत्येव वक्रगत्याऽपि कथं नाऽऽनुपूर्वीं विना स्वोत्पत्तिस्थानमासाद्यत **इति चेत्, उच्यते-**ऋज्व्यां गतौ पूर्वभवाऽऽयुर्व्यापारेण गमनात्, विग्रहगतौ पुनः पूर्वभवाऽऽयुषः क्षीणत्वेनाऽध्वयष्टिकल्पस्याऽऽनुपूर्वीनाम्न उदयस्याऽऽवश्यकत्वात् ।

**यदुक्तं श्रीतत्त्वार्थभाष्यवृत्तौ -** ''मनुष्यः तिर्यग्योनिवाच्यं यावदुत्पत्तिस्थानं न प्राप्तोनि तावदन्तर्गतिः तत्र वर्तमानस्य कस्यचिज्जन्मवतश्चाऽऽनुपूर्वीनामकर्मोदयो भवति । आनुपूर्वी च क्षेत्रसन्निवेशक्रमः *'अनुश्रेणिर्गतिर्जीवानां पुद्गलानां च'* (अ०-२, सू. २७) इति वचनात् । तत्र यत्कर्मोदयादतिशयेन तद्गमनाऽनुगुण्यं स्यात् तदप्यानुपूर्वीशब्दवाच्यं भवति । तच्चाऽऽत्मनो गत्यन्तरं गच्छत उपग्रहे वर्तते ऋषभस्येव पयः । सा चाऽन्तर्गतिर्द्विविधा ऋज्वी वक्रा च । तत्र यदा ऋज्व्या गच्छति समयप्रमाणया तदा पूर्वकर्मैवाऽऽयुरनुभवन्नानुपुर्वीनामकर्मणैवोत्पत्तिस्थानं प्राप्तः पुरस्कृतमायुरासादयति। वक्रगत्या पुनः प्रवृत्तः कर्पूर-लाङ्गल-गोमूत्रिकालक्षणया द्वि-त्रि-चतुःसमयमानया वक्राऽऽरम्भकाले पुरस्कृतमायुरादत्ते तदैव चाऽऽनुपूर्वीनामाऽप्युदेति । **ननु** च यथैव गतावृज्व्यां विना आनुपूर्वीनामकर्मणोत्पत्तिस्थानमियर्ति तद्वद् वक्रगत्यामपि कस्मान्ने**ति** ? **उच्यते-** ऋज्व्यां पूर्वकर्माऽऽयुर्व्यापारेणैव गच्छति यत्र तत्पूर्वकर्मायुः क्षीणं तत्र तस्योदय इत्यध्वयष्टिस्थानीयस्याऽऽनुपूर्वीनामकर्मणः ।'' (अ. ८, सू. १२ / भा. २, प. १५५-१५६) इति ।

**तथा श्रीवन्धशतकचूर्णावपि-** '' **'आणुपुव्वि'** त्ति आणुपुव्वि णाम परिवाडी, कासिं ? सेढीणं तासिं अणुसेढिगमणं जस्स कम्मस्स उदयाओ भवइ ते आणुपुव्विणामं अंतरगईए वट्टमाणस्स जा उवग्गहे वट्टइ, **यथा-**जलचरस्स गइपरिणयस्स जलं, सा आणुपुव्वी । गई दुविहा उज्जुगई वक्कगती य, जत्थ उज्जुगती तत्थ पुव्वाऽऽउगेणेव गच्छइ, गन्तूण उववत्तिठाणे पुरेक्खडमाउगं गेण्हइ । वक्कगई कोप्पर-लांगल-गोमुत्तिलक्खणा, एक-द्वि-त्रिसमइका । ताए पुण गच्छन्तो जत्थ वङ्कमारभते तत्थ पुरेक्खडमाउगं गेण्हिऊण तं वेएइ, तत्थ य तन्नामाणुपुव्वीए उदओ भवइ ।'' (गा. ३९/ पत्र. ५७) इति ।

**केचनाऽऽचार्यपादास्तु-** निर्माणनामकर्मणा निर्मापितानां बाहूदराऽऽद्यङ्गाऽङ्गुलिकर्णनासिकाद्युपाङ्गानां रचनाविशेषपरिपाटी = उभयपार्श्वतो बाहू । कटेरधो जानू इत्यादिक्रमनियमकारिणी अनेनाऽङ्गेनोपाङ्गेन चाऽत्रैव स्थाने विनेष्टव्यमित्येवंरूपा यत्कर्मोदयाज्जायते तदानुपूर्वी नाम इत्याहुः । **यदुक्तं तत्त्वार्थभाष्ये-** (अ. ८, सू. १२/भा. २, पत्र. १५६)

''निर्माणनिर्मितानां शरीराङ्गोपाङ्गानां विनिवेशक्रमनियामकमानुपूर्वीनामेत्यपरे ।'' इति ।

तच्चाऽऽनुपूर्वीनाम चतुर्विधम्, नरकाऽऽनुपूर्व्यादिभेदात् ।

गमनं गतिः, विहायसा = नभसा विहायसि वा = नभसि वा गतिर्विहायोगतिः, तद्धेतुत्वान्नामकर्माऽपि विहायोगतिनाम। **ननु** पक्षिणामिवाऽऽकाशे गमनाऽभावान्मनुष्याऽऽदीनां विहायोगतिनामकर्मोदयो न स्याद्, यदि पुनर्भण्यते, आकाशस्याऽवगाहनागुणत्वात् सर्वेषामपि विहायसा गतिः सम्भवत्येव तदा त्वाकाशस्य सर्वगत्वेन तदन्यत्र गमनाऽभावाद् विहायोविशेषणं वैयर्थ्यं भवेत्, व्यवच्छेद्याऽभावा**दिति चेत्; उच्यते-** मनुष्याऽऽदीनामप्याकाशस्याऽवगाहनोपकारकत्वाद् विहायस्येव गतिर्भवति, न च विशेषणस्य वैयर्थ्यापत्तिः, यतो यदि विहाय इति विशेषणं विना गतिरित्येवोच्येत तर्हि नाम्नः प्रथमप्रकृतिरपि गतिरस्तीति पौनरुक्त्याशङ्का स्यात्, ततस्तद्व्यवच्छेदार्थं विहायोविशेषणमुपन्यस्तम्, विहायसा गतिः न तु नारकत्वाऽऽदिपर्यायपरिणतिरूपा भवसम्बन्धिनी गतिः, विहायोगतिः तद्विपाकवेद्या कर्मप्रकृतिरपि कारणे कार्योपचाराद् विहायोगतिः, सा च तन्नाम च विहायोगतिनाम ।

तच्च द्विविधम्, प्रशस्ताऽप्रशस्तभेदात् ।

**तत्त्वार्थभाष्यकृतस्तद्वृत्तिकाराश्च** भव-विद्याऽऽदिप्रत्ययाऽऽकाशगमनलब्धिरपि विहायोगतितया भणिता ।

**तथा चाऽत्र तत्त्वार्थभाष्यम्-** ''लब्धिशिक्षर्द्धिप्रत्ययस्याऽऽकाशगमनस्य जनकं विहायोगतिनाम ।''(अ.८. सू. १२./ भा.२, पत्र. १५८) इति ।

**तस्य च श्रीसिद्धसेनगणिकृतवृत्तिः-** ''विहायः= आकाशः, तत्र गतिर्विहायोगतिः । सा द्विधा, शुभा च अशुभा च । तत्र प्रशस्ता हंस-गज-वृषाऽऽदीनाम् । अप्रशस्ता तूष्ट्र-टौल-शृगालाऽऽदीनाम् । तत्र लब्धिर्देवादीनां देवत्वोत्पत्त्यविनाभाविनी शिक्षाया ऋद्धिः शिक्षर्द्धिः तपस्वीनां प्रवचनमधीयानानां विद्याद्यावर्तनप्रभावात् वाऽऽकाशगमनस्य लब्धिशिक्षर्द्धिहेतोर्जनकं विहायोगतिनामेति'' (अ. ८, सू. १२/भा. २, पत्र. १५८) इति ।

सिद्धिं गच्छतां जीवानां पुद्गलानाञ्च गतिः स्वाभाविकी, न पुनर्विहायोगतिनामकर्मोदयनिमित्ता ॥१०॥

साम्प्रतं भणितानां गत्यादिप्रकृतीनां संज्ञां सङ्ख्याञ्च भणन् प्रत्येकप्रकृतीरपि सङ्ख्याकथनयुताः प्रतिपादयितुमना ग्रन्थकारः प्राहैकगाथया -

**पिंडपयडित्ति चउदस, तह अगुरुलहू-वघाय-परघाया ।**
**उस्सास- आय-वुज्जोअ- निमिण-तित्थमड पत्तेया ॥११॥**

(प्रे०) "**पिंड०**" इत्यादि, 'पिण्डप्रकृतयः' अन्तरोक्तैर्गतिनामाऽऽदिभिः पदैर्वक्ष्यमाणनरकाऽऽदिचतुरादिभेदानां पिण्डितानां प्रतिपादनात् पिण्डप्रकृतय उच्यन्ते, अनेकाऽवान्तरभेदपिण्डाऽऽत्मकाः प्रकृतयः पिण्डप्रकृतय इति व्युत्पत्तेराश्रयणात् ।

**इदमुक्तं भवति-** पिण्डः अनेकप्रकृतिसंदोहः, तद्रूपाः प्रकृतयः पिण्डप्रकृतयः ताश्च 'इति' अनेन प्रकारेण = अनन्तरप्रतिपादितगाथोक्तगत्यादिनामग्रहेण 'चतुर्दश' चतुर्दशसङ्ख्याका भवन्ति ।

**यदाह सप्ततिकावृत्तौ श्रीमन्मलयगिरिसूरिपादैः-** "एताश्च गत्यादयो विहायोगतिपर्यन्ताश्चतुर्दश प्रकृतयः शास्त्रान्तरे पिण्डप्रकृतय इति विश्रुताः, अनेकाऽवान्तरभेदपिण्डाऽऽत्मकाः प्रकृतयः पिण्डप्रकृतय इति व्युत्पत्तेः" (गा. ५/पत्र. १५३ / १७७) इति ।

नन्वन्यत्र **बन्धशतकचूर्णि-तत्त्वार्थवृत्ति-तत्त्वार्थभाष्यवृत्त्यादिषु** पिण्डप्रकृतयो द्विचत्वारिंशद् भणिताः ।

**उक्तञ्च बन्धशतकचूर्णौ-** "णामकम्मस्स बायालीसं पिंडपगडीओ, तं जहा-गइणामं जाइणामं सरीरणामं सरीरसंघायनामं सरीरबंधणनामं सरीरसंठाणनामं, सरीरअंगोवंगसरीरसंघयणवन्नगंधरसफासआणुपुव्विअगुरुलहुगउवघायपराघायउस्सासआयावुज्जोअविहायगइतसथावरबायरसुहुमपज्जत्तगअपज्जत्तगपत्तेयसाहारणसरीरथिरअथिरसुभअसुभसुभगदुभगसुस्सरदुस्सरआएज्जअणाएज्जजसकित्तिअजसकित्तिणिम्माणतित्थगरणामं चेति । पिंडपगइ त्ति मूलमेओ ।" (गा० ३९ / पत्र. ५४) इति ।

**न च** गत्यादिचतुर्दशप्रकृतीर्विहायाऽन्येषामवाऽन्तरभेदाऽभावात्कथं पिण्डप्रकृतिता सम्भवति, व्युत्पत्तेर्लक्षणस्य च तत्राऽभावा**दिति वाच्यम्,** यतोऽत्रैवाऽन्तरोक्तश्री**बन्धशतकचूर्णिपाठे-** "पिंडपगइ त्ति मूलभेओ" इत्युक्तम्, अतः पिण्डप्रकृतीनां मूलभेदत्वादवश्यं तासामुत्तरभेदा अपि सम्भवन्ति । **यदुक्तं श्रीतत्त्वार्थभाष्ये-**

"इत्येतद् द्विचत्वारिंशद्विधं मूलभेदतो नामकर्म भवति । उत्तरनामाऽनेकविधम् ।" (अ. ८, सू. १२/भा. २, पत्र. १४९) इति ।

यथा त्रसत्वसामान्यस्याऽवान्तरभेदानां पतङ्ग-षट्पद-हस्ति-तुरङ्ग-हरणत्वाऽऽदीनां सम्भवात्पिण्डत्वमस्ति, एवमन्यासामपि प्रकृतीनां ज्ञेयम् ।

**उक्तञ्च श्रीबन्धशतकचूर्णिटिप्पनके-** "पिंडो बहुप्रकृतिसंदोहः, तद्रूपाः प्रकृतयः पिण्डप्रकृतयो गत्यादिवत् **न चै**वं त्रसस्थावराऽऽदिप्रकृतीनामैकैकत्वेनाऽपिण्डप्रकृतित्व**माशङ्कनीयम्,** त्रसत्वाऽऽदिसामान्यभेदेऽपि पतङ्ग-भृङ्ग-मातङ्ग-तुरङ्गत्वाऽऽदीनां तदन्तर्भेदनिबन्धनत्वेन तासामपि पिण्डत्वात् । अन्यथा आसामेकरूपत्वे तन्निमित्तस्य त्रसत्वाऽऽदेर्भेदो न स्यात् ।" (गा. ३९ / पत्र. ५४) इति ।

गति-जात्याद्यवान्तरप्रकृतयोऽपि पिण्डप्रकृतयः सन्ति, तासामप्यवान्तरभेदलाभात् । यथासंभवमवान्तरपिण्डप्रकृत्यवान्तरप्रकृतयोऽपि पिण्डप्रकृतयो भवन्ति, तासामपि यथासंभवमवान्तरभेदसम्भवात् । **तद्यथा-** जातिपिण्डप्रकृतेरवान्तरपिण्डप्रकृतयः पञ्च, एकेन्द्रियाऽऽदिभेदात्, एकेन्द्रियजातेरवान्तरप्रकृतयः पुनः पृथ्वीकायाऽऽदिभेदाः, पृथ्वीकायस्याऽवान्तरभेदाः, शुद्धपृथ्वी-शर्करा-वालुको-पल-शिला-लवणाऽऽदयोऽनेके, अप्कायस्याऽप्युपक्लेदा-ऽवश्याय-नीहार-हिमादयोऽनेके भेदा इत्यादि । एवं द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियजातीनामप्यवान्तरभेदाः सन्ति । **उक्तञ्च तत्त्वार्थभाष्ये-** "जातिनाम्नो मूलभेदाः पञ्च । **तद्यथा-**एकेन्द्रियजातिनाम, द्वीन्द्रियजातिनाम, त्रीन्द्रियजातिनाम, चतुरिन्द्रियजातिनाम, पञ्चेन्द्रियजातिनाम ।

एकेन्द्रियजातिनामाऽनेकविधम् । **तद्यथा-**पृथ्वीकायिकजातिनाम, अप्कायिकजातिनाम, तेजःकायिकजातिनाम, वायुकायिकजातिनाम, वनस्पतिकायिकजातिनामेति । तत्र पृथ्वीकायजातिनामाऽनेकविधम् । **तद्यथा-**शुद्धपृथिवी-शर्करा-वालुको-पल-शिला-लवणा-ऽय-स्त्रपु-ताम्र-सीसक-रूप्य-सुवर्ण-वज्र-हरिताल-हिङ्गुलक-मनःशिला-सस्यका-ऽञ्जन-प्रवालका-ऽभ्रपटा-ऽभ्रवालिकाजातिनामाऽऽदि-गोमेदक-रुचकाङ्क-स्फटिक-लोहिताक्ष-जलावभास-वैडूर्य-चन्द्रप्रभ-चन्द्रकान्त-सूर्यकान्त-जलकान्त-मसारगल्वा-ऽश्मगर्भ-सौगन्धिक-पुलका-ऽरिष्ट-काञ्चन-मणिजातिनामादि च । अप्पकायिकजातिनामाऽनेकविधम् । **तद्यथा-**'' (अ.८, सू.-१२/भा. २, पत्र. १५०-१५१) इत्यादि । **इति चेत्, सत्यम्,** किन्तु यदा गत्यादिचतुर्दशाऽतिरिक्त-प्रकृतीनामप्यवान्तरभेदानाश्रित्य भण्यते, तदा पिण्डप्रकृतानां द्विचत्वारिंशद्विधता प्राप्यते । यदि पुनर्गत्यादिचतुर्दशाऽतिरिक्त-प्रकृतीनां त्ववान्तरप्रकृतिभेदा न विवक्ष्यन्ते, तर्हि तु चतुर्दश प्रकृतयः पिण्डप्रकृतयो भवन्ति । अत एव विवक्षाविशेषमधिकृत्येह चतुर्दश पिण्डप्रकृतयो भणिताः, गत्यादिचतुर्दशाऽतिरिक्तप्रकृत्युत्तरभेदानामत्राऽभण्यमाणत्वात् । तथैव **नव्यकर्मविपाकाऽऽदि**शास्त्रेष्वपि विवक्षावशेन चतुर्दशपिण्डप्रकृतय उक्ताः । ततश्चतुर्दश गत्यादयः पिण्डप्रकतयः, अवान्तरभेदभावेनाऽनेकविधत्वात् । शेषा अष्टाविंशतिप्रकृतयः प्रत्येकप्रकृतयः, अवान्तरभेदानामभावेनैकविधत्वात् । **उक्तञ्च पञ्चसंग्रहवृत्तौ श्रीमलयगिरिपादैः-** ''नामकर्मणः प्रकृतयः प्ररूपयितव्याः, ताश्च द्विधा, पिण्डप्रकृतयः प्रत्येकप्रकृतयश्च ।'' (द्वा. ३, गा. ६/भा. १, पत्र. ११३-२ ) इति ।

**ननु** प्राक् पिण्डप्रकृति - प्रत्येकप्रकृति-सप्रतिपक्षप्रकृतिभेदात्त्रिधा नामप्रकृतयो भणिताः अधुना पुनः पिण्डप्रकृति-प्रत्येकप्रकृतिभेदाद् द्वेधा भणिता इति कथं न विरोध **इति चेत्, उच्यते-** विवक्षाविशेषान्न कश्चिद्दोषः, यतो यदाऽप्येकाऽनेकप्रकृत्यात्मकत्वेन पिण्डप्रकृति-प्रत्येकप्रकृतिभेदान्नामप्रकृतिर्द्विविधा भण्यते, तदाऽपि प्रत्येकप्रकृतिः सप्रतिपक्षाऽप्रतिपक्षभेदाद् द्विधा भवति । **यदाह श्रीपञ्चसंग्रहवृत्तौ श्रीमलयगिरिसूरिपादैः-** ''सम्प्रति प्रत्येकप्रकृतयो वक्तव्याः, ताश्च द्विधा सप्रतिपक्षा अप्रतिपक्षाश्च ।'' (द्वा. ३, गा. ७ / भा. १, पत्र. ११५-२) इति ।

**उक्तञ्च श्रीमहामहोपाध्यायशोविजयैरपि कर्मप्रकृतिवृत्तौ-** ''उक्ता पिण्डप्रकृतय, एतासां चाऽवान्तरभेदाः पञ्चषष्टिः, अथ प्रत्येकप्रकृतयो वक्तव्याः, ताश्च सप्रतिपक्षा अप्रतिपक्षाश्चेति द्विधा ।'' (गा. १/ पत्र. ७-१ ) इति ।

**तथा लोकप्रकाशग्रन्थेऽपि-** (द्र. लो.स. १०/ पत्र. १२२-२) (पु. भा. १, पत्र. ५०७) इति ।

''एवं भेदाः पञ्चषष्टिः, पिण्डप्रकृतिजाः स्मृताः । पञ्चानामौदारिकाऽऽदि - बन्धनानां विवक्षया ॥१९८॥
सा पञ्चषष्टिरष्टा- विंशत्या प्रकृतिभिः पुरोक्ताभिः । प्रत्येकाभिर्युक्ताः , स्युर्नाम्नस्त्रिनवतिर्भेदाः ॥१९९॥'' इति ।

यदि पुनः सप्रतिपक्षाः प्रकृतयः प्रत्येकप्रकृत्यवान्तरभेदतया न विवक्ष्यन्ते किन्तु नामकर्ममूलभेदतया अधिक्रियन्ते, तर्हि पिण्डप्रकृति-प्रत्येकप्रकृति-सप्रतिपक्षप्रकृतिभेदान्नामप्रकृतिस्त्रिविधा जायते । **तथा श्रीरामदेवगणिप्रणीते सूक्ष्मार्थविचारसारप्रकरणटिप्पनकेऽभिहितम् -** ''पिण्डपयडीओ पत्तेयपयडीओ य दंसियाओ । इयाणिं सविवक्खाओ पगईओ दंसेइ - ''(गा.७-९/पत्र.३) इति । तदा च प्रत्येकप्रकृतितया केवला अप्रतिपक्षा अष्टावेव प्रकृतयो भवन्ति । **उक्तञ्च नव्यकर्मविपाके-** ''पिण्डपयडित्ति चउदस .......................अट्ठ पत्तेया ॥'' (गा. २५/ पत्र.४०) इति । **एवमेवाऽक्षरशः सूक्ष्मार्थविचारसारप्रकरणेऽपि । तथा पञ्चसंग्रहेऽपि-** ''चोद्दस अड पिंडपत्तेया ॥७॥'' (द्वा. ३/भा. १, पत्र.११५-२) इति । **तथा नव्यकर्मविपाकस्वोपज्ञवृत्तौ -** ''अष्टौ प्रत्येकप्रकृतीराह— ।....... व्याख्याताः पिण्डप्रकृतीनामुत्तरभेदाः, साम्प्रतमष्टौ प्रत्येकप्रकृतीरभिधित्सुराह - .....व्याख्याता अष्टौ प्रत्येकप्रकृतयः ।'' (गा. २४-४२-४७/पत्र. ४०/४६-५३/६१-५५/६४) इत्यादि ।

यदा गत्यादिचतुर्दशपिण्डप्रकृतीनामुत्तरभेदानां विवक्षा न क्रियते तदा नामकर्मणो गत्यादिद्विचत्वारिंशद्भेदा भवन्ति । **तद्यथा-**चतुर्दशपिण्डप्रकृतयः, अष्टौ प्रत्येकप्रकृतयः, विंशतिः सप्रतिपक्षप्रकृतयश्चेति । यदा तु गत्यादिचतुर्दशपिण्डप्रकृतीनामवान्तरभेदाः पञ्चसप्ततिर्विवक्ष्यन्ते तदा नामकर्मणस्त्र्युत्तरशतं प्रकृतयो भवन्ति, **तद्यथा-**पञ्चसप्ततिपिण्डप्रकृतयः, अष्टौ प्रत्येकप्रकृतयः विंशतिः सप्रतिपक्षप्रकृतयश्चेति । यदा बन्धनानि पञ्चदशस्थाने पञ्चैव गृह्यन्ते तदा नामकर्मणस्त्रिनवतिर्भेदा जायन्ते, पिण्डप्रकृतीनां पञ्चषष्टेर्भावात् । यदा तु बन्धनसंघातनाम्नां शरीरनामस्वेव समावेशः क्रियते, पृथग्न विवक्ष्यते, तथा वर्णाऽऽदिचतुष्कस्याऽप्यवान्तरभेदा नाऽधिक्रियन्ते तदा नामकर्मण उत्तरप्रकृतयः सप्तषष्टिर्भवन्ति, पिण्डप्रकृतीनामेकोनचत्वारिंशद्विधत्वात् । **उक्तञ्च नव्यकर्मविपाके –**

"........................नामकम्म चित्तिसमं । बायालतिनवइविहं, तिउत्तरसयं च सत्तट्ठी ॥२३॥" (पत्र. ३८/ ४४ ) इति ।

**वृहत्कर्मविपाकेऽपि -**

"गइयाइएसु जीवं, नामइ भेएसु जं तओ नामं । तस्स उ बायालीसं, भेया अहवावि सत्तट्ठी ॥६९॥
अहवा वि हु तेणउई, भेया पयडीण हुंति नामस्स । अहवा तिउत्तरसयं, सव्वे वि जहक्कमं भणिमो ॥७०॥" इति ।

तदेवमुक्ताः पिण्डप्रकृतयः । सम्प्रति प्रत्येकप्रकृतीर्व्याख्यातुमुपक्रमते — **"तह"** इत्यादि, 'तथा' तथाशब्दः समुच्चये । **"अगुरुलघूपघातपराघातानि"** इहाऽपि सर्वत्र नाम्नः प्रक्रमाद् नामशब्दः सम्बन्धनीयः । **तद्यथा-**अगुरुलघुनाम, उपघातनाम, पराघातानाम च । तत्र यदुदयवशाज्जीवानां कुब्जाऽऽदीनां सर्वेषां शरीराणि न गुरूणि, शिंशपादिसारवत्, नाऽपि लघून्येरण्डकाष्ठवद्; नाऽपि गुरूलघूनि, किन्त्वगुरुलघुपरिणामपरिणतानि जायन्ते तद् अगुरुलघुनाम ।

**उक्तञ्च श्रीवन्धशतकचूर्णौ-** "अगुरुलहुत्ति-णो गुरु णो लहु णो गुरुलहु अगुरुलहु । जस्सोदयाओ अगुरुलहुत्तं सव्वेसिं जीवाणं अप्पप्पणो सरीरं ण गुरुगं च ण लहुगं (ण गुरुलहुगं) अगुरुलहुगं ।" (गा. ३९ / पत्र. ५७) इति ।

**तथा वृहत्कर्मविपाकेऽपि –**

"गुरुयं न होइ देहं, न य लहुयं होइ सव्वजीवाणं । होइ हु अगुरुलहुयं, अगुरुलहुयनामउदएणं ॥११८॥" इति ।

**नव्यकर्मग्रन्थेऽपि -** "अंगं न गुरु न लहुयं, जायइ जीवस्स अगुरुलहुउदया ।" (गा. ४६/ पत्र. ५४/६३ ) इति ।

**तथाऽन्यत्राऽपि -** (सू. वि. सा. प्र. गा. १८ वृ. पृ. १०)

न य गुरुयं न य लहुयं, उदएणं होइ जस्स कम्मस्स । जीवस्स इह सरीरं, तं नामं अगुरुलहुगं तु ॥ ॥" इति ।

**तथा श्रीतत्त्वार्थभाष्यवृत्तावपि-** "अगुरुलघ्वित्यादि । परिणामत्रयस्याऽत्र निषेधो विवक्षितो गुरुत्व-लघुत्व-गुरुलघुत्वाऽऽख्यस्य ।" (अ. ८, सू. १२/भा. २, पत्र. १५६) इति **निश्चयनया**ऽपेक्षयैवं सर्वशरीराणि गुरुकाऽऽदिव्यपदेशं न लभन्ते, **व्यवहारनया**ऽनुसारेण त्वन्योन्याऽपेक्षया पुनर्गुर्वादित्रिविधान्यपि भवन्ति ।

**उक्तञ्च वृहत्कल्पे -** (भा. १, पत्र. २२/गा. ६५) (भ. श. १, उ.९, सू. ७३/अभय. भा. १, पत्र. ९६-१)
"**णिच्छय**ओ सव्वगुरुं, सव्वलहुं वा ण विज्जते दव्वं । **ववहार**तो तु जुज्जइ, बायरखंधेसु णऽण्णेसु ॥ ॥" इति ।

**तथैव तत्त्वार्थभाष्यवृत्तावपि -** "सर्वशरीराणि च **निश्चयनय**वृत्त्या न गुरुकाऽऽदिव्यपदेशभाञ्जि । **व्यवहारनयात्** त्वन्योऽन्याऽपेक्षया त्रैविध्यमनुरुध्यते ।" (अ. २, सू. १२/भा. २, पत्र. १५६) इति ।

**तथा विशेषाऽऽवश्यकभाष्येऽपि -**

''गुरुयं लहुयं उभयं, नोभयमिति **वावहारियनयस्स**। दव्वं लेट्टुं दीवो, वाऊ वोमं जहासंखं ॥६५९॥
**निच्छयओ** सव्वगुरुं, सव्वलहुं वा न विज्जए दव्वं । बायरमिह गुरुलहुयं, अगुरुलहुं सेसयं सव्वं ॥६६०॥'' इति ।

**तथा शतकचूर्णावपि -** ''अगुरुलहुगं पञ्चविहं पि सरीरं **णिच्छया**ओ गुरुगं लहुगं गुरुलघु वा ण भवइ, किन्तु अन्नोन्नाऽवेक्खाए तिन्नि वि सम्भवन्ति ।'' (गा. ३९/पत्र. ५७) इति । एकान्तगुरुत्वे हि शरीराणि वोढुमशक्यानि स्युः, एकान्तलघुत्वे पुनर्मरुताऽपह्रियमाणानि धारयितुं न पार्येरन् ।

**न च** कर्मसामान्यस्याऽभावेनाऽगुरुलघुनामकर्माऽभावाद् धर्मास्तिकायाऽऽदीनामगुरुलघुता न स्यादित्यापत्तिरिति **शङ्कनीयम्**, यतो धर्मास्तिकायाद्यजीवानामनादिपारिणामिका सिद्धानां जीवानां पुनः कर्मोदयजन्यरहिता स्वाभाविकी भवति, सा चाऽन्यत्र विस्तरेण प्रपञ्चिता । संसारिजीवानां पुनरनादिकर्मोदयाऽपेक्षयाऽगुरुलघुताऽस्ति ।

उपहन्यते = विनाश्यते जन्तुः स्वशरीराऽङ्गाऽवयवैः प्रतिजिह्वाऽऽदिभिरित्युपघातः तन्निबन्धनं नामोपघातनाम = यदुदयवशात्स्वशरीरान्तःप्रवर्धमानैः प्रतिजिह्वा-गलवृन्द-लम्बक-चौरदन्ताऽऽदिभिरुपहन्यते तद् उपघातनाम ।

**यदुक्तं बृहत्कर्मविपाके—**

''अंगावयवो पडिजिब्भियाइ जो अप्पणो उवग्घायं। कुणइ हु देहम्मि ठिओ, सो उवघायस्स उ विवागो ॥११९॥'' इति ।

**भणितं नव्यकर्मविपाकेऽपि -** ''उवघाया उवहम्मइ, सतणुवयवलंबिगाऽऽईहिं ॥४७॥'' (पत्र. ५४/६३) इति ।

**एवमन्यत्राऽपि -** (सू. वि. सा. प्र. गा. १८ / वृ. पृ. १०)

''देहम्मि वट्टमाणो, अंगाऽवयवो उ अप्पणो जो उ । वट्टइ इह उवघाए , तं उवघायं भवइ कम्मं ॥ ॥'' इति ।

**यद्वा** यदुदयात्स्वयंकृतोद्बन्धन-भृगुपाताऽऽदिभिर्भयाऽऽदिभिश्च प्राणिरुपहन्यते, तदुपघातनाम । **यदुक्तं श्रीमन्मलयगिरिसूरिभिः पञ्चसंग्रहवृत्तौ –** ''**यद्वा** स्वयंकृतोद्बन्धनभैरवप्रपाताऽऽदिभिस्तदुपघातनाम ।'' (द्वा. ३, गा. ७ / भा.१, पत्र. ११५-२) इति ।

**तथैव श्रीमहामहोपाध्याययशोविजयैः कर्मप्रकृतिवृत्तावपि भणितम् । तथा च तद्ग्रन्थः-** (गा. १ / पत्र. ७-१)

''यदुदयात्स्वशरीराऽवयवैरेव प्रतिजिह्वागलवृन्दलम्बकचौरदन्ताऽऽदिभिर्जन्तुरुपहन्यते स्वयंकृतोद्बन्धनभैरवप्रपाताऽऽदिभिर्वा तदुपघातनाम ।'' इति ।

**बन्धशतकचूर्णिकाराऽऽद्यभिप्रायेण** तु यदुदयात् परैरनेकधोपघातः क्रियते तदुपघातनाम ।

**तदक्षराणि त्वेवम्-** '' 'उवघायं' ति जस्सोदएण परेहि अणेगहा घाइज्जति ।'' (गा. ३९ पत्र. ५७) इति ।

**तथा श्रीतत्त्वार्थभाष्यवृत्तावपि प्रोक्तम्-** (अ. ८, सू. १२/ भा. २, पत्र. १५७)

''शरीराऽङ्गानामुपाङ्गानां न यथोक्तानां यस्य कर्मण उदयात् परैरनेकधोपघातः क्रियते तदुपघातनाम ।'' इति । **केचित्पुनरेवमाहुः-** यस्योदयेन जीवः स्वपराक्रमस्योपघातं जनयति, समर्थदेहोऽपि पुरुषो निर्वीर्यमासाद्यते स्वविजयं चोपहन्ति, विजितेऽप्यस्मिन् नैव विजित इति व्यपदेशहेतुतां प्रतिपद्यते, अन्यदपि यदुद्भूतं कर्म तदप्युपहन्यत इति ।

**यदाह तत्त्वार्थभाष्यकारः-** ''स्वपराक्रम-विजयाद्युपघातजनकं वा ॥'' (अ. ८, सू. १२ / भा. २, पत्र. १५७) इति ।

परान् आहन्ति = परिभवति, पराघातः 'कर्मणोऽण्' (सिद्धहेम०-५-१-७२) इत्यनेन कर्तर्यणप्रत्ययः ''ञ्णिति घात्'' (सिद्धहेम०- ४-३-१००) इत्यनेन हन्धातोः 'घात्' इत्यादेशः । **यद्वा** परैर्न हन्यते = नाऽभिभूयत इति पराघातः ''भावा-ऽकर्त्रोः'' (सिद्धहेम०-५-३-१८) इत्यनेन घञ्प्रत्ययः, तद्धेतुत्वान्नामाऽपि पराघातनाम = यदुदयवशात् परेषां दुष्प्रधर्षो महौजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महाभूपसभायामपि गतः सभ्यानामपि त्रासमुत्पादयति प्रतिपक्षस्य प्रतिभाप्रतिघातसंक्षोभाऽऽदिकं करोति तद् ।

**यदुक्तं श्रीनव्यकर्मविपाके-** "परघाउदया पाणी, परेसि बलिणं पि होइ दुद्धरिसो ।" (गाथा. ४३/पत्र. ५३/६१) इति ।

**तथा तत्त्वार्थभाष्ये -** "परत्रासप्रतिघाताऽऽदिजनकं पराघातनाम" (अ. ८, सू. १२/ भा. २ पत्र. १५७) इति ।

**तथा चाऽत्र भाष्यवृत्तिः-** (अ. ८, सू. १२/ भा. २, पत्र. १५७)

"परत्रासेत्यादि । यस्य कर्मण उदयात् कश्चिद् दर्शनमात्रेणैवौजस्वी वाक्सौष्ठवेनाऽन्यां सभामप्यभिगतः सभ्यानामपि त्रासमापादयति परप्रतिभाप्रतिघातं वा करोति तत्पराघातनाम । आदिग्रहणात् संक्षोभदृष्टिगतिस्तम्भनपरिग्रहः" इति ।

**अन्ये तु प्राचीनकर्मग्रन्थकाराऽऽदयः-** यदुदयात् त्वग्विष-दन्तविषाऽऽदिस्वाऽङ्गाऽवयवेनाऽन्येषां जीवानां घातं विधत्ते तत्पराघातनाम ।

**यदाह प्राचीनकर्मविपाकग्रन्थे–**

"तयविसदंतविसाई, अंगावयवो य जो उ अन्नेसिं । जीवाण कुणइ घायं, सो परघायस्स उ विवागो ॥१२०॥" इति ।

**तथाऽन्यत्राऽपि -** (सू. वि. सा. प्र. गा. १८ वृ. / पृ. १०)

"देहम्मि वट्टमाणो, अंगाऽवयवो उ जो उ अण्णेहि । जीवाण कुणइ घायं, तं परघायं हवइ कम्मं ॥" इति ।

**केचित्तु बन्धशतकचूर्णिकाराऽऽदयः-** अनेकधा परमुपहन्ति तत्पराघातनामेति वदन्ति ।

**तथा श्रीबन्धशतकचूर्णावपि-** "पराघाओ = जस्सोदयाओ जीवो अणेगहा परं हणइ ।" (गा. ३९/ पत्र. ५७) इति ।

**"उस्सास०"** इत्यादि, 'उच्छ्वासाऽऽतपोद्योतनिर्माणतीर्थम्' समाहारद्वन्द्वः, उच्छ्वासनाम, आतपनाम, उद्योतनाम, निर्माणनाम, पदैकदेशे पदसमुदायोपचारात् तीर्थकरनाम । तत्र उच्छ्वसनम् उच्छ्वासः भावे घञ्प्रत्ययः, तत्कारणं नाम उच्छ्वासनाम = यदुदयादात्मनः श्वासोच्छ्वासलब्धिः, प्राणापानपुद्गलग्रहणसामर्थ्यलक्षणोपजायते तद् ।

**उक्तञ्च तत्त्वार्थभाष्ये–** "प्राणापानपुद्गलग्रहणसामर्थ्यजनकमुच्छ्वासनाम" (अ. ८, सू. १२/ भा. २, पत्र. १५७) इति ।

**तथा नव्यकर्मविपाके –** "ऊससणलद्धिजुत्तो, हवेइ ऊसासणामवसा ॥४३॥" (पत्र. ५३/ ६१ ) इति ।

**तथा प्राचीनकर्मविपाके-**

▲ "जस्सुदएणं जीवे, निप्फत्ती होइ आणपाणूणं । तं ऊसासं नामं, तस्स विवागो सरीरम्मि ॥१२४॥" इति ।

**तथाऽन्यत्राऽपि-** "जस्सुदएणं जीवे, निप्फत्ती होइ आणपाणूणं । तं ऊसासं नामं, तस्सुदओ पज्जत्तजीवम्मि ॥ ॥" इति ।

**न च** लब्धीनां क्षायोपशमिकभावाद् औदयिकलब्धिर्न संभव**तीति वाच्यम्** । यतो बह्वीनां लब्धीनां क्षायोपशमिकभावे सम्भवेऽपि न सर्वा अपि लब्धयः क्षायोपशमिकभावजन्या एव । किन्त्वौदयिकाऽऽदिभावजा अपि यथासंभवं सन्ति । यथा क्षायिकभावभवा क्षायिकसम्यक्त्व-क्षीणमोहत्व-सिद्धत्वाऽऽदयः, औपशमिकभावोत्था औपशमिकसम्यक्त्वो-पशान्तमोहत्वाऽऽदिकाः, तथौदयिकभावसमुत्था वैक्रिया-ऽऽहारकशरीरकरणाऽऽदिका इवोच्छ्वासलब्धिरप्यौदयिकभावजनिताऽस्ति ।

**उक्तञ्च विशेषाऽऽवश्यकभाष्ये–**

"उदय-खय-खओवसमो-वसमसमुत्था बहुप्पगाराओ । एवं परिणामवसा, लद्धीओ होंति जीवाणं ॥८०१॥" इति ।

एवमौदयिकत्वे सत्यपि वीर्याऽन्तरायक्षयोपशमोऽपि निमित्तीभवत्यतः क्षायोपशमिकत्वव्यपदेशोऽपि न विरुध्यते ।

**यदाह देवेन्द्रसूरिपादैः स्वोपज्ञकर्मविपाकवृत्तौ -** (गा. ४३/पत्र. ५३/६२)

"सर्वलब्धीनां क्षायोपशमिकत्वाद् औदयिकी लब्धिर्न सम्भवतीति चेत्, नैतदस्ति, वैक्रिया-ऽऽहारकलब्धीनामौदयिकीनामपि सम्भवाद्, वीर्यान्तरायक्षयोपशमोऽपि चाऽत्र निमित्तीभवतीति सत्यप्यौदयिकत्वे क्षायोपशमिकव्यपदेशोऽपि न विरुध्यते ।" इति ।

---

▲ एषा चैव गाथा ***सूक्ष्मार्थविचारसारप्रकरणवृत्तौ*** केवलमन्त्यगाथाचरणस्त्वेवम् - *"तस्सुदओ पज्जत्तजीवम्मि ॥"* (गा. १८ / पृ. १०) इति ।

आतपतीति आतपः "लिहाऽऽदिभ्यः" (सिद्धहेम०-५-१-५०) इत्यनेन "अच्" (सिद्धहेम०- ५-१-४९) इत्यनेन वा अच्प्रत्ययः, **यद्वा** आतप्यतेऽनेनेत्यातपः "पुन्नाम्नि घः" (सिद्धहेम०-५-३-१३०) इत्यनेन करणे घप्रत्ययः, **यद्वा** "व्यञ्जनाद् घञ्" (सिद्धहेम०-५-३-१३२) इत्यनेन करणे संज्ञायां घञ् । तत्कारणं कर्म आतपनाम = यदुदयवशाज्जन्तु-शरीराण्यात्मनाऽनुष्णान्यप्युष्णप्रकाशरूपमातपं कुर्वन्ति तद् । अत्र आङो मर्यादावचनत्वात्सहस्रांशुमण्डलपृथ्वीकायिकेष्वेव तद्विपाको जायते, न पुनरन्यत्र वह्न्यादिषु, वह्नौ ह्युष्णत्वमुष्णस्पर्शनामोदयाद् उत्कटलोहितवर्णोदयाच्च प्रकाशत्वमिति न तत्राऽऽतपनामोदयादुष्णप्रकाशवत्त्वमिति ।

● **यदाहुः प्राचीनकर्मविपाकग्रन्थकाराः:-**

"जस्सुदएणं जीवे, होइ सरीरं तु ताविलं इत्थ । सो आयवे विवागो, जह रविबिंबे तहा जाण ॥१२५॥
न भवइ तेयसरीरे, जेण उ तेयस्स उसिणफासस्स । होइ हु उदओ णियमा, तह लोहियवण्णनामस्स ॥१२६॥" इति ।

**तथा नव्यकर्मविपाकेऽपि** — (पत्र. ५३/ )

रविबिंबे उ जियंगं, तावजुयं आयवाउ न उ जलणे । जमुसिणफासस्स तहिं, लोहियवन्नस्स उदउत्ति ॥४४॥" इति ।

**तथाऽन्यत्राऽपि -**

"जस्सुदएणं जीवे, होइ सरीरं तु ताविलं इत्थ । तं आयवमिह नामं, तस्स विवागो उ रविबिंबे ॥ ॥"इति ।

उद्योतनम् उद्योतः, भावे घञ्, **यद्वा** उद्योतते इत्युद्योतः (लिहादित्वात्) कर्तर्यच्प्रत्ययः, **यद्वा** उद्योतंतेऽनेनेत्युद्योतः करणे संज्ञायां पुंलिङ्गे घप्रत्ययो (घञ्प्रत्ययो वा) भवति । तद्धेतुकं नाम उद्योतनाम, यदुदयवशाज्जीवशरीराण्यनुष्णप्रकाशरूपमुद्योतमातन्वन्ति, यथा यतिदेवोत्तरवैक्रिय-चन्द्र-ग्रह-नक्षत्र-तारा-रत्न-औषधयः, तद् उद्योतनाम । ★ **उक्तञ्च वृहत्कर्मविपाके** —

"जस्सुदएणं जीवो, अणुसिणदेहेण कुणइ उज्जोयं । तं उज्जोयं नामं, जाणसु खज्जोयमाईणं ॥१२७॥" इति ।

**तथा नव्यकर्मविपाकेऽपि** - (पत्र. ५४/६२)

"अणुसिणपयासरूवं, जियंगमुज्जोयए इहुज्जोआ । जइदेवुत्तरविक्किय-जोइसखज्जोयमाइ व्व ॥४५॥" इति ।

देवानां भवधारणीये शरीरे यः प्रकाशो भवति, स नोद्योतनामकर्मोदयाऽपेक्षया किन्तु प्रकर्षवर्णनामकर्मोदयात् ।

**प्रतिपादितञ्च श्रीमन्मुनिचन्द्रसूरिपादैः कर्मप्रकृतिटिप्पनके-**

"तत्र भवधारणीये अत एव वचनान्नाऽस्ति उद्योतनामकर्मोदयः । किन्तु तेषु यः प्रकाशः, स वर्णनामजनित-शरीरकृष्णाऽऽदिवर्णप्रकर्षप्रभवो यथा तीर्थकराणां भामण्डलरूपः प्रकाशः" (उदी. गा. १३/ पत्र. ३०१) ★ इति ।

---

● **सूक्ष्मार्थविचारसारवृत्तिकारा**स्त्वग्न्यादिष्वप्यातपनामोदयमिच्छन्ति । **अन्याऽऽचार्य**मतेन च सूर्यविमानपृथ्वीकायिकेष्वेवाऽऽतपनाम्न उदयो भवतीति दर्शयन्ति । **तथा च तद्ग्रन्थः**:- *"आयवनामं जहासत्ती तावकरी । जहा अग्गिदिणयरविमाणमाइयाणं आयावो ।* ***अण्णे भणन्ति-*** *आइच्चमंडलपुढविकाइएसु चेव विवागो नऽन्नत्थ ।* ***भणियं च-*** *'जस्सुदएणं जीवे, होइ सरीरं तु ताविलं इत्थ । तं आयवमिह नामं, तस्स विवागो उ रविबिंबे ।'* " (गा. १८ / पत्र. १०) इति

★ **सूक्ष्मार्थविचारसारटीकाकारा**स्तु वह्न्यादेरप्युद्योतनामकर्मण उदयो भवतीत्याहुः । **तथा च तद्ग्रन्थः**:- *"पगासजणगं उज्जोयनामं जहा अग्गिमणीदिणयरचन्दविमाणखज्जोयमाइयाणं उज्जोओ ।* ***अण्णे भणंति-*** *अणुसिणो पगासो जस्सोदयाउ भवइ तं उज्जोयनामं खज्जोयमाइयाणं; न तु अग्गिस्स आइच्चस्स वा । जओ अग्गिस्स फासो उसिणनामोदयाउ, रूवं लोहियनामं ति ।"* (गा. १८ । पत्र. १०) इति ।

निर्मीयतेऽनेनेति निर्माणम्, ''करणाऽऽधारे'' (सिद्धहेम०-५-३-१२९) इत्यनेन करणेऽनट्प्रत्ययः, तन्निदानं नामकर्म निर्माणनाम, यदुदयात्तत्तत्प्राणिशरीरगताऽङ्गप्रत्यङ्गानां स्वीय-स्वीयजाति-लिङ्गाद्यनुसारेण प्रतिनियतप्रदेशव्यवस्थापनं करोति तद् निर्माणनाम, प्रासादाऽऽदिनिर्माणकलाकौशलोपेतसूत्रभृत्कल्पं भवति । तदभावे हि तद्भृतकल्पैरङ्गोपाङ्गनामाऽऽदिभिर्निर्वर्त्तितानामपि शिरउरउदराऽऽदीनां स्थानप्रवृत्तेरनियमः स्यात् । **उक्तञ्च तत्त्वार्थभाष्ये-** ''सर्वजीवानामात्मीयाऽऽत्मीयशरीराऽवयवविन्यासनियमकारणं निर्माणनाम प्रासादाऽऽदिनिर्माणकलाकौशलोपेतवर्धकिवदिति ।'' (अ. २, सू. १२ । भा. २, पत्र. १५२) इति । **तथा वृहत्कर्मविपाकेऽपि -**

''देहंगाऽवयवाणं, लिंगाऽऽगिइजाइणियमणं जं च । तहि सुत्तहारसरिसो, निम्माणे होइ हु विवागो ॥१४८॥'' इति ।

**तथा सूक्ष्मार्थविचारसारवृत्तावपि–** (गा. १८ पत्र. १०) ''जाइलिंगआगीववत्थावनं निम्माणनामं । जओ आह- *'देहंगावयवाणं, लिंगागीजाइनियमणं जेण । तं सुत्तहारसरिसं, निमेणनामं वियाणाहि ॥ ॥'* '' इति ।

**एवं नव्यकर्मग्रन्थ-तद्वृत्ति-कर्मप्रकृति-पञ्चसंग्रह-सप्ततिकाऽऽदिवृत्ति-बन्धशतकचूर्ण्याऽऽदिष्वपि ▲ ।**

तीर्यते दुस्तरः संसारसमुद्रोऽनेनाऽस्मादस्मिन्निति वा तीर्थम्, **यद्वा** तारयति = पारं प्रापयति येन तत् तीर्थम्, तीर्थं = प्रवचनाऽऽधारभूतः श्रमणाऽऽदिचतुर्विधसंघो वा प्रथमगणधरो वा प्रवचनं वेति ।

**यदाहुर्भगवतीसूत्रे विंशतितमशतकेऽष्टमोद्देशके -** (भा.३, पत्र. ७९२-२)

''तित्थं भंते ! तित्थं तित्थगरे तित्थं ? गोयमा ! अरहा ताव नियमं तित्थकरे, तित्थं पुण चाउवन्नाऽऽइन्ने समणसंघे'' ★ इति ।

**तथा कल्पसूत्रसुवोधिकायाम् -** ''तत्र तीर्थं = सङ्घः प्रथमगणधरो वा'' (क्ष.१, सू. १५/पत्र. ५२) इति ।

**तथा विशेषाऽऽवश्यकभाष्येऽपि-**

''तित्थं ति पुव्वभणियं, संघो जो नाण-चरण-संघाओ । इह पवयणं पि तित्थं, तत्तोऽणत्थंतरं जेण ॥१३८०॥'' इति ।

''तॄ प्लवन-तरणयोः'' इति तॄधातोः ''नीनूरमि**तॄ**तुदि..........'' (सिद्धहेम०-उणादि०-२२७) इत्यनेन कित् थप्रत्ययः । तत्करणशीलः तीर्थकरः,'हेतुतच्छीलानुकूले....'' (सिद्धहेम०-५-१-१०३) इत्यनेन टप्रत्ययः, तन्निबन्धनं कर्म तीर्थकरनाम, यदुदयादष्टमहाप्रातिहार्याऽऽद्यचतुस्त्रिंशदतिशयाः प्रादुर्भवन्ति, दर्शन-ज्ञान-चरणलक्षणं श्रमणाऽऽदिचतुर्विधसंघरूपं प्रवचनलक्षणं प्रथमगणधररूपं वा तीर्थं प्रवर्तयति, यतिगृहस्थधर्मं कथयत्याऽऽक्षेप-संक्षेप-संवेग-निर्वेदद्वारेण भव्यजनसंसिद्धये, सुराऽऽसुरनरेशाऽऽदिपूजितश्च भवति, तत् तीर्थकरनाम। **उक्तञ्च बृहत्कर्मविपाके –**

''उदए जस्स सुरासुर-नरवइनिवहेहि पूइओ होइ । तं तित्थयरं नाम, तस्स विवागो उ केवलिणो ॥१४९॥'' इति ।

**नव्यकर्मविपाकेऽपि** – (पत्र. ५४ /६३) ''तित्थेण तिहुअणस्स वि, पुज्जो से उदओं केवलिणो ॥४६॥'' इति ।

**तथाऽन्यत्राऽपि -** (सू.वि.सा.गा.१८ / वृ. पत्र. १०)

''उदए जस्स सुरासुर-नरवइनिवहेहि पूइओ लोए । तं तित्थयरं कम्मं, केवलिणो तस्स उदओ उ ॥ ॥'' इति ।

अथ प्रत्येकप्रकृतीनां सङ्ख्याप्रदर्शनपूर्वकमुपसंहरति - **''अड पत्तेआ''** त्ति 'अष्टौ प्रत्येकाः' अगुरुलघुप्रमुखा अष्टौ = अष्टसङ्ख्याकाः प्रत्येकप्रकृतयो भवन्ति, आसां पिण्डप्रकृतिवदन्यभेदाऽभावात् ।

---

▲ **राजवार्तिककारैस्तु** - *''अङ्गोपाङ्गानां यन्निमित्ता परनिष्पत्तिस्तन्निर्माणमिति ज्ञायते तद् द्विविधम्, स्थाननिर्माणं प्रमाणनिर्माणं चेति । जातिनामकर्मोदयाऽपेक्षं चक्षुरादीनां स्थानं प्रमाणं च निर्वर्तयति ।''* इत्येवं भणितम् । ★ **प्रज्ञापनावृत्तौ नव्यप्रथमकर्मग्रन्थवृत्तौ** च ग्रन्थविशेषाऽभिधानं विनैतस्मिन् पाठेऽधिकतयाऽन्ते *''पढमगणहरे वा''* इत्यस्ति (प्रज्ञा. प. १, सू. ७/म. भा. १, पत्र. १९-१) (क. गा. ४६/पत्र. ६३)

एवं क्रमेण प्रत्येकप्रकृतीनामुपन्यासेऽयं हेतुः- यत्राऽगुरुलघुचतुष्कमुच्यते तत्रा-ऽगुरुलघूपघात-पराघातो- च्छ्वासरूपाश्चतस्रः प्रकृतयोऽत्रोक्तक्रमेण ग्राह्याः, एवमातपद्विकेनाऽऽतपोद्योतनाम्नी द्वे ग्राह्ये, तथा सर्वोत्कृष्टत्वाच्च प्रान्ते तीर्थकरनाकर्म उपन्यस्तमिति ॥११॥

साम्प्रतं सप्रतिपक्षास्त्रस-स्थावराऽऽदीः प्रकृतीर्गाथाद्वयेन बिभणिषुरादावेकगाथया त्रसनामप्रभृतीः प्रकृतीः प्राह—

**तस-वायर-पज्जत्तं , पत्तेअ-थिरं सुहं च सुभगं च ।**
**सुस्सर-आइज्जाणि य, जसकित्ती होइ तसदसगं ॥१२॥**

(प्रे०) "**तस०**" इत्यादि, 'त्रसबादरपर्याप्तम्' त्रसाऽऽदीनां कृतसमाहारद्वन्द्वानां प्रथमया निर्देशात्, प्रक्रमान्नामशब्दस्य प्रत्येकमभिसम्बन्धाच्च । त्रसनाम बादरनाम पर्याप्तनाम च, 'प्रत्येकस्थिरम्' प्रत्येकनाम स्थिरनाम च, 'शुभं च' शुभनाम च 'सुभगं च' सुभगनाम च 'सुस्वराऽऽदेये' सुस्वरनामाऽऽदेयनाम च 'यशःकीर्तिः' यशःकीर्तिनाम इत्येवं 'त्रसदशकम्' त्रसोपलक्षितं प्रकृतिदशकं त्रसदशकं भवति = त्रसदशकमिति व्यवह्रियते ।

त्रस्यन्ति = उष्णाऽऽद्यभितप्ताः सन्तो विवक्षितस्थानाद् उद्विजन्ते गच्छन्ति च छायाऽऽद्यासेवनाऽर्थं स्थानाऽन्तरमिति त्रसाः, "अच्" (सिद्धहेम०-५-१-४९) इत्यनेन, "लिहादिभ्यः" (सिद्धहेम०-५-१-५०) इत्यनेन वा कर्तर्यच्प्रत्ययः । तत्पर्यायविपाकवेद्यं कर्माऽपि त्रसनाम, = यदुदयात्स्पर्शन-रसनरूपेन्द्रियद्वययुक्तत्वाद् द्वीन्द्रियाणां शङ्ख-चन्दनक-कपर्द-जलूका-कृमि-गण्डाल-पूतरकाऽऽदीनां स्पर्शन-रसन-घ्राणलक्षणेन्द्रियत्रयवत्त्वात्त्रीन्द्रियाणां यूका-मत्कुण-गर्दभे-न्द्रगोपक-कुन्थु-मत्कोटकाऽऽदीनां स्पर्शन-रसन-घ्राण-चक्षूरूपेन्द्रियचतुष्कसहितत्वाच्चतुरिन्द्रियाणां मक्षिका-भ्रमर-मशक-वृश्चिकाऽऽदीनां स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्रलक्षणैः पञ्चभिरपीन्द्रियैः परिपूर्णत्वात्पञ्चेन्द्रियाणां मत्स्य-मकर-हरि-हरिण-सारस-राजहंस-नर-सुर-नारकाऽऽदीनां जीवानां गमनं भवति, यत्तु परमाणु-तेजो-वाय्वादीनां गमनं जायते तत्तु स्वाभाविकम् न तु त्रसनामकर्मोदयजन्यम्, **न च** कमलिनीखण्डाऽऽदेर्देशाऽन्तरगमनश्रवणाद् व्यभिचार **इत्याशङ्कनीयम्**, अधिष्ठातृव्यन्तराऽनुभावाऽनुग्रहादिति ।

**उक्तञ्च तत्त्वार्थभाष्यटीकायां सिद्धसेनगणिपादैः-** (अ. ८, सू.१२/ भा. २, पत्र. १५८)

"त्रस्यन्तीति त्रसाः द्वित्रिचतुःपञ्चेन्द्रियलक्षणाः प्राणिनः, यस्मात् तस्य कर्मण उदयात् तेषु परिस्पन्दोऽञ्जसा लक्ष्यते, स तादृशो गमनाऽऽदिक्रियाविशेषो यस्य कर्मण उदयात् भवति तत् त्रसत्वनिर्वर्तकं त्रसनाम, तदुदये एव गत्यादिक्रिया भवतीति साऽवधार्यते । गमनं तु तदुदयात् स्वभावाच्च तदुदयाद् द्वीन्द्रियाऽऽदीनां स्वभावात् परमाणु-तेजो-वाय्वादीनामिति । कमलिनीखण्डाऽऽदेर्देशाऽन्तर एव गमनश्रवणाद् व्यभिचार **इति चेन्न** अधिष्ठातृव्यन्तराऽनुभावाऽनुग्रहादिति ।" इति ।

एवमेवाऽक्षरशो **हरिभद्रसूरीश्वरैरपि ।** केवलमन्त्यपङ्क्तौ - "कमलिनीखण्डाऽऽदेर्देशाऽन्तरगमनश्रवणाद् व्यभिचार **इति चेत्, तन्न**, अधिष्ठातृव्यन्तराऽनुग्रहादिति ।" (पत्र. ३९७) इत्येवंरूपो विशेषः ।

यदुदयात्प्राणीनां शरीराणि बादराणि = स्थूलानि भवन्ति तद् बादरनाम ।

**यदुक्तं बन्धशतकचूर्णौ** - "जस्सोदयाओ थूलया भवइ सरीरस्स तं बायरणामं ।" (गा. ३९/पत्र. ५८) इति ।

बादरत्वं चेह न चक्षुर्गाह्यत्वमिष्टम्, बादरस्याऽप्येकैकस्य पृथिव्यादिशरीरस्य चक्षुर्ग्राह्यत्वाऽभावात् । तस्माद् जीवविपाकित्वेन जीवस्यैव कञ्चिद् बादरपरिणामं जनयति एतद्, न पुद्गलेषु, जीवविपाक्यप्येतत् शरीरपुद्गलेष्वपि काञ्चिदप्यभिव्यक्तिं दर्शयति । तेन बादराणां बहुतरसमुदितपृथ्व्यादीनां चक्षुषा ग्रहणं भवति न सूक्ष्माणाम् । **यदुक्तं पञ्चसंग्रहवृत्तौ सप्ततिकावृत्तौ च श्रीमन्मलयगिरिसूरिपादैः-** "बादरत्वं च परिणामविशेषः, यद्वशात्, पृथिव्यादेरेकैकस्य जन्तुशरीरस्य चक्षुर्ग्राह्यत्वाऽभावेऽपि बहूनां समुदाये चक्षुर्ग्रहणं भवति ।" (पञ्चसं. द्वा. ३, गा. ८/भा. १, पत्र. ११६-२) (सप्त. गा. ५/पत्र. १७७) इति ।

**न च** जीवविपाकिकर्मणः शरीरे स्वशक्तिप्रकटनमयुक्त**मिति वाच्यम्,** यतो जीवविपाक्यपि क्रोधो भूभङ्गत्रिवलीतरङ्गितालिकफलकक्षरत्स्वेदजलकर्णनेत्राऽऽद्याताम्रत्वपरुषवचनवेपथुप्रभृतिविकारं कुपितशरीरेऽपि दर्शयति, विचित्रत्वात् कर्मशक्तेरिति ।

पर्याप्तयो विद्यन्ते येषाम्, ते पर्याप्ताः "अभ्राऽऽदिभ्यः" (सिद्धहेम०-७-२-४६) इत्यनेन अप्रत्ययः । **यद्वा** "अर्शआदिभ्योऽच्" (पाणिनीयसूत्र०-५-२-१२७) इत्यनेन मत्वर्थीयोऽच्प्रत्ययो भवति । तद्विपाकवेद्यं कर्माऽपि पर्याप्तनाम = यदुदयाज्जीवा आपाकप्रक्षिप्तनिर्वृत्तघटवद् निजनिजपर्याप्तियुक्ता भवन्ति । **यदुक्तं प्राचीनकर्मविपाके-**

"एयासि निप्फत्ती, उदएणं जस्स होइ कम्मस्स । तं पज्जत्तं नामं, इयरुदए णत्थि णिप्फत्ती ॥१३७॥" इति ।

**एवं बन्धशतकचूर्णावपि-**

"जस्सोदयाओ णिव्वतिं गच्छइ आपाकप्रक्षिप्तनिर्वृत्तघटवत् तं पज्जत्तगनाम ।" (गा. ३९ /पत्र. ५८) इति ।

ते च पर्याप्ता द्विधा, लब्धिकरणभेदात् । तत्र ये स्वप्रायोग्याः सर्वा अपि पर्याप्तीः समर्थ्य म्रियन्ते नाऽर्वाक् ते लब्धिपर्याप्ताः । **यदुक्तम्-** "लद्धिपज्जत्तो सो पुण जो मरई ताउ पूरित्ता ।" इति ।

ये पुनः करणानि = साधनभूतानि साधकतमानि वा शरीरेन्द्रियाऽऽदीनि निर्वर्तितवन्तस्ते करणपर्याप्ताः । **यदाह** - "सो पुण करणपज्जत्तो जेणं ता पूरिया हुन्ति ॥" इति ।

तत्र पर्याप्तिर्नाम पुद्गलोपचयज आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः । सा च षोढा, विषयभेदात् । **तद्यथा-** १. आहारपर्याप्तिः, २. शरीरपर्याप्तिः, ३. इन्द्रियपर्याप्तिः, ४. उच्छ्वासपर्याप्तिः, ५. भाषापर्याप्तिः, ६. मनःपर्याप्तिश्चेति ।

तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः १, यया रसीभूतमाहारं रसाऽसृग्-मांस-मेदो-ऽस्थि-मज्जा-शुक्रलक्षणसप्तधातुतया परिणमयति सा शरीरपर्याप्तिः २, यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्तिः ३ । यया पुनरुच्छ्वासप्रायोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्याऽलम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः ४ । यया तु भाषाप्रायोग्यवर्गणादलिकं गृहीत्वा भाषात्वेन परिणमय्याऽऽलम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५ । यया पुनर्मनोयोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमय्याऽऽलम्ब्य च मुञ्चति सा मनःपर्याप्तिः ६ ।

**उक्तञ्च बन्धशतकचूर्णौ** - "पज्जत्ती णाम सत्तिविसेसो । सो य दलिओवचयाओ उप्पज्जइ । आहारियस्स दव्वस्स खलरसपरिणामणसत्ती आहारपज्जत्ती । सत्तधातुतया रसस्स परिणामणसत्ती सरीरपज्जत्ती । इन्दियपज्जत्ती पञ्चण्हमिन्दियाणं जोग्गे पोग्गले विचिणिय तब्भावणयणसत्ती अत्थावबोहसत्ती य इन्दियपज्जत्ती बाहिरे आणापाणजोग्गे पोग्गले घेत्तूण आणापाणाए परिणामित्ता ऊसासनीसासत्ताए निस्सरणसत्ती आणापाणपज्जत्ती । वइजोगे पोग्गले घेत्तूण भासत्ताए परिणामित्ता वइजोगत्ताए णिस्सरणसत्ती भासापज्जत्ती । मणोजोगे पोग्गले घेत्तूण मणत्ताए परिणामित्ता मणजोगत्ताए णिस्सरणसत्ती मणपज्जत्ती" (गा.४/पत्र.१७) इति ।

**एवमेव नन्दिसूत्रचूर्णि-प्रज्ञापना-सप्ततिका-नव्यप्राचीनकर्मविपाक-नव्यप्राचीनषडशीति-सूक्ष्मार्थविचारसारप्रकरणाऽऽदिग्रन्थवृत्तावप्यभिहितम् ।**

**उक्तञ्च नन्दीसूत्रचूर्णौ** - ''पज्जत्ती णाम सत्ती सामत्थं, सा य पुग्गलदव्वोवचया उप्पज्जति ताओ य छप्पज्जत्तीओ ता। आहार० शरीर० इंदिय० आणूपाणू० भासा० मणपज्जत्ती चेति। तत्थ एगिंदियाणं चउरो, विगलिंदियाणं पञ्च, असण्णीण संववहारतो पंच चेव, सण्णीणं च छ। तत्थ आहारपज्जत्ती नाम = खलरसपरिणामणसत्ती आहारपज्जत्ती, सत्तधातुतया परिणामणसत्ती सरीरपज्जत्ती, पंचण्हमिंदियाणं जोग्गा पोग्गला विचितु अणाभोगनिवत्तितविरियकरणेण तब्भावापायणसत्ती इंदियपज्जत्ती, पोग्गलजोग्गाणापाणूण गहणणिसिरणसत्ती आणापाणूपज्जत्ती, वइजोगे पोग्गले घेत्तूण भासत्ताए परिणामेत्ता वइजोगत्ताए निसिरणसत्ती भासापज्जत्ती, मणजोग्गे पोग्गले घेत्तूण मणत्ताए परिणामेत्ता मणजोगत्ताए निसिरणसत्ती मणपज्जत्ती।'' (सू. १७ / पत्र.३७-१) इति।

**तत्त्वार्थभाष्यकारैः**:- पुनराहाराऽऽदिपर्याप्तीनामाहाराऽऽदिक्रियापरिसमाप्तिरित्यभिधीयते, पर्याप्तिः = आत्मनः क्रियापरिसमाप्तिरित्यर्थकरणात्। **तथा च तद्ग्रन्थः**:- ''पर्याप्तिः = क्रियापरिसमाप्तिः आत्मनः। शरीरेन्द्रियवाङ्मनः-प्राणापानयोग्यदलिकद्रव्याहरणक्रियापरिसमाप्तिः आहारपर्याप्तिः। गृहीतस्य शरीरतया संस्थापनं क्रियापरिसमाप्तिः शरीरपर्याप्तिः। X संस्थापनं रचना घटनमित्यर्थः। त्वगादीन्द्रियनिर्वर्तनक्रियापरिसमाप्तिरिन्द्रियपर्याप्तिः। प्राणापान-क्रियायोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्तनक्रियापरिसमाप्तिः प्राणपानपर्याप्तिः। भाषायोग्यद्रव्यग्रहणनिसर्गशक्ति-निर्वर्तनक्रियापरिसमाप्तिर्भाषापर्याप्तिः। मनस्त्वयोग्यद्रव्यग्रहणनिसर्गशक्तिनिर्वर्तनक्रियापरिसमाप्तिर्मनःपर्याप्तिरित्येके।'' (अ. ८, सू. १२/भा. २, पत्र. १६०-१६१) इति।

एष एव पाठः **श्रीमद्धरिभद्रसूरिभिर्नन्दीसूत्रवृत्तौ** वृत्तितया गृहीतः।

**तत्त्वार्थभाष्यवृत्तिकाराऽऽदिभिस्तु** कारणे कार्योपचारादाहाराऽऽदिग्रहणाऽऽदिसामर्थ्योत्पादका आत्मना गृहीतास्तथाविधपरिणामप्राप्ताः पुद्गला एव पर्याप्तितयोक्ताः। **उक्तञ्चाऽन्यत्राऽपि** -

''आहारसरीरेंदिय-ऊसासवओमणोऽहिनिव्वित्ती। होइ जओ दलियाओ, करणं एसा उ पज्जत्ती ॥ ॥'' इति।

**इदमुक्तं भवति** - यः कर्तुरात्मनः करणशक्तिविशेषः सा पर्याप्तिर्भवति। सा च यैः पुद्गलैरुत्पद्यते ते पुद्गला अपि कारणे कार्योपचारात्पर्याप्तिशब्देन व्यवह्रियते। यथाऽसिना हन्तीत्यत्र हन्तुरसिजनितशक्तिविशेषस्य साधकतमत्वेन करणत्वे सत्यपि कारणे कार्योपचारादसेः करणत्वस्य व्यवहारः सुप्रसिद्धोऽस्ति, तथाऽत्राऽपि।

**उक्तञ्च श्रीतत्त्वार्थभाष्यटीकायां सिद्धसेनगणिपादैः**:- (अ. ८, सू. १२/भा. २, पत्र. १६०)

''पर्याप्तिः पुद्गलरूपाऽऽत्मनः कर्तुः करणविशेषः। येन करण-विशेषेणाऽऽहाराऽऽदिग्रहणसामर्थ्यमात्मनो निष्पद्यते तच्च करणं यैः पुद्गलैर्निर्वर्त्यते ते पुद्गला आत्मनाऽऽत्तास्तथाविधपरिणतिभाजः पर्याप्तिशब्देनोच्यते। सामान्येनोद्दिष्टां पर्याप्तिं नामग्राहं विशेषेण निर्दिदिक्षन्नाह - **तद्यथे**त्यादि। आहारग्रहणसमर्थकरणपरिनिष्पत्तिराहारपर्याप्तिः। शरीरकरणनिष्पत्तिः शरीरपर्याप्तिः। इन्द्रियकरणनिष्पत्तिरिन्द्रियपर्याप्तिः। प्राणपानौ = उच्छ्वासनिःश्वासौ तद्योगकरणनिष्पत्तिः प्राणापानपर्याप्तिः। भाषायोग्यपुद्गलग्रहण- विसर्गसमर्थकरणनिष्पत्तिर्भाषापर्याप्तिः। **यथोक्तम्** - *'आहारसरीरेंदिय-ऊसासवओमणोऽहिनिव्वित्ती। होइ जओ दलियाओ, करणं एसा उ पज्जत्ती ॥'* ।'' इति।

X **नन्दीसूत्रवृत्तौ** पुनरत्र *''संस्थानरचनाघटनमित्यर्थः''* इति **पाठभेदः**।''

**ननु** भवता षट् पर्याप्तयः प्रोक्ताः, तथैव बहूषु प्रावचनीयग्रन्थेष्वपि । **तत्त्वार्थभाष्ये** पुनः पञ्चैव पर्याप्तयः प्रोक्ताः । **तदक्षराणि त्वेवम्** – ''पर्याप्तिः पञ्चविधा । **तद्यथा**-आहारपर्याप्तिः शरीरपर्याप्तिः इन्द्रियपर्याप्तिः, प्राणापानपर्याप्तिः, भाषापर्याप्तिरिति ।'' (अ. ८, सू. १२/ भा. २, पत्र. १५९) इति । ततः कथं न विरोध **इति चेद्, उच्यते-तत्त्वार्थभाष्ये** हि इन्द्रियपर्याप्तिग्रहणेनैव मनःपर्याप्तेर्ग्रहणं कृतम्, इन्द्रियपर्याप्तौ मनःपर्याप्तेरन्तर्भावात् **न च** मनःपर्याप्तेरनिन्द्रियत्वेनेन्द्रियग्रहणात्कथं तद्ग्रहणं स्यादित्या**शङ्कनीयम्**, यत इन्द्रलिङ्गत्वात्तु भवत्येवेन्द्रियं मनः, **तथाहि-** यथा इन्द्रः आत्मा चक्षुरादिना रूपाऽऽदिविषयं गृह्णाति, तथा मनसा सुखाऽऽदेर्ग्रहणं करोति, ततश्चक्षुरादेरिव मनसोऽपि करणत्वेन लिङ्गत्वात् । **यदुक्तं विशेषाऽऽवश्यकभाष्यवृत्तौ-** ''तस्येन्द्रस्य जीवस्य लिङ्गं चिह्नं तेन दृष्टं सृष्टं वा निपातनादिहेन्द्रियमुच्यते ।'' (गा. २९९३वृ./भा. २, पत्र. २२८ पु. पत्र. ५८६) इति । **यद्वा**ऽनिन्द्रियत्वेऽपि प्रतिपक्षत्वेनेन्द्रियग्रहणेन गृह्यते यथा वेद-कषाय-ज्ञान-संयम-सम्यक्त्व-संज्ञ्या-ऽऽहार्यादिमार्गणानामुत्तरभेदकथने प्रतिपक्षत्वेनाऽवेदादीनामप्युपादानं कृतम् । अत एतद्विवक्षाविशेषाऽपेक्षया **तत्त्वार्थभाष्यकारैः** पञ्च पर्याप्तयः कथिताः । **भगवत्यां तु** ''तए णं से ईसाणे देविंदे देवराया अहुणोववन्ने पंचविहाए पज्जत्तीए पज्जत्तिभावं गच्छइ तं जहा - आहारपज्जत्तीए १, शरीरपज्जत्तीए २, इंदियपज्जत्तीए ३, आणपाणपज्जत्तीए ४, भासामणपज्जत्तीए ५ ।'' (श. ३, उ. १, सू. १३६ / अभय. भा. १ पत्र. १७५-२) इत्यादिना पर्याप्तेर्यत्पञ्चविधत्वमुक्तम्, तत्तु देवानां भाषा-मनःपर्याप्तयोर्युगपन्निष्ठापनेन पृथगविवक्षणादिति ।

**अन्यत्र** पुनर्मनसोऽनिन्द्रियत्वे पृथगुपादानात् षट् पर्याप्तयो गदिता इति न कश्चिद्दोषः, किन्तु विवक्षाकृत एव भेदः । अनिन्द्रियत्वं पुनर्न सम्पूर्णमिन्द्रियमिति कृत्वा ।

**श्रीतत्त्वार्थभाष्ये पुनः षड्भिर्दृष्टान्तैः पर्याप्तिस्वरूपमेवमभिधीयते** - ''गृहदलिकग्रहणस्तम्भ-स्थूणाद्वारप्रवेशनिर्गमस्थानशयनाऽऽदिक्रियानिर्वर्तनानीति । पर्याप्तिनिर्वर्तकं पर्याप्तिनाम अपर्याप्तिनिर्वतकमपर्याप्तिनाम तत्परिणामयोग्यदलिकद्रव्यमात्मानोपात्तमित्यर्थः'' (अ. ८, सू. १२/भा. २, पत्र. १६२) इति ।

**तथा चाऽस्य श्रीसिद्धसेनगणिपादकृता वृत्तिः-** ''गृहदलिकग्रहणेत्यादि । तत्र गृहदलिकग्रहणेनाऽऽहारपर्याप्तिं साधयति । गृहं कर्तव्यमिति सामान्येन दलिकमादत्ते शाकाऽऽदिकाष्ठम् । ततः सामान्योपात्ते दलिकेऽत्र स्तम्भः स्थूणा वा भविष्यतीति निरूप्यते । एवमनेकपुद्गलग्रहणे सत्यत्राऽमी शरीरवर्गणायोग्याः पुद्गलाः शरीरनिष्पादनक्षमा इति शरीरपर्याप्तिः । भित्त्याद्युच्छ्रायरूपगृहाऽऽलोचनायामपि सत्यां कतिद्वारमिदं प्राङ्मुखमुदङ्मुखं वा प्रवेशनिर्गमाऽर्थमालोच्यते तथेन्द्रियपर्याप्तिरप्यात्मन उपयोगवृत्त्या प्रवेशनिर्गमनद्वारस्थानीयेति । एवं प्राणापानभाषापर्याप्ती अपि एतेनैव निदर्शनेन साध्ये । दार्ष्टान्तिकभेदात् तु दृष्टान्तभेदः । ततः सद्वारकेऽपि निष्पन्ने सद्मनि अत्राऽऽसनमत्र शयनीयमत्र भुजिभूरिति स्थानशयनाऽऽदिक्रियानिर्वर्तनमालोचयन्ति गेहिनः,तद्वन्मनःपर्याप्तिरपि हिताऽहितप्राप्तिपरिहाराऽपेक्षालक्षणेति एवमेताः षड्पर्याप्तीर्यन्निर्वर्तयति तत् कर्म पर्याप्तिनाम, आपाकप्रक्षिप्तनिर्वृत्तघटवत् अपर्याप्तनाम तु अनिष्पन्नध्वंस्यनिष्पन्नघटवदिति **एतदुक्तं भवति-** यस्योदये पर्याप्तयो नाऽऽसादयन्ति परिपूरिमतामपर्याप्त एव म्रियते कदाचिद्वा विनाऽपि भवति यथा सम्मूर्च्छनजमनुष्याऽऽदिरिति ।'' (अ. ८, सू. १२ /भा. २, पत्र. १६२) इति ।

तत्रोक्तपर्याप्तयो यथाक्रममेकेन्द्रियाणां संज्ञिवर्जद्वीन्द्रियादीनां संज्ञिनां च चतुष्पञ्चषड्सङ्ख्याका भवन्ति । **तद्यथा-** एकेन्द्रियाणामाहार-शरीरे-न्द्रियो-च्छ्वासरूपाश्चतस्रः, द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिया-ऽसंज्ञिपञ्चेन्द्रियाणामाहार-शरीरेन्द्रियो-च्छ्वास-भाषालक्षणाः पञ्च, संज्ञिपञ्चेन्द्रियाणां सर्वा अपि षड्पर्याप्तयो भवन्ति ।

**उक्तञ्च वृहत्कर्मविपाके गर्गमहर्षिभिः-**

''आहार-सरी-रिंदय-पज्जत्ती आणपाण-भास-मणे । चत्तारि पंच छप्पिय, एगिंदिय-विगल-सन्नीणं ॥१३६॥'' इति ।

एताश्च यथाक्रमं सूक्ष्म-सूक्ष्मतराऽऽदित्वादुत्पत्तिदेशाऽवाप्त्याद्यसमय एव युगपदारब्धा अपि क्रमेण परिनिष्ठां गच्छन्ति । **तद्यथा** - [१]आहारपर्याप्तेः [२]शरीरपर्याप्तिः सूक्ष्मा, [३]तत इन्द्रियपर्याप्तिः सूक्ष्मतरा [४]तत उच्छ्वासपर्याप्तिः, [५]ततो भाषापर्याप्तिः, [६]ततो मनःपर्याप्तिः, यथोत्तरं सूक्ष्मतरा भवन्ति, ततस्तेषां निष्पादनकालोऽपि यथोत्तरं बृहद्बृहत्तराऽऽदिर्भवति । ततो युगपत्प्रारब्धा अपि क्रमशः परिसमाप्तिमायान्ति स्थूल-सूक्ष्म-सूत्रकर्तिकाऽऽदिवत् ।

**तथा चोक्तं तत्त्वार्थभाष्ये** - (अ.८, सू.१२/भा.२, पत्र. १६१)

''आसां युगपदारब्धानामपि क्रमेण समाप्तिरुत्तरोत्तरसूक्ष्मतरत्वात् सूत्रदार्वादिकर्तनघटनवत् ।'' इति ।

**एवं नन्दीसूत्रचूर्णावप्यभिहितम् ।**

तत्र वैक्रियशरीरवतां शरीरपर्याप्तिरेका आन्तर्मौहूर्तिकी, शेषाः पञ्चाऽप्येकसामायिक्यः । औदारिकशरीरिणां पुनराहारपर्याप्तिरेवैका एकसामयिकी, शेषाः पुनरान्तर्मौहूर्तिक्यः । **यदुक्तम्** –

''वेउव्वियपज्जत्ती, सरीर अंतमुहु सेस इगसमया । आहारे इगसमया, सेसा अंतमुहु ओराले ॥ ॥'' इति ।

**अयम्भावः**- वैक्रियशरीरभाजो जन्तव आहारपर्याप्तिमेकेन समयेन निर्वर्तयन्ति, ततोऽन्तर्मुहूर्तेन शरीरपर्याप्तिं निष्ठापयन्ति, तत एकं समयं गत्वेन्द्रियपर्याप्तिं निर्वर्तयन्ति, ततोऽप्येकं समयं व्यतिक्रम्योच्छ्वासपर्याप्तिं निष्पादयन्ति, ततोऽप्येकेन समयेन भाषापर्याप्तिं समापयन्ति, ततोऽप्येकस्मिन् समये गते मनःपर्याप्तिं निष्पादयन्ति । केवलं देवा भाषापर्याप्ति-मनःपर्याप्तिरूपचरमपर्याप्तिद्विकं युगपन्निष्ठां नयन्ति। औदारिकदेहधारिणो हि उत्पत्तिदेशप्राप्तिप्रथमसमय एवाऽऽहारपर्याप्तिं निर्वर्तयन्ति तेनाऽऽहारपर्याप्तिरेकसामायिकी भवति 卐, ततोऽन्तर्मुहूर्तमन्तर्मुहूर्तं व्रजित्वा क्रमेण शरीराऽऽदिपर्याप्तीः पूरयन्ति ।

**न च** शरीरपर्याप्त्यैव शरीरं भविष्यति, प्रागुक्तस्य शरीरनाम्नः किं प्रयोजन**मिति वाच्यम्**, साध्यभेदात् । **तद्यथा**-औदारिकाऽऽदिशरीरनामकर्मोदयेनौदारिकाऽऽदिशरीरप्रायोग्यपुद्गलानां ग्रहणं जायते शरीरपर्याप्त्या पुनस्तेषां गृहीतपुद्गलानामौदारिकशरीरत्वेन परिणामः साध्यत इति साध्यवैलक्षण्यात्साधनवैलक्षण्यं स्वीकार्यम् । एवमुच्छ्वासनामकर्मत उच्छ्वासपर्याप्तेर्व्यर्थताऽपि नाऽऽशङ्कनीया, यतः सतीमप्युच्छ्वासनामकर्मोदयेन जनितामप्युच्छ्वासलब्धिं शक्तिविशेषरूपामात्मोच्छ्वासपर्याप्तिमन्तरेण व्यापारयितुं न शक्नुयात्, यथा शरीरपर्याप्तिं विना शरीरनामकर्मोदयात्त-पुद्गलपरिणामो न शक्यते ★ । **उक्तञ्च लोकप्रकाशे तृतीयसर्गे**– (द्रा. ३/पु.भा. १, पत्र. ६७)

''एवमुच्छ्वासलब्धिः स्यात्, साध्या तन्नामकर्मणः । साध्यमुच्छ्वासपर्याप्ते-स्तस्या व्यापारणं पुनः ॥२६॥

सतीमुच्छ्वासलब्धि-मुच्छ्वासनामकर्मजाम् । व्यापारयितुमीशः स्यात्, तत्पर्याप्त्यैव नाऽन्यथा ॥२७॥'' इति ।

**श्रीमद्धरिभद्रसूरिपादैरपि श्रावकप्रज्ञप्ता**विदमेव भङ्ग्यन्तरेण भणितम् । **तथा च तद्ग्रन्थः**-

''उच्छ्वासनाम यदुदयादुच्छ्वास-निःश्वासौ भवतः । आह यद्येवं पर्याप्तिनाम्नः क्वोपयोग इति । **उच्यते**- पर्याप्तिः करणशक्तिः, उच्छ्वासनामवत एव तन्निर्वृत्तौ सहकारिकारणम्, इषुक्षेपणशक्तिमतो धनुर्ग्रहणशक्तिवत् ॥'' (गा. २१/ पु. पत्र. १५-१६) इति ।

यदुदयात्प्रतिजीवं भिन्नशरीरमौदारिकं वैक्रियं वोत्पद्यते तद् प्रत्येकनाम । **यदुक्तं बृहत्कर्मविपाके**–

''एक्किक्कयम्मि जीवे, इक्किक्कं जस्स होइ उदएणं । ओरालाऽऽइसरीरं, तं नामं होइ पत्तेयं ॥१३८॥'' इति ।

---

卐 **धवलाकारास्तु** *''शरीरोपादानप्रथमसमयादारभ्याऽन्तर्मुहूर्त्तेनाऽऽहारपर्याप्तिर्निष्पद्यत इति यावत् ।''* (१-१-३४/१-२५४-२५५) इत्याहुः ।

★ **तत्त्वार्थराजवार्त्तिककाराः** पुनः- *''शीतोष्णसम्बन्धजनितदुःखस्य पञ्चेन्द्रियस्य यावुच्छ्वास-निःश्वासौ दीर्घनादौ श्रोत्र-स्पर्शेन्द्रियप्रत्यक्षौ तावुच्छ्वासनामोदयजौ यौ तु प्राणापानपर्याप्तिनामोदयकृतौ, तौ सर्वसंसारिणां श्रोत्र-स्पर्शनाऽनुपलभ्यत्वादतीन्द्रियौ''*इत्याहुः । तच्च विमर्शनीयम्, यत एकेन्द्रियाणामप्युच्छ्वासनामकर्मोदयोऽस्ति ।

**तथा श्रीबन्धशतकचूर्णावपि** - ''पत्तेगं ति = न सामान्यं, जस्सोदयाओ एको जीवो एकं शरीरं णिव्वत्तेइ, तं प्रत्येकं यथा देवदत्त-यज्ञदत्ताऽऽदीनां पृथग्गृहवत्'' (गा० ३९/ पत्र. ९८) इति । तच्चैक-द्वि-त्रि-चतु-ष्पञ्चेन्द्रियविषयं भवति, यथा प्रत्येकवनस्पतिकायिकजीवो मूल-स्कन्ध-शाखा-प्रशाखा-त्वक्-पत्र-पुष्प-फलाऽऽदिषु पृथक् शरीरं निर्वर्तयति तथा द्वीन्द्रियाऽऽदयोऽपीति । **उक्तञ्च तत्त्वार्थभाष्यवृत्तौ-** ''यस्य कर्मण उदयादेकैको जीवः प्रति प्रत्येकैकं शरीरं निर्वर्तयति तत्प्रत्येकनामैक-द्वि-त्रि-चतु-ष्पञ्चेन्द्रियविषयम्, यथा प्रत्येकवनस्पतिजीवो मूल-स्कन्ध-शाखा-प्रशाखा-त्वक्-पत्र-पुष्प-फलाऽऽदिषु पृथक्शरीरं निर्वर्तयति, तथा द्वीन्द्रियाऽऽदयोऽपीति'' (अ. ८, सू. १२/ भा. २, पत्र. १५८) इति । **तत्त्वार्थभाष्यकारः** पुनः प्रत्येकशरीरनाम इत्याहुः । **तदक्षराणि त्वेवम्** - ''पृथक्शरीरनिर्वर्तकं प्रत्येकशरीरनाम ।'' (अ. ८, सू. १२/भा. २, पत्र. १५८) इति । **ननु** यदि कपित्थप्रभृतिवृक्षाऽऽदीनां प्रत्येकनामकर्मोदयोऽङ्गीक्रियेत तर्हि तेषां प्रतिजीवं पृथक् पृथक् शरीरं स्यात्, तच्च न भवति, यतः कपित्थाऽश्वत्थपीलुसेल्वादीनां मूल-स्कन्ध-त्वक्-शाखाऽऽदयः प्रत्येकमसङ्ख्येयजीवाः स्वीकृताः ।

**तथा चोक्तं श्रीप्रज्ञापनासूत्र एकाऽस्थिकबहुबीजवृक्षप्ररूपणाऽवसरे श्रीमच्छ्यामाऽऽचार्यपादैः-**

''एएसिं णं मूला वि असंखेज्जजीविया कन्दा वि खंधा वि तया वि साला वि पवाला वि पत्ता पत्तेयजीविया पुप्फा अणेगजीविया फला एगट्ठिया सेत्तं एगट्ठिया ।'' (प.१,सू. २३/भा. १, पत्र. ३१-१) इति ।

मूलाऽऽदयश्च फलपर्यवसाना देवदत्तशरीरवद् अखण्डैकशरीराऽऽकारा उपलभ्यन्ते, ते चाऽसङ्ख्येयजीवाः, ततः कथं तेषां प्रत्येकं शरीरत्व**मिति चेत् ?, उच्यते** - मूलाऽऽदिष्वसङ्ख्येयानामपि जीवानां भिन्नभिन्नशरीरसम्भवेन तेषां प्रत्येकशरीरत्वस्य सम्भव एव । यत्तु परस्परविमिश्रशरीरत्वमस्ति, तत्तु तिलपर्पटिकागतश्लेषद्रव्य-विमिश्रिततिलवत्सर्षपवर्त्तिगतश्लेषद्रव्यविमिश्रितसर्षपवद्वा प्रबलरागद्वेषोपचिततथारूपप्रत्येकनामकर्मोदयाद्भवति ।

**इदमुक्तं भवति** - यथा तिलपर्पटिकाऽऽदौ श्लेषद्रव्यविमिश्रितास्तिलाऽऽदयो भिन्ना अप्येकरूपा अन्योन्याऽनुवेधरहिता दृश्यन्ते तथा श्लेषद्रव्यस्थानीयप्रबलरागद्वेषोपचिततथाविधप्रत्येकनामकर्मोदयेन परस्परविमिश्रितशरीरास्ते जायन्ते ।

**यदाह श्यामाऽऽचार्यपादैः प्रज्ञापनासूत्रे** - (प.१, सू. २३/भा. १, पत्र. ३३-२)

※''जह सगलसरिसवाणं ,सिलेसमिस्साण वट्टिया विट्टी । पत्तेयसरीराणं , तह होंति सरीरसंघाया ॥४१॥
जह वा तिलपप्पडिया ,बहुएहिं तिलेहिं संहता संती । पत्तेयसरीराणं , तह होंति सरीरसंघाया ॥४२॥'' इति ।

यदुदयवशात् शिरोऽस्थिदन्तानां शरीरावयवानां स्थिरता जायते तत् स्थिरनाम ।

**यदुक्तं श्रीबन्धशतकचूर्णौ** - ''थिरणामं यदुदयाच्छरीराऽवयवानां स्थिरता भवति यथा - शिरोऽस्थिदन्तानां ।'' (गा.३९/पत्र. ५८) इति । **तथा बृहद्विपाकेऽपि -**

''दंतऽट्ठाइथिराणं,अंगावयवाण जस्स उदएणं । निप्फत्ती उ सरीरे, जायइ तं होइ थिरनामं ॥१४०॥'' इति । ▲

यदुदयान्नाभेरुपरितना अवयवाः शुभा जायन्ते तच्छुभनाम,★शिरःप्रभृतिकम्, **उक्तञ्च श्रीबृहत्कर्मविपाके-**
''सिरमाईण सुहाणं, अंगावयवाण जस्स उदएणं । निप्फत्ती उ सरीरे, जायइ तं होइ सुभनामं ॥१४२॥'' इति ।

※ **आचाराङ्गसूत्रनिर्युक्तिगाथे चैवम्** —

*''जह सगलसरिसवाणं, सिलेसमिस्साणे वत्तिया वट्टी । पत्तेअसरीराणं , तह हुन्ति सरीरसंघाया ॥१३१॥*
*जह वा तिलसक्कुलिया, बहुएहिँ तिलेहिँ मेलिया संती । पत्तेअसरीराणं , तह हुन्ति सरीरसंघाया ॥१३२॥''* इति ।

▲ **राजवार्त्तिककारैस्तु** - *'यदुदयात् दुष्करोपवासाऽऽदितपस्करणेऽप्यङ्गोपाङ्गानां स्थिरत्वं जायते ''* इति ।

★ **राजवार्त्तिककारैस्तु** - *''यदुदयात् दृष्टः श्रुतो वा रमणीयो भवत्यात्मा तच्छुभनाम''* इति ।

यतः शिरआदिना स्पृष्टस्तृष्यति, **न च** कामिन्याः पादेनाऽपि स्पृष्टस्तुष्यति, ततो व्यभिचार **इति वाच्यम्,** तस्य परितोषस्य मोहनीयकर्मजन्यत्वात् इह पुनर्वस्तुस्थितेश्चिन्तनस्याऽधिकाराच्च, नास्ति कश्चिद्दोषः ।

**तत्त्वार्थभाष्ये पुनः** "शुभभावशोभामाङ्गल्यनिर्वर्तकं शुभनाम" (अ. ८, सू. १२/भा. २, पत्र. १५९) इत्याहुः ।

यदुदयवशाद् अनुपकार्यपि सर्वलोकस्य प्रियो जायते, तत् सुभगनाम ।

**उक्तञ्च प्राचीनकर्मविपाके -** "सूभगकम्मुदएणं, हवइ हु जीवो उ सव्वजणइट्ठो ।" (गाथा १४४) इति ।

**तथा नव्यकर्मविपाकेऽपि -** "सुभगाओ सव्वजणइट्ठो ॥४९॥" (गाथा ४९ / पत्र. ५६/६५) इति ।

**तथाऽन्यत्राऽपि -** "अणुवकए वि बहूणं, होइ पिओ तस्स सुभगनामुदओ ॥" (नव्यकर्मविपाकगाथा ४९ वृत्ति.) इति ।

यः सुभगनामकर्मोदयवानपि व्यक्तिविशेषस्याऽनिष्टो भवति स दोषो व्यक्तिविशेषगतमिथ्यात्वजनित एव व्यक्तिविशेषगतदुर्भगनामजन्य एव वा, न पुनः सुभगनामोदयवतः कश्चिदस्ति, यथा तीर्थकरोऽभव्यानामनिष्टो जायते, तदभव्यसत्कमिथ्यात्वमोहनीयोदयादेव तदभव्यसत्कदुर्भगनामोदयादेव वा । **तथा चोक्तम् –** "सुभगुदए वि हु कोई, कंपी आसज्ज दूभगो जइ वि । जायइ तद्दोसाओ, जहा अभव्वाण तित्थयरो ॥ ॥" (नव्यकर्मविपाकगाथा ४९-वृ. पत्र. ५७/६६) इति ।

यदुदयाज्जीवस्य स्वरः श्रोत्र-प्रीतिहेतुर्भवति, कोकिलाऽऽदिस्वरवत्, तत्सुस्वरनाम ।

**यदुक्तं वृहत्कर्मविपाके -** "सूसरकम्मुदएणं, सूसरसद्दो य होइ इह जीवो ।" (गा.१४५) इति ।

**तथा नव्यकर्मविपाकेऽपि -** "सुसरा महुरसुहझुणी" (गा. ५० पत्र. ५७/६५) इति ।

यदुदयवशाद् यत्किञ्चिदपि ब्रुवाणो जीवः सर्वस्योपादेयवचनो भवति, दर्शनसमनन्तरमेव च लोकोऽभ्युत्थानाऽऽदि समाचरति तद् आदेयनाम । **यद्वा** यदुदयाज्जीवस्य यच्चेष्ठितं यच्च वचनम्, तत्सर्वं जनैः प्रमाणीक्रियते, यथा यदनेन कृतं तदस्माकं प्रमाणमिति । **अथवा** आदेयता = श्रद्धेयता शरीरगुणाऽऽत्मका यदुदयाज्जायते तद् आदेयनाम ।

**उक्तञ्च तत्त्वार्थभाष्यवृत्तौ –** "यस्योदयेन नामकर्मोदयस्तेनोक्तं प्रमाणं क्रियते यत्किञ्चिदपि दर्शनसमन्तरमेव चाऽभ्युत्थानाऽऽदि लोका समाचरन्तीत्येवंविधविपाकमादेयनाम ।..... **अथवा** आदेयता-श्रद्धेयता दर्शनादेव यस्य भवति स च शरीरगुणो यस्य विपाकाद् भवति तदादेयनाम ।" (अ. ८,सू. १२/भा. २, पत्र. १६३) इति ।

**तथा श्रीवन्धशतकचूर्णावपि -** "आएज्जं = प्रमाणीकरणं आएज्जकम्मोदयाओ जं तस्स चेट्ठियं जं वा तस्स वयणं तं सव्वं मणुएहिं पमाणीकिज्जइ, **जहा**-जमणेण कयं तं अम्हं प्रमाणं ति, मध्यस्थमनुजवचनभरं मनुजचेष्टितवत्, (मध्यस्थमनुजवचनक्रियाऽऽनुकूल्येनेतर-मनुजचेष्टितवत्) । तद्विपरीतमणाएज्जं । अथवा आदेयता श्रद्धेयता = शरीरगता ।" (गा. ३९/ पत्र. ५८ ) इति । ●

यदुदयाद् जगति जीवस्य यशःकीर्तिर्जायते, तद् यशःकीर्तिनाम । तत्र सामान्यतस्तपः-शौर्य-त्यागाऽऽदिना समुपार्जितेन यशसा कीर्तनं = संशब्दनं = श्लाघनं यशःकीर्तिरुच्यते । **यद्वा** यशः = सामान्येन प्रख्यातिः, कीर्तिः = लोके गुणोत्कीर्तनलक्षणा प्रशंसा, **अथवा** पराक्रमप्रभवं यशः, दानपुण्यसमुत्था कीर्तिः, **अथवा** सर्वदिग्गामुकं यशः, एकदिग्गामिनी कीर्तिः, **अथवा** इहलोगे वर्तमानस्य यशः, परलोकगतस्याऽपि यद्यशः सा कीर्तिः, यशश्च कीर्तिश्च यशःकीर्ती, ते यदुदयाद् भवतः, तद् यशःकीर्तिनाम । एतदुदयान्मध्यस्थस्याऽपि जनस्य प्रशस्यो भवति ।

---

● **राजवार्तिककारास्त्वित्थमाहुः-** *"यस्योदयात्प्रभोपेतशरीरं दुष्टेष्टमुपजायत तदादेयनाम"* इति ।

एवमेव **पञ्चसंग्रहश्रीमलयगिरिसूरिपादरचितवृत्ति-कर्मप्रकृतिश्रीमहोपाध्याययशोविजयविहितवृत्त्यादिष्वपि व्याख्यातम् । तथा चाऽत्र नव्यकर्मविपाकवृत्तिः—** "यशःकीर्तिनामोदयाद् यशःकीर्तिर्भवति । तत्र सामान्यतस्तपःशौर्यत्यागाऽऽदिसमुपार्जितयशसा कीर्तनं = संशब्दनं = श्लाघनं यशःकीर्तिरुच्यते । **यद्वा** *'दानपुण्यकृता कीर्तिः, पराक्रमकृतं यशः ।'* **अथवा** एकदिग्गामिनी कीर्तिः, सर्वदिग्गामुकं यशः ।" (गा. ५०/पत्र. ५७/६६) इति ।

**तथा चाऽत्र श्रीबन्धशतकचूर्णिरपि–** " **'जसकित्ति'** कीर्त्तनं = संशब्दनं = कीर्तिः, यश इति वा, शोभनमिति वा एकार्थः, यशसा लोके कीर्तनं यशःकीर्त्तिः । तत्पुनः केन संसद्दनं ? पुण्यशौर्यसत्क्रियाऽनुष्ठानाऽचलितस्वाध्यायध्यानशोभनाऽर्थाऽवलम्बनात् संसद्दनं = कीर्त्तनं यशःकीर्तिकर्मविपाकाद् भवति । **अथवा** यश इति इहलोके वर्तमानस्य परलोगगतस्याऽपि(वा)यद्यशः सा कीर्तिरिति ।" (गा. ३९/पत्र. ५८) इति ।

**तथा बृहत्कर्मविपाकेऽपि—** "जस्सुदएणं जीवो, लहइ हु कित्तिं जसं च लोगम्मि । तं जसनामं कम्मं ......॥१४७॥ इति ।

**तत्त्वार्थभाष्ये** पुनर्यशोनिवर्तकं यशोनाम इत्येवं भणितम् ।

**तद्वृत्तौ** च यशसः प्रख्याति - कीर्तिप्रमुखाः शब्दाः पर्यायवाचका दर्शिताः । **तथा च तत्त्वार्थभाष्यवृत्तिः—** "यशः=प्रख्यातिः कीर्तिः लोके गुणोत्कीर्तना प्रशंसा यदुदयात् तद् यशोनाम" (अ. ८, सू. १२/भा. २, पत्र. १६३) इति ॥१२॥

इदानीमनन्तरभणितत्रसाऽऽदिदशकप्रतिपक्षभूतं स्थावरदशकं व्याचिख्यासुराह ग्रन्थकृदेकगाथाम् —

**थावरदसगं थावर - सुहम-अपज्जत्तगाणि साहारं ।**
**अथिर-असुह-दुभगाणि य , दुस्सर-ऽणाइज्ज-अजसं ति ॥१३॥**

(प्रे०) **"थावर०"** इत्यादि, "स्थावरसूक्ष्माऽपर्याप्तकानि' नामशब्दस्येहाऽपि सम्बन्धात् स्थावरनाम सूक्ष्मनामाऽपर्याप्तनाम च, 'साधारणं' साधारणनाम 'अस्थिराऽशुभदुर्भगानि च' अस्थिरनामाऽशुभनाम दुर्भगनाम च 'दुःस्वराऽनादेयाऽयशः' समाहारद्वन्द्वात्प्रथमैकवचननिर्देशः दुःस्वरनामाऽनादेयनाम, "भामा सत्यभामा" इति **न्याया**त् अयशः = अयशःकीर्तिनाम च 'इति' एवंरूपमेतावन्तं 'स्थावरदशकम्' स्थावरोपलक्षितं त्रसदशकस्य विपक्षभूतं दशकं = प्रकृतिदशकमिति स्थावरदशकम् ।

**तथाहि** - तिष्ठन्तीत्येवंशीला उष्णाद्यभितप्ता अपि तत्परिहाराऽसमर्था इति स्थावराः, "स्थेशभासपिसकसो वरः" (सिद्धहेम०- ५-२-८१) इत्यनेन सूत्रेण कर्तरि वरप्रत्ययः । ते च पृथ्वीकायिका अप्कायिकास्तेजःकायिका वायुकायिका वनस्पतिकायिका एकेन्द्रियाः, तद्विपाकवेद्यं कर्माऽपि स्थावरनाम । **न च** तेजोवायुकायिकानां चलनमस्तीति कथं तत्रोक्तव्युत्पत्त्यर्थो घटेदिति **वाच्यम्,** यतस्तेषां चलनं स्वाभाविकमेव न पुनरुष्णाऽऽद्यभितापेन द्वीन्द्रियाऽऽदीनामिव विशिष्टम् ।

यदुदयवशात्केषाञ्चिदेव पृथ्वीकायिकाऽऽदिपञ्चविधानामेकेन्द्रियाणां जीवानां शरीरं सूक्ष्मं श्लक्ष्णम् अदृश्यं नियतमेव भवति, बहूनां समुदितानामपि जन्तुशरीराणां कदाचिदपि चक्षुर्ग्रहणविषयता न भवति तत् सूक्ष्मनाम ।

**उक्तञ्च तत्त्वार्थभाष्यवृत्तौ—** (अ.८-सु.१२/भा.२, पत्र. १५९)

"सूक्ष्मं = श्लक्ष्णं अदृश्यं नियतमेव यस्य कर्मण उदयाद् भवति शरीरं पृथ्व्यादीनां केषाञ्चिदेव तत् सूक्ष्मनामा" इति ।

**यद्वा** यदुदयात्पृथ्वीकायिकाऽऽदीनां शरीरमन्यजीवानामुपग्रहस्योपघातस्य च कारणं न जायते तत्सूक्ष्मनाम ।

यस्योदयात्प्रागभिहितस्वरूपस्वप्रायोग्यपर्याप्तिपरिसमाप्तिविकला जन्तवो भवन्ति तद् अपर्याप्तनाम, पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः न पर्याप्ता अपर्याप्ता इति कृत्वा तन्निबन्धनं नाम अपर्याप्तनाम । तत्राऽपर्याप्ता द्विधा, लब्धिकरणभेदात्; अर्थाद् लब्ध्यपर्याप्ताः करणाऽपर्याप्ताश्चेति । तत्र येऽपर्याप्तका एव सन्तो म्रियन्ते, न पुनः स्वप्रायोग्याः सर्वा अपि पर्याप्तीः समर्थयन्ति ते लब्ध्यपर्याप्ताः । **यदुक्तम्** - "सो लद्धिअपज्जत्तो, जो मरइ अपूरिउं अपज्जत्ता ।" इति । ये पुनः करणानि = शरीरेन्द्रियाऽऽदीनि न तावन्निर्वर्तयन्ति, किन्तु पुरस्तान्नियमतो निर्वर्तयिष्यन्ति ते करणाऽपर्याप्ताः । **उक्तञ्च**- "नऽज्ज वि पूरेइ परं, पुरिस्सइ स इह करणअपज्जत्तो ।" इति ।

ये लब्ध्यपर्याप्ता जीवास्तेऽप्यवश्यमाहारशरीरेन्द्रियरूपास्तिस्रः पर्याप्तीः परिसमाप्यैव म्रियन्ते नाऽर्वाक्, अपरिसमाप्तपर्याप्तित्रयाणामागामिभवाऽऽयुर्बन्धाऽभावेन मरणाऽभावात् ।

**अन्ये** तु यस्योदयाद् अपर्याप्तीर्निर्वर्तयन्ति जीवाः तदपर्याप्तनामेत्याहुः । तदपेक्षया अपर्याप्तयो विद्यन्ते येषां तेऽपर्याप्ता इति व्युत्पत्तिः कार्या । **उक्तञ्च बन्धशतकचूर्णौ**– (गाथा ४ /पत्र. १७)

"एयाओ चेव पज्जत्तीओ अपज्जत्तगणामकम्मोदएण ण णिव्वत्तिज्जंति तं जेसिं अत्थि, ते अपज्जत्तगा ।" इति ।

यस्योदयाद् अनन्तानां जीवानां साधारणम् एकं शरीरं भवति तत् साधारणनाम ।

**उक्तञ्च श्रीबन्धशतकचूर्णौ**- (गा. ३९/पत्र. ५८)

"साहारणं ति सामान्यं जस्सोदयाओ बहवो जीवा एगं शरीरं णिव्वत्तयंति, यथा देवदत्ताऽऽदयो सामान्यं देवकुलं ।" इति ।

**ननु** कथमनन्तानां जीवानामेकं शरीरमुत्पद्यते ? यतो य एव प्रथममुत्पत्तिमागतस्तेन तच्छरीरं निष्पादितम्, अन्योन्याऽनुगमनेन च सर्वात्मना क्रोडीकृतम्, ततः कथमन्येषां जीवानां तत्राऽवकाशः ? न खलु देवदत्तशरीरे देवदत्त इव सकलशरीरेण सहाऽन्योन्याऽनुगमपुरस्सरमन्येऽपि जीवाः प्रादुष्षन्ति; तथाऽदर्शनात् । अपि च सत्यप्यवकाशे येनैव तच्छरीरं निष्पाद्याऽन्याऽनुगमेन क्रोडीकृतं स एव तत्र प्रधान इति तस्यैव पर्याप्ताऽपर्याप्तव्यवस्था प्राणापानाऽऽदियोग्यपुद्गलोपादानं वा भवेत्, न शेषाणा**मिति चेत्,** तन्न सम्यक्, जिनप्रवचनाऽभिप्रायपरिज्ञानरहितत्वात् । **तद्यथा-** यदा तत्रैकः साधारणत्वेन जायते, तदानीमेव तथाविधकर्मोदयसामर्थ्यतस्तेऽनन्ता अपि जीवा समकमेवोत्पत्तिदेशमधितिष्ठन्ति, समकमेव तच्छरीराऽऽश्रिताः पर्याप्तीर्निर्वर्त्तयितुमारभन्ते, समकमेव च पर्याप्ता भवन्ति, समकमेव च प्राणाऽपानाऽऽदियोग्यान् पुद्गलानादत्ते । यच्चैकस्य पुद्गलाऽभ्यवहरणं तदन्येषामनन्तानामपि साधारणम्, यच्चाऽनन्तानां तद्विवक्षितस्याऽपि जीवस्य । तदेवमेकस्याऽऽहारोच्छ्वास-निःश्वासा यदा जायन्ते तदैवाऽनन्तानामपि, यदाऽनन्तानामाहाराऽऽदयो भवन्ति, तदैवैकस्याऽपि, एवं यावदेको नश्यति तदाऽनन्ता अपि समकमेव नाशमाप्नुवन्ति ।

**उक्तञ्च श्रीप्रज्ञापनासूत्रे** — (प.१, सू.२६/भा. १, पत्र. ३९-१)

"समयं वक्कंताणं , समयं तेसिं सरीरनिव्वत्ती । समयं आणुग्गहणं , समयं ऊसासनीस्सासो ॥९५॥
इक्कस्स उ जं गहणं , बहूण साहारणाण तं चेव । जं बहुयाणं गहणं, समासओ तंपि इक्कस्स ॥९६॥
साहारणमाहारो , साहारणमाणपाणगहणं च । साहारणजीवाणं , साहारणलक्खणं एयं ॥९७॥" इति ।

**तत्त्वार्थभाष्ये** पुनः साधारणशरीरनाम इति भणितम् । **तथा च तद्ग्रन्थः**-- "अनेकजीवसाधारणशरीरनिर्वर्तकं साधारणशरीरनाम ।" (अ. ८, सू.१२ / भा. २, पत्र. १५८) इति । **तथा श्रीतत्त्वार्थभाष्यवृत्तावपि** - "अनेकजीवेत्यादि । अनेकशब्देनाऽनन्तसङ्ख्याग्रहणम् । अनन्तानां जीवानामेकशरीरं साधारणं किसलयनिगोदवज्रप्रभृति तथैकजीवस्य परिभोगस्तथाऽनेकस्याऽपि । तदभिन्नं सद् यस्य कर्मण उदयान्निर्वर्तते तत्साधारणशरीरनाम" (अ.८, सू. १२/ भा. २, पत्र. १५८) इति ।

यदुदयात्कर्ण-भ्रू-नेत्र-जिह्वा-त्वगादीनां शरीराऽवयवानामस्थिरता = चलता मृदुता भवति, तदस्थिरनाम। **उक्तञ्च तत्त्वार्थभाष्यवृत्तौ** - "यदुदयादस्थिरता चलता-मृदुता भवति कर्ण-त्वगादीनां तदस्थिरनामेति।" (अ. ८, सू. १२/ भा. २, पत्र. १६२- १६३) इति।

**तथा चात्र बृहत्कर्मविपाकग्रन्थः-**

"जीहाभमुहाईणं, अंगावयवाण जस्स उदएणं। निप्फत्ती उ सरीरे, जायइ तं अथिरनामं तु ॥१४१॥" ▲ इति।

यदुदयान्नाभेरधस्तनाः शरीरस्य पादाऽऽदयोऽवयवा अशुभा भवन्ति, तद् अशुभनाम।

**यदाह बृहत्कर्मविपाके -**

"पायाई असुहाणं, अंगावयवाण जस्स उदएणं। निप्फत्ती उ सरीरे, जायइ तं असुभनामं तु ॥१४३॥" इति।

यतः पादाऽऽदिना स्पृष्टो हि परो रुष्यति, कामिन्याः पादस्पर्शेनाऽपि यस्तोषः स मोहनीयनिबन्धनो न तु वास्तव इति नाऽस्ति तेन व्यभिचार इति प्रागेव शुभनाम व्याख्यानावसरे दर्शितम्। ★

यदुदयवशादुपकार्यपि जनस्य द्वेष्यो भवति, तद् दुर्भगनाम। **उक्तञ्च -**

"उवगारकारगो वि हु, न रुच्चई दूभगो उ जस्सुदए।" (**नव्यकर्मविपाक**गाथा ५० वृ. पत्र. ६७) इति।

**तथा बृहत्कर्मविपाकेऽपि** - "दूहगकम्मुदए पुण, दुहओ सो सयललोयस्स ॥१४४॥" इति।

यदुदयात् स्वरः खरो भिन्नो हीनो वा कर्णकटुः श्रोतॄणामप्रीतिकरो जायते, काकोलूकाऽऽदिस्वरवत्, तद् दुःस्वरनाम।

**यदुक्तं प्राचीनकर्मविपाके** - "दूसरउदए विसरो, जंपंतो होइ जणवेसो ॥१४५॥" इति।

यदुदयवशाद् उपपन्नमपि = युक्तियुक्तमपि ब्रुवाणो नोपादेयवचनो भवति, नाऽप्युपक्रियमाणोऽपि जनस्तस्याऽभ्युत्थानाऽऽदि समाचरति तद् अनादेयनाम। ※

यदुदयात् पूर्वप्रदर्शितस्वरूपे यशःकीर्ती न भवतः, तद् अयशःकीर्तिनाम। तथा यदुदयान्मध्यस्थजनस्याऽप्यप्रशस्यो भवति, दोषविषया च प्रख्यातिर्जायते तदप्ययशःकीर्तिनाम।

**तत्त्वार्थभाष्ये** पुनर्यशोनामेव 'अयशोनाम' एव कर्म प्रोक्तम्, न तु 'अयशःकीर्तिनाम' इति नाम्ना।

**तथा च तद्ग्रन्थः**:-"तद्विपरीतमयशोनामेति" (अ. ८ सू. १२/भा. २, पत्र. १६३) इति।

**तथैव तद्वृत्तावपि**-"तद्विपरीतम् अयशोनाम। दोषविषया प्रख्यातिरयशोनामेति।" (अ.८,सू.१२/भा. २, पत्र. १६३) इति।

**इदं पुनरत्राऽवधेयम्** - यत्र त्रसदशकमुच्यते तत्र त्रस-बादराऽऽदि-त्रसोपलक्षिता दशाऽपि नामप्रकृतयो गृह्यन्ते, यत्र तु त्रसनवकमिति भण्यते तत्र सामान्यतो यशःकीर्तिवर्जा नव ग्राह्याः, कुत्रचित्पुनरन्यथाऽपि। यत्र पुनस्त्रसचतुष्कमभिधीयते तत्र त्रस-बादर-पर्याप्त-प्रत्येकरूपाश्चतस्रो नामप्रकृतयो ग्राह्याः। यत्र त्रसद्विकं कथ्यते तत्र त्रस-बादररूपं नामप्रकृतिद्विकमादीयते।

---

▲ **राजवार्त्तिककारास्तु** - *"यदुदयाद् ईषदुपवासाऽऽदिकरणात्स्वल्पशीतोष्णाऽऽदिसम्बन्धाच्च अङ्गोपाङ्गानि कृशीभवन्ति। तदस्थिरनाम"* इति भणन्ति।

★ **राजवार्त्तिककारैः पुनः** - *"तद्विपरीतफलद्रष्टुः श्रोतुश्चाऽरमणीयकरम् अशुभनाम"* इति पठ्यते।

※ **राजवार्त्तिककारैः पुनः** - *"यस्योदयाच्छरीरं निष्प्रभमापद्यते, तदनादेयनाम"* इति पठ्यते।

यत्र त्रसत्रिकं पठ्यते । तत्र त्रस-बादर-पर्याप्तरूपास्तिस्रो नामप्रकृतय उपादीयन्ते । यत्र बादरत्रिकं गद्यते तत्र बादर-पर्याप्त-प्रत्येकलक्षणानि त्रीणि नामकर्माणि ग्रहीतव्यानि । पर्याप्तत्रिकमित्युच्यमाने पर्याप्त-स्थिर-शुभलक्षणास्तिस्रो नामप्रकृतयो गृह्यन्ते यत्र स्थिरषट्कमुच्यते तत्र स्थिर—शुभ-सुभग-सुस्वरा-ऽऽदेय-यशःकीर्तिरूपं नामप्रकृतिषट्कमुपादेयम् । यत्र शुभपञ्चकमुच्यते तत्र क्रमशस्त्रसाऽऽदिदशप्रकृतिमध्ये शुभाऽऽदयः पञ्च प्रकृतयो ग्रहणीयाः । सुभगचतुष्केण च भणितत्रसाऽऽदिदशप्रकृतिमध्यात् क्रमेण सुभगाऽऽदीनि चत्वारि नामकर्माणि आदेयानि । इत्थमत्र त्रसाऽऽदिदशकमध्यात् यां प्रकृतिं प्रधानीकृत्य यावत्यः प्रकृतयो भण्यन्ते तदादयस्तावत्यः क्रमशस्ता ग्राह्याः । एवं स्थावरप्रकृतिदशकेऽपि । कदाचित्कुत्रचित्पुनरादिशब्देनाऽऽदिशब्दं विनाऽपि वाऽन्यथाऽपि प्रकृतिग्रहणं क्रियते । यत्र पुनस्त्रसाऽऽदियुगलानि भण्यन्ते तत्र तत्र सप्रतिपक्षानि तानि बोध्यानि सामान्यतो । यथा त्रसयुगलं त्रस-स्थावररूपम्, बादरयुगलं बादरसूक्ष्मरूपम् इत्यादि । विशेषतः पुनः कुत्रचित् त्रसयुगलं त्रसद्विकलक्षणं त्रस-बादररूपमित्याद्यपि ज्ञेयम् ॥१३॥

तदेवं नामकर्मणो द्विचत्वारिंशद्भेदा निरूपिताः । साम्प्रतं तस्यैव त्र्युत्तरशतभेदान् चिकथयिषुः पिण्डप्रकृतिसंज्ञकानां गत्यादिचतुर्दशपदानां येषां यावन्तो भेदाः सन्ति तावत उत्तरभेदानेकगाथया सङ्ख्यामात्रेण प्ररूपयति —

**पिंडपयडीण चउ-पण - पण-त्तिग-पणरस-पंच-छग-छक्कं ।**
**पण-दु-पण-ऽट्ठ-चउ-दुगं , पणसयरी उत्तरा भेआ ॥१४॥**

(प्रे०) "**पिंड०**" इत्यादि, 'पिण्डप्रकृतीनां' प्राग्वर्णितस्वरूपाणां गत्यादिचतुर्दशप्रकृतीनां यथासङ्ख्यं चतुरादय उत्तरभेदाः समुदिताश्च = सम्मीलिताश्च पञ्चसप्ततिर्भवन्तीति समुदितवाक्यार्थः । **विस्तृताऽर्थस्त्वयम्- तद्यथा-** गतिनाम्नश्चत्वार उत्तरभेदाः, जातिनाम्नः पञ्चोत्तरभेदाः, तनुनाम्नः पञ्चोत्तरभेदाः, अङ्गोपाङ्गनाम्नस्त्रय उत्तरभेदाः, बन्धननाम्नः पञ्चदशोत्तरभेदाः, संघातनाम्नः पञ्चोत्तरभेदाः, संहनननाम्नः षडुत्तरभेदाः, संस्थाननाम्नः षडुत्तरभेदाः, वर्णनाम्नः पञ्चोत्तरभेदाः, गन्धनाम्नो द्वावुत्तरभेदौ, रसनाम्नः पञ्चोत्तरभेदाः, स्पर्शनाम्नोऽष्टोत्तरभेदाः, आनुपूर्वीनाम्नश्चत्वार उत्तरभेदाः, विहायोगतिनाम्नश्च द्वावुत्तरभेदौ । एते च सर्वे मीलिताः पञ्चसप्ततिसङ्ख्याका गत्यादिचतुर्दशपिण्डप्रकृतीनां सर्वसङ्ख्याऽवान्तरभेदा भवन्ति ॥१४॥

एतर्हि गति-जातिप्रभृतीनां पिण्डप्रकृतीनामनन्तरगाथायां सङ्ख्यामात्रेण निर्दिष्टान् चतुराद्योत्तरभेदान् नामग्राहेण व्याख्यातुमना ग्रन्थकार आदौ तावदेकगाथया गति-जाति-शरीरोत्तरभेदानाह —

**णिरय-तिरि-णर-सुरगई , इग-विअ-तिग-चउ-पणिंदिजाईओ ।**
**उरल-विउव्वा-ऽऽहारग - तेअग-कम्मणसरीरा य ॥१५॥**

(प्रे०) "**णिरय०**" इत्यादि, 'निरय-तिर्य-ङ्नर-सुरगतिः, निरयाश्च तिर्यञ्चश्च नराश्च सुराश्च निरय-तिर्य-ङ्नर-सुराः, तेषु गतिः निरय-तिर्य-ङ्नर-सुरगतिः, "द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते" इति **न्याया**दिह गतिशब्दः प्रत्येकं योज्यते नाम्नः प्रस्तुतत्वात्तदप्यनुयोज्यते ततो निरयगतिनाम, तिर्यग्गतिनाम, नरगतिनाम सुरगतिनाम चेति चतुर्विधं गतिनाम।

तत्र एतीत्ययः "अच्" (सिद्धहेम०-५-१-४९) इति **सिद्धहेम**सूत्रेण कर्तर्यच्प्रत्ययः । "नियतौ विधिः । दैवं भाग्यं भागधेयं दिष्टं चायस्तु तच्छुभम् ॥१३७९॥" इति । **हैमीयाऽभिधानचिन्तामणिकोश**वचनाद् अयः = शुभदैवम् "अयमिष्टफलं दैवं" इति **वचना**त्पुनर् अयम् = इष्टफलं सातावेदनीयाऽऽदिरूपम्, निर्गतोऽयः, निर्गतमयं वा येभ्यस्ते निरयाः = सीमन्तकाऽऽदयो नरकावासाः, तत्र विषये गतिरिति निरयगतिः, सैव नाम निरयगतिनाम तद्विपाकवेद्यं कर्माऽपि निरयगतिनाम, नारकशब्दव्यपदेश्यपर्यायनिबन्धनं निरयगतिनामेत्यर्थः । एवं यदुदयवशात् तिर्यङिति वा नरेति वा सुरेति वा व्यपदिश्यते तत् क्रमेण तिर्यग्गतिनाम वा नरगतिनाम वा सुरगतिनाम वा । तिर्यगादयस्तु शब्दाः प्रागेव विस्तरेण व्युत्पादिता इति नेह प्रपञ्च्यन्ते ।

"**इग०**" इत्यादि, एक-द्वि-त्रि-चतुष्-पञ्चेन्द्रियजातयः एकाऽऽदिषु समानाऽधिकरणत्वात् इन्द्रियशब्दः प्रत्येकमभिसम्बध्यते एकेन्द्रियाश्च द्वीन्द्रियाश्च त्रीन्द्रियाश्च चतुरिन्द्रियाश्च पञ्चेन्द्रियाश्चेत्येकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियाः,तेषां जातयः, एकेन्द्रिय-द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रियजातयः, द्वन्द्वाऽन्ते श्रूयमाणस्य पदस्य प्रत्येकमभिसम्बन्धाद्, नाम्नः प्रकृतत्वेन तस्याऽपि योजनाच्च एकेन्द्रियजातिनाम, द्वीन्द्रियजातिनाम, त्रीन्द्रयजातिनाम, चतुरिन्द्रियजातिनाम, पञ्चेन्द्रियजातिनाम चेति पञ्चविधं जातिनाम ।

यदुदयवशाज्जीव एकेन्द्रिय इति व्यपदिश्यते तद् एकेन्द्रियजातिनाम, एवं द्वीन्द्रियाऽऽदिजातिनामान्यपि व्याख्येयानि । एतदभावे तु जातिरिति सामान्येन पृथ्व्यादिभेदेषु समन्वितत्वाद् एकेन्द्रियाऽऽदिसंज्ञाया अभाव एव स्यात् ।

**यदुक्तं श्रीतत्त्वार्थभाष्यवृत्तौ –**

"एकेन्द्रियजातिनामेत्यादि । एकं = प्रथममिन्द्रियं जातिः = सामान्यं तदेव नाम, एवं द्वीन्द्रियजातिनामाऽऽदिचतुष्टयमपि वाच्यम् । एकेन्द्रियजातिनामकर्मोदयादेकेन्द्रिय इति व्यपदिश्यते । एकेन्द्रियसंज्ञाव्यपदेशनिमित्तम् एकेन्द्रियजातिनाम जातिरिति सामान्येन पृथिव्यादिभेदेष्वन्वितत्वाद्, एकेन्द्रियजातिनामान्तरेणैकेन्द्रियसंज्ञाया अभाव एव स्यात् ।" (अ.८, सू.१२/भा.२, पत्र.१५०) इति ।

एकेन्द्रियाऽऽदयः पञ्चाऽपि जातयो व्यापिकाः सन्ति, तत्रैकेन्द्रियजातेर्व्याप्या जातयः पृथ्वीकायिकाऽऽदयः, तासामपि व्याप्या जातयः शकरा-वालुको-पलाऽऽदिप्रमुखाः ताश्च "पिंडपयडित्ति चउदस -" इति (११) गाथाऽवयवव्याख्यानाऽवसरे पिण्डप्रकृतीर्व्याख्यायता वृत्तिकृता दर्शिताः । तेन पृथ्वीकायिकाऽऽदिजातय एकेन्द्रियजात्यपेक्षया व्याप्याः शर्करा-वालुको-पलाऽऽदिप्रभृतिजात्यपेक्षया पुनर्व्यापिकाः, एकेन्द्रियजातिस्तु केवलं व्यापिका ।

व्यापकत्वं चेह व्याप्यजातिभिन्नत्वे सति व्याप्तजात्यधिकरणवृत्तिर्य उभयवृत्तिधर्माऽनवछिन्नप्रतियोगिताकाऽत्यन्ताऽभावस्तदप्रतियोगित्वम् । यथा पृथ्वीकायिकजातेर्व्यापिकैकेन्द्रियजातिः । **तद्यथा-**एकेन्द्रियजातेः पृथ्वीकायिकजातिभिन्नत्वे सति पृथ्वीकायिकजात्यधिकरणे पृथ्वीकायिकसंज्ञके उभयवृत्तिधर्माऽनवच्छिन्नप्रतियोगिताकोऽप्कायजात्यत्यन्ताऽभावः, तदप्रतियोगित्वमेकेन्द्रियजातौ वर्तते । यस्मात्तादृशाऽभावीयप्रतियोगिताऽप्कायजातावस्ति । तेनैकेन्द्रियजातेः पृथ्वीकायिकजात्यपेक्षया व्यापकता । व्यापकलक्षणे यदि "व्याप्यजातिभिन्नत्वे सति" इत्येतन्नोपादीयेत तर्हि पृथ्वीकायिकजात्यधिकरणे वर्तमानो य उभयवृत्तिधर्माऽनवच्छिन्नप्रतियोगिकोऽप्कायिकजात्यत्यन्ताऽभावस्तदप्रतियोगितायाः पृथ्वीकायिकजातौ सत्त्वात् पृथ्वीकायिकजातौ पृथ्वीकायिकजात्यपेक्षया व्यापकत्वं स्यात्, तच्चाऽनभीष्टम् । "उभयवृत्तिधर्माऽनवच्छिन्नप्रतियोगिताकः" इत्यस्याऽनुपादाने पृथ्वीकायिकजात्यधिकरणे पृथ्वीकायिकाऽभिधे "एकसत्त्वे उभयं नास्ति" इति प्रसिद्धेः एकेन्द्रिय-द्वीन्द्रियजात्युभयवृत्ति-धर्माऽवच्छिन्नप्रतियोगिताको य एकेन्द्रियजाति-द्वीन्द्रियजात्यभावः, तत्प्रतियोगितायाः पृथ्वीकायिकजातिभिन्नायामेकेन्द्रियजातावुपलम्भादेकेन्द्रियजातेर्व्यापकता न भवेत्, तच्चाऽनभिप्रेतम् । एवं शर्कराऽऽदिजात्यपेक्षया पृथ्वीकयिकाऽऽदिजातीनामपि व्यापकता ज्ञेया । एवमेव द्वीन्द्रियाऽऽदिजातीनामपि ।

तत्र द्वीन्द्रियजातेर्व्याप्या जातयः शङ्ख-शुक्त्यादयः, त्रीन्द्रियजातेरुपदेहिका-पिपीलिकाऽऽदयः, चतुरिन्द्रियजातेर्भ्रमर-सरघाऽऽदयः, पञ्चेन्द्रियजातेश्च नर-नारकाऽऽदयः ।

**उक्तञ्च तत्त्वार्थभाष्यवृत्तौ —** "द्वि-त्रि-चतुः-पञ्चेन्द्रियजातिनामानि शङ्ख-शुक्तिकाऽऽद्यु-पदेहिका-पिपीलिकाऽऽदि-भ्रमर-सरघाऽऽदि-तर्यग्-मनुष्याऽऽदिभेदेन वाच्यानि ॥" (अ. ८, सू.१२/भा.२, पत्र.१५१) इति ।

**ननु** प्रागेव जातिनामव्याख्यानाऽवसरे तिर्यक्त्वस्य पञ्चेन्द्रियत्वाऽऽदिना साङ्कर्यान्नरत्व-नारकत्वाऽऽदिकं न जातिरूपमिति प्रतिपादितमिह पुनः पञ्चेन्द्रियजातेर्व्याप्यजातित्वेन नर-नारकाऽऽदयः प्रोक्ताः ततः कथं न विरोधः? **इति चेत्, सत्यम्,** प्राग् यो निषेधो भणितस्तत्तु **श्रीमन्महामहोपाध्याययशोविजयाऽभिप्रायेण** प्रोक्तम्, इह पुन**रन्याऽभिप्रायेणे**ति न दोषः, तदत्र तत्त्वं पुनस्**तद्विदो** विदुः । **तथा चाऽत्र प्राहुः श्रीमहामहोपाध्याययशोविजयपादाः कर्मप्रकृतिवृत्तौ-** "अपकृष्टचैतन्याऽऽदिनियामकतयैकेन्द्रियत्वाऽऽदिजातिसिद्धिस्तदेव चैकेन्द्रियाऽऽदिव्यवहारनिमित्तं लाघवात्तन्निबन्धनतया च जातिनामसिद्धिः । नारकत्वाऽऽदिकं च न जातिरूपं तिर्यक्त्वस्य पञ्चेन्द्रियत्वाऽऽदिना साङ्कर्यात्, किंतु सुखदुःखविशेषोपभोगनियामकपरिणामविशेषरूपं तन्निबन्धनरूपतया च गतिनामसिद्धिरिति कृतं प्रसङ्गेन ।" (गा. १/ पत्र.५-२) इति ।

"**उरल०**" इत्यादि औदारिकं च वैक्रियं चाऽऽहारकं च तैजसं च कार्मणं चेत्यौदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणानि, तेषां शरीराः औदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणशरीराः । "द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते" इति **न्याये**नाऽत्र शरीरशब्दः प्रत्येकमन्वेति, नामाऽपि प्रक्रमात्सम्बध्यते, ततो**ऽयमर्थः**-औदारिकशरीरनाम, वैक्रियशरीरनाम, आहारकशरीरनाम तैजसशरीरनाम कार्मणशरीरनाम चेति पञ्चप्रकारं शरीरनाम । तत्र उदारं = प्रधानम् प्राधान्यञ्चाऽस्य मोक्षहेतुत्वात्, तीर्थकर-गणधराऽऽदिशरीराऽपेक्षया वा ततोऽन्यस्याऽनुत्तरशरीरस्याऽप्यनन्तगुणहीनत्वात्, **यद्वा** उद्गता = उत्कृष्टा आरा = छाया यस्य, तद् उदारम्, उत्कृष्टछायामित्यर्थः । **यद्वा** उत् = उत्कृष्टा आरा = मर्यादा धर्मनीत्यात्मका यस्य, तद् उदारम्, **अथवा** उपादानात्प्रभृत्यनुसमयम् उद्गच्छति = वर्धते जीर्यते शीर्यते परिणमतीत्यादि पर्यायान्तरप्राप्त्या मुहुर्मुहुरुद्गमनाद् उदारम्, निपातनाद्धि इष्टरूपसिद्धिः । **यद्वा** उदारं= सातिरेकयोजनसहस्रमानत्वाच्छेषशरीराऽपेक्षया बृहत्प्रमाणम्, बृहत्ता चाऽस्य वैक्रियं प्रति भवधारणीयसहजशरीराऽपेक्षया द्रष्टव्या, अन्यथोत्तरवैक्रियशरीरं योजनलक्षमानमपि लभ्यते । भवधारणीय-सहजवैक्रियशरीरं पुनरुत्कृष्टतोऽपि पञ्चशतधनुःप्रमाणं समस्ति । **यदाह श्रीप्रज्ञापनासूत्रचूर्णौ -** "ओरालं नाम वित्थरालं विसालं ति जं भणियं होइ, कथं ? साइरेगजोयणसहस्समवट्ठिय-माणमोरालियं अन्नमेद्दहत्तं नत्थि त्ति, वेउव्वियं होज्जा ? तं तु अणवट्ठियप्पमाणं अवट्ठियं पुण पंचधणुसयाइं इमं पुण अवट्ठियप्रमाणसाइरेगं जोयणसहस्सं ।" इति । इति बृहत्ताऽवगाहनाऽपेक्षयैव विवक्षितवैक्रियत औदारिकस्याऽवगाहना असंख्यगुणाऽस्ति । **तथा चोक्तं कर्मप्रकृतिचूर्णौ -** "कम्मतिगसरीरवग्गणातो आढत्तं जाव उरालियसरीरदव्ववग्गणा ताव असंखेज्जगुणा ओग्गाहणट्ठाते भाणियव्वा तो ।" (गा. १८-१९-२० / पत्र. ४३-२) इति । न पुनः प्रदेशाऽपेक्षयाऽपि प्रदेशाऽपेक्षया हि तस्याऽसंख्येयगुणहीनताया **मतान्तरे** पुनरनन्तगुणहीनताया लाभात् । **यदुक्तं बन्धशतकचूर्णौ -** "कहमुदारत्तं ? भन्नइ पएसतो असंखेज्जगुणहीणत्तातो ओगाहणातो असंखेज्जगुणऽब्भहिअमिति ।" (गा. २/पत्र. १४) इति । **यद्वा** उदारमेवौदारिकम्, "विनयादिभ्यः" (सिद्धहेम०- ७-२-१६९) इत्यनेन सूत्रेण स्वार्थे इकण्प्रत्ययः । **यद्वा** उदारं = स्थूलम्, वैक्रियाऽऽदीनामुत्तरोत्तरं सूक्ष्मत्वात् । **यद्वा** उदारं = बृहदसारम्, शेषवैक्रियाऽऽदिपुद्गलाऽपेक्षया निःसारत्वात् । तन्निष्पन्नमौदारिकम् । **यदुक्तं श्रीतत्त्वार्थभाष्यवृत्तौ-**

"असारस्थूलद्रव्यवर्गणानिर्मापितमौदारिकशरीरम्" (अ. ८, सू. १२/भा. २, पत्र. १५१) इति । **तथा श्रीबन्धशतकचूर्णावपि–** "उदारं बृहदसारं तं णिप्पन्नमौदारिकं, असारथूलदव्ववग्गणाकारणसमारद्धं" (गा. ३९ पत्र. ५५) इति । **उक्तञ्चाऽन्यत्राऽपि–**

"तत्थोदारमुरालं , ओरालमहव महल्लगत्तेणं । ओरालियं ति पढमं, पडुच्च तित्थेसरसरीरं ॥ ॥
भण्णइ य तहोरालं , वित्थरवंतं वणस्सतिं पप्प । पयईइ नत्थि अन्नं, इद्दहमित्तं विसालं ति ॥ ॥
उरलं थेवपएसो - वचियं पि महल्लगं जहा भिंडं । मंसट्ठिण्हारुबद्धं , ओरालं समयपरिभासा ॥ ॥" इति ।

तन्निबन्धनं नामौदारिकशरीरनाम, यदुदयवशाद् औदारिकशरीरप्रायोग्यान् पुद्गलान् आदत्ते तद् औदारिकशरीरनामेत्यर्थः । **उक्तञ्च श्रीतत्त्वार्थसूत्रभाष्यवृत्तौ -**

"तत्प्रायोग्यपुद्गलग्रहणकारणं यत् कर्म तदौदारिकशरीरनामोच्यते ।" (अ. ८, सू. १२/भाग. २, पत्र. १५१) इति ।

**तथा श्रीबन्धशतकचूर्णावपि -** "तप्पाओग्गपोग्गलग्गहणकारणं जं कम्मं तं ओरालियसरीरणामं" (गा. ३९/ पत्र.५५) इति ।

वि = विशिष्टा विविधा वा क्रिया = चेष्टा विक्रिया, तस्यां भवं वैक्रियम्, "भवे" (सिद्धहेम०- ६-३-१२३) इत्यनेन अण्प्रत्ययः । **यद्वा** विक्रियया, कृतं वैक्रियम्, "कृते" (सिद्धहेम०-६-३-१९२) इत्यनेन सूत्रेण अण्प्रत्ययः । **एतदुक्तं भवति-** एकं भूत्वाऽनेकं भवति, अनेकं भूत्वैकं भवति, अणु भूत्वा महद्भवति, महद्भूत्वाऽणु भवति, खेचरं भूत्वा भूमिचरं भवति, भूमिचरं भूत्वा खेचरं भवति, दृश्यं भूत्वाऽदृश्यं भवति, अदृश्यं भूत्वा दृश्यं भवति, एकाऽऽकारं भूत्वाऽनेकाऽऽकारं भवति, अनेकाऽऽकारं भूत्वैकाऽऽकारं भवति, प्रतिघाति भूत्वाऽप्रतिघाति भवति, अप्रतिघाति भूत्वा प्रतिघाति भवति, इत्यादि * । तच्च द्विविधम्, औपपातिक-लब्धिप्रत्ययभेदात् । तत्रोपपातः = जन्म, तत्र भवम्, औपपातिकम् "भवे" (सिद्धहेम०-६-३-१२३) इत्यनेन इकण्प्रत्ययः । तच्च देव-नारकाणाम् । लब्धिप्रत्ययं पुनस्तिर्यङ्मनुष्याणाम् ।

**यदुक्तमनुयोगद्वारसूत्रलघुवृत्तौ-**

▲ "विविहा विसिट्ठगा वा, किरिया तीए अ जं भवं तमिह । णियमा विउव्वियं पुण, नारगदेवाण पयईए ॥ ॥" इति ।

तन्निबन्धनं शरीरनामकर्माऽपि वैक्रियशरीरनाम, यदुदयवशाद् वैक्रियशरीरप्रायोग्यान् पुद्गलान् गृह्णाति, तद्वैक्रियशरीरनामेत्यर्थः । **उक्तञ्च श्रीतत्त्वार्थसूत्रभाष्यवृत्तौ -**

"विचित्रशक्तिकद्रव्यनिर्मापितं वैक्रियम्, तद्योग्यपुद्गलादानकारणं यत्कर्म तद् वैक्रियशरीरनामाऽभिधीयते ।" (अ. ८, सू. १२ / भा. २, पत्र.१५१) इति ।

आह्रियते=निर्वर्त्यते चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनाऽऽदिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादित्याहारकम् "बहुलम्" (सिद्धहेम०-५-१-२) इति सूत्रेण कर्मणि णकप्रत्ययः, यथा पादहारक इत्यादौ । **यदुक्तम् -** "कज्जम्मि समुप्पन्ने, सुयकेवलिणा विसिट्ठलद्धीए । जं इत्थ आहरिज्जइ, भणंति आहारगं तं तु ॥ ॥
पाणिदयरिद्धिसंदरिसणऽत्थ-अत्थोवगहणहेउं वा । संसयवुच्छेयत्थं , गमणं जिणपायमूलम्मि ॥ ॥" इति ।

---

* **यद्वा** विशिष्टं कुर्वन्ति तदिति वैकुर्विकम्, पृषोदराऽऽदित्वात् अभीष्टरूपप्रसिद्धिः **अथवा** विकुर्व इत्यागमप्रसिद्धो धातुः, विकुर्वणं विकुर्वः = विविधा क्रिया, तेन निर्वृत्तम्, तत्र भवं वा वैकुर्विकम् अनया व्युत्पत्त्या वैकुर्विकशरीरनाम इत्यपि बोध्यम् । ▲ **प्रज्ञापनाहरिभद्रसूरिवृत्तौ पुनरेवं गाथा-** *"विविहा विसिट्ठया वा, किरिया एइ य जं भवं तमिह । वेउव्वियं तयं पुण, नारगदेवाण सहजम्मं ॥ ॥"* (प. १२/ भा.२, पत्र.८६) इति ।

**तथैव श्रीहरिभद्रसूरिपादैः प्रज्ञापनोपाङ्गवृत्तावपि भणितम् –** "योगबलेनाऽऽह्रियत इत्याहारकं **उक्तञ्च-** 'कज्जम्मि समुप्पन्ने, सुयकेवलिणा विसिट्ठलद्धीए । जं एत्थ आहरिज्जति, भणंति आहारगं तं तु ॥१॥ **'कार्याणि वाऽमूनि-** 'पाणिदयरिद्धिदरिसण-अत्थं[1] अत्थोवगहणहेतुं[2] वा । संसयवोच्छेदत्थं[3] , गमणं जिणपायमूलम्मि ॥१॥' 'कार्यसमाप्तौ च पुनर्मुच्यते, याचितोपकरणवत्" (प. १२ / भा. २, पत्र. ८६) इति ।

**यद्वा ★** आह्रियन्ते = गृह्यन्ते तीर्थकराऽऽदिसमीपे जीवाऽऽदयः सूक्ष्मपदार्था अनेनेत्याहारकः । प्रागुक्तसूत्रेणैव करणेऽपि बाहुलाद् णकप्रत्ययः । **उक्तञ्च बन्धशतकचूर्णौ-** "आहारेइ अणेण सुहमे अत्थे इति वा आहारगं" (गा.२/पत्र.१४) इति ।

तच्च वैक्रियाऽपेक्षयाऽत्यन्तं शुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहघटनाऽऽत्मकं वस्तुप्रतिबिम्बाऽऽधारभूतम् ।

**उक्तञ्च श्रीबन्धशतकचूर्णौ –**

"शुभतरशुक्लविशुद्धद्रव्यैः शरीरं प्रयोजनायाऽऽह्रियते इति आहारकं ।" (गा. ३९/पत्र. ५४) इति ।

**तथा चाऽत्र श्रीतत्त्वार्थभाष्यवृत्तिः-** "कारणे कार्योपचारात् प्रयोजनप्रसाधनायाऽऽह्रियत इत्याहारकशरीरम् ।" (अ. ८, सू. १२/भा. २, पत्र. १५१) इति ।

तन्निबन्धनं शरीरनाम, आहारकशरीरनाम, यदुदयवशादाऽऽहारकशरीरप्रायोग्यपुद्गलान् गृह्णाति, तदाहारकशरीरनामेत्यर्थः, तच्चाऽऽहारकशरीरं सूक्ष्मत्वादग्निना न दह्यते, पर्वतैर्न प्रतिहन्यते, शस्त्रैर्न छिद्यते ।

तेजसा = तेजःपुद्गलैर्निर्वृत्तं तैजसम्, **यद्वा** तेजःपुद्गलानां विकारस्तैजसं "विकारे"(सि० ६-२-३०) इत्यणप्रत्ययः, यद् भुक्ताऽऽहारपरिणमनहेतुः, यद्वशाच्च विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः, यथा रोषवशाद् गोशालकस्य तेजोलेश्याविनिर्गमः । **उक्तञ्च श्रीत्त्वार्थभाष्यवृत्तौ-** (अ. ८, सू. १२/भा. २, पत्र. १५१)

"तेजोगुणद्रव्याऽऽरब्धमुष्णगुणमाहारपरिपाचनक्षमं तैजसं शरीरं ।" इति । **तथा श्रीबन्धशतकचूर्णावपि-** (गा.३९/पत्र.५५)

"तेज इत्यग्निः, तेजोगुणोपेतद्रव्यसमारब्धं तेजसमुष्णगुणं तमेव, जया उत्तरगुणेहिं लद्धी समुप्पज्जइ तदा रोसाविद्धो णिंसिरइ, जहा गोसालो, जस्स ण संभवइ लद्धी, तस्स सततमुदराई (मोदनाई) आहारपाचकं ।" इति ।

**तथाऽन्यत्राऽपि -** "सव्वस्स उण्हसिद्धं, सराइआहारपागजणगं च । तेयगलद्धिनिमित्तं, च तेयगं होइ नायव्वं ॥ ॥" इति ।

तत्कारणं कर्माऽपि तैजसशरीरनाम । यदुदयवशात्तैजसशरीरप्रायोग्यान् पुद्गलानादत्ते ।

कर्मणा निष्पन्नं कार्मणम्, समस्तकर्मराशेराधारभूतम्, कुण्डमिव बदराऽऽदीनाम्, अशेषकर्मप्रजननसमर्थं वा, यथा बीजमङ्कुराऽऽदीनाम् । **यदुक्तं श्रीबन्धशतकचूर्णौ-** (गा. ३९/ पत्र. ५५)

"कम्मइगं सव्वकम्माऽऽधारभूतं जहा कुण्डं बदराऽऽईणं सर्वकर्मप्रसवसमर्थं वा यथा बीजं अङ्कुराऽऽदीनां ।" इति ।

**तथा श्रीतत्त्वार्थभाष्यवृत्तावपि -** "कुण्डमिव बदराऽऽदीनामशेषकर्माऽऽधारभूतं समस्तकर्मप्रसवनसमर्थमङ्कुराऽऽदीनां बीजमिव कार्मणशरीरम् ॥" (अ. ८, सू. १२/ भाग. २, पत्र. १५१) इति । **अथवा** कर्मैव कार्मणम् । **न च** कर्मतः कार्मणस्य भिन्नत्वेनोपपत्तिदर्शनात् स्वार्थिकप्रत्ययो नोत्पद्यते । **तद्यथा-** न खलु कर्माण्येव कार्मणम्, कार्मणस्य हि ज्ञानावरणाऽऽदिकर्माऽऽश्रयत्वात् चक्षुरिन्द्रियाऽऽदिवत् । **इदमुक्तं भवति -** यथा चक्षुरिन्द्रियाऽऽदीनामाश्रयभूतं शरीरमन्यद्,

★ **धवलाकारै**रप्युक्तम्– *"आहरदि अणेण मुणी, सुहमे अट्ठे सयस्स संदेहे । गत्ता केवलिपासं, तम्हा आहारको जोगो ॥१६४॥"* (ख. १, प्र. १, सू. ५६ / पु. १, पत्र. २९४) इति ।

अन्यानि च चक्षुरिन्द्रियाऽऽदीनि, तथा कार्मणशरीरं कर्मभ्योऽन्यत् । **किञ्च** ज्ञानाऽऽवरणाऽऽदिकर्माऽऽश्रयत्वेन व्यवस्थितं कार्मणशरीरं कथं ज्ञानावरणाऽऽदिकर्ममात्रमेव ? यदि पुनः कार्मणशरीरं बदराऽऽश्रयकुण्डकल्पं न स्याद्, तदा ज्ञानाऽऽवरणाऽऽदीनामितस्ततः पतनं भवेत् । **तच्च नाऽभीष्टम्** । ततो ज्ञानाऽऽवरणाऽऽदीनां यद् आश्रयभूतम्, तद् कार्मणशरीरं ज्ञानाऽऽवरणाऽऽदिकर्मतः पृथक् । उत्पत्तिकारणभेदादपि कार्मणस्य ज्ञानाऽऽवरणाऽऽदिकर्मतो भिन्नत्वम् । **तथाहि-** बन्धननामकर्मप्रत्ययं राग-द्वेषाऽऽदिनिमित्तं च कर्मोत्पद्यते, कर्मणशरीरं तु स्वनामकर्मोदयादुत्पद्यते, शरीराणां हि स्वनामकर्मोदयत उत्पत्तेः । तस्माद् ज्ञानाऽऽवरणाऽऽदिकर्मतः कार्मणशरीरं व्यतिरिक्तमिति स्थितम्, ततश्च **न घटते** स्वार्थिकप्रत्यय **इति वाच्यम्,** अनेकान्तिकत्वेन कथञ्चित्कार्मणस्य कर्मतोऽभिन्नत्वेनाऽप्युपपत्तिलाभात् ।

तथा कार्मणशरीरं (तदेकदेशभूतकार्मणशरीरनामकर्म) स्वस्याऽपि = ज्ञानाऽऽवरणाऽऽदिकर्मरूपस्य तदेकदेशकार्मणशरीरनामकर्माऽऽत्मकस्य च कारणमस्ति, कार्मणशरीरनामकर्मोदयतः कामर्णवर्गणापुद्गलाऽऽदानेन कार्मणशरीरनिर्वृतेः स्वपरप्रकाशादित्य इव । **अयम्भावः**:- यथा मार्तण्डः स्वमण्डलं प्रकाशयति, उपलब्धिहेतुत्वेन चाऽन्यद्रव्याणि घटपटाऽऽदीनि प्रकाशयति, **न चा**ऽन्यपदार्थो भास्करमण्डलस्य प्रकाशक **इति वाच्यम्**, अनवस्थाप्रसक्तेः, **न च** घटपटाऽऽदीनामप्रकाशाऽऽत्मकत्वाद् भास्वान् प्रकाशयतु तान् सवितृमण्डलं तु प्रकाशाऽऽत्मकमेव, तस्य किं प्रकाश्यते तत्स्वभावत्वादित्**याशङ्कनीयम्,** यतो यद्यपि प्रकाशस्वभावं मार्तण्डमण्डलम्, तथाऽपि तत्प्रकाश्यमपि भवति, प्रमाणवत् । प्रमाणं हि स्व-पररूपप्रकाशकारीष्यते, अन्यथाऽनेकदोषप्रसङ्गात् । तथैव कार्मणशरीरं स्वस्य अन्येषाञ्चौदारिकशरीराऽऽदीनां कारणं भवति, न पुनर्ज्ञानाऽऽवरणाऽऽदिकर्मतः सर्वथा व्यतिरिक्तं कार्मणस्य कारणमस्ति, कर्मरूपत्वात्कार्मणस्य **अथवा** कर्मसु भवम्, कर्मसु जातं वा, कर्मणां समूहो वा, कर्मणां विकारो वा कार्मणम्, कर्मपरमाणूनामेवाऽऽत्मप्रदेशैः सह क्षीरनीरवदन्योन्याऽनुगतानां सतां कार्मणशरीरत्वात् ।

**उक्तञ्च प्रज्ञापनोपाङ्गे हरिभद्रसूरिपादरचितवृत्तौ -** (प. १२/भा.२, पत्र. ८६)

"कम्मविगारो कम्मण-मट्ठविहविचित्तकम्मनिप्फण्णं । सव्वेसि सरीराणं, कारणभूयं मुणेयव्वं ॥ ॥" इति ।

इह साक्षित्वेन संगृहीताया अस्या गाथाया उत्तराऽर्धस्याऽयं भावार्थः- सर्वेषाम् = औदारिकाऽऽदीनां शरीराणां कारणभूतं=बीजभूतं कार्मणशरीरम् । यतो न खल्वामूलमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावसम्भवः ।

कार्मणशरीरं जन्तोर्गत्यन्तरसङ्क्रान्तौ साधकतमं करणं भवति । **तथाहि-** कार्मणेनैव वपुषा परिकरितो जन्तुर्मरणदेशमपहायोत्पत्तिदेशमभिसर्पति । **उक्तञ्च वृहत्कर्मविपाकवृत्तौ परमानन्दसूरिभिः**:- "कर्मणो विकारः कार्मणम् । कर्मपरमाणव आत्मप्रदेशैः सह क्षीरनीरवदन्योन्याऽनुगताः सन्तः कार्मणशरीरम् । इदञ्च जन्तोर्गत्यन्तरसंक्रान्तौ साधकतमं करणम् ।" (गा. ८८ / पत्र. ५०) इति । **ननु** यदि कार्मणवपुःपरिकरितो गत्यन्तरं संक्रामति तर्हि स गच्छन्नागच्छन् वा चक्षुरादिना कथं नोपलक्ष्यते ? **इति चेत्, उच्यते**-कर्मपुद्गलानामतिसूक्ष्मत्वेन चक्षुरादीन्द्रियाऽगोचरत्वात् ।

**तथा चाऽत्र प्रज्ञाकरगुप्तोऽप्याह—** (नव्यकर्मविपाकगाथा ३२ वृत्ति./पत्र. ५३)

"अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलक्ष्यते । निष्कामन् प्रविशन् वाऽपि, नाऽभावोऽनीक्षणादपि ॥ ॥" इति ।

कार्मणशरीरनिदानं नाम कार्मणशरीरनाम । यदुदयवशात् कार्मणशरीरप्रायोग्यान् पुद्गलान् गृह्णाति तत् कार्मणशरीरनामेत्यर्थः ।

**नन्वौ**दारिकादिशरीरनामकर्मणामनेन क्रमेणोपन्यासे किञ्चित्प्रयोजनमस्ति नवे**ति चेत्** ? अस्तीति ब्रूमः । क **इति चेत्, उच्यते** - उत्तरोत्तरशरीरस्य सूक्ष्मत्वात् शरीराणि यथोक्तक्रमेण उपन्यस्यन्ते, तेन तद्धेतुककर्माण्यप्यौदारिकाऽऽदिशरीरनामानि तेन क्रमेणोपादीयन्ते ॥१५॥

एतर्ह्यङ्गोपाङ्ग-बन्धन-संघातननाम्नामुत्तरभेदान् व्याजिहीर्षुराह गाथाद्वयम् –

**पढमतितणूणुवंगा , होज्जा उरलाऽऽइगाण सजुआणं ।**
**पणबंधणाणि हुन्ते , कम्मणजुत्ताण चत्तारो ॥१६॥**
**तिण्णि य तेअजुआणं , तेअस-कम्मणजुआण तिण्णि त्ति ।**
**पण्णरहबंधणाइं , तणुव्व संघायणाणि पण ॥१७॥**

(प्रे०) ''**पढम०**'' इत्यादि, ''प्रथमत्रितनूनाम्' प्रथमाः = आदिमा यास्तिस्र औदारिक-वैक्रिया-ऽऽहारकरूपाः तनवः = शरीराणि,तासाम् प्रथमत्रितनूनाम् ''**उवंग०**'' त्ति ''लिङ्गमतन्त्रम्'' (सिद्धहेम०- ८-४-४४५) इत्यनेन वचनेन प्राकृतत्वात्पुंलिङ्गनिर्देशः, 'उपाङ्गानि' इति पदैकदेशे पदसमुदायोपचाराद् अङ्गोपाङ्गानि भवन्ति । औदारिकाऽऽदिशरीरनामत्रयवत्तन्नामान्यङ्गोपाङ्गान्यपि त्रीणि भवन्ति ।

**तद्यथा** - औदारिकाङ्गोपाङ्गनाम वैक्रियाङ्गोपाङ्गनामाऽऽहारकाङ्गोपाङ्गनाम चेति त्रिविधमङ्गोपाङ्गनाम । तत्र यदुदयवशादौदारिकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपजायते , तदौदारिकाऽङ्गोपाङ्गनाम । यदुदयाद् वैक्रियशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपजायते , तद् वैक्रियाऽङ्गोपाङ्गनाम । यदुदयादाहारकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपपद्यते , तदाहारकाऽङ्गोपाङ्गनाम । तैजसकार्मणशरीरयोस्तु जीवप्रदेशसंस्थानाऽनुरोधित्वान्नाङ्गोपाङ्गसम्भव इति न तन्निबन्धनमङ्गोपाङ्गनामाऽपि संभवति ।

**इदं पुनरिहाऽवधेयम्** - यत्र कुत्रचिदपि यदा कर्मप्रकृतिषु औदारिकद्विकमुच्यते तदा तत्रौदारिकशरीरौदारिकाङ्गोपाङ्गरूपं ग्राह्यम्, एवं वैक्रियद्विकमाहारकद्विकञ्चाऽप्यवसेयम् । यत्र पुनस्तैजसद्विकमुच्यते तत्र तु तैजसकार्मणशरीरद्वयमेवाऽऽदेयम् । तयोरङ्गोपाङ्गाऽभावे सति सदैव संसारिजीवानां युगपद्भावात्, शरीरक्रमेण शरीरनामक्रमेण च क्रमाच्चतुर्थ-पञ्चमपदव्यवस्थितत्वेन यथोक्तद्विकेन तयोरेव त्रसद्विकाऽऽदिवल्लाभाच्च ।

इदञ्चे**ह ग्रन्थे** नोपयोगि, किन्तु यत्र बन्धोदयादिषु नाम्नः सप्तषष्ट्युत्तरप्रकृतीरधिकृत्य प्ररूपणा क्रियते तत्रेदमुपयोगि । अत्र पुनरौदारिकसप्तक-वैक्रियसप्तका-ऽऽहारकसप्तक-तैजससप्तकान्युपयोगीनि, तानि च बन्धननामकर्मोत्तरभेदव्याख्याऽवसरे दर्शयिष्यन्ते । तथा यद्यौदारिकद्विकेन प्रकृती न गृह्येते किन्तु मार्गणे तदौदारिककाययोगौ-दारिकमिश्र काययोगलक्षणमौदारिकद्विकं ज्ञेयम् । तथैवाऽग्रे मार्गणाग्रन्थे वक्ष्यते ।

एवं वैक्रियद्विका-ऽऽहारकद्विकयोरपि बोध्यम् ।

सम्प्रति बन्धननाम्न उत्तरभेदानां प्रस्तावः तत्र मतद्वयं प्रवर्तते, तत्रैकस्मिन् मते बन्धननाम्न उत्तरभेदाः पञ्चदश सन्ति, अन्यमते पुनः पञ्च । तत्र श्रीमद्**गर्गर्षि-श्रीबन्धशतकचूर्णिकार** श्रीमन्**मलयगिरि**पादाऽऽदिभिरुभयमतं दर्शितम् । **यदुक्तं गर्गर्षिभिर्बृहत्कर्मविपाके** - "बंधणभेया पंच उ,स............" इत्येकाशीतितमगाथायां तत्रैव द्व्यशीतितम-पञ्चोत्तरशततमगाथयोर्मध्ये पुनः क्रमेण "......बंधणभेया उ पन्नरस ॥८२॥" **तथा** ".....बंधणनामं ▲ पि पनरसमं ॥१०५॥ इति । **तथा श्रीबन्धशतकचूर्णावपि** - "गहियघेप्पमाणाणं पोग्गलाणं अन्नसरीरपोग्गलेहिं वा समं बन्धो जस्स कम्मस्स उदएणं भवइ तं बन्धणणामं । सो पञ्चविहो। तंजहा-.....। अहवा बन्धणणामं पन्नरसविहं, तंजहा-..... ।" (गा. ३९/ पत्र.५५-५६) इति ।

**एवमन्यत्र नव्यकर्मविपाकाऽऽदिग्रन्थेष्व**पि । कुत्रचि**त्तत्त्वार्थभाष्याऽऽदिग्रन्थेषु** पञ्चैव, कुत्रचित्पुनः पञ्चदशैव वा बन्धननामानीत्यन्यतरदेकमतं दर्शितम् । इह पुनस्तावत्पञ्चदश बन्धननामानि व्याचिख्यासुः पादोनेनाऽवशिष्टगाथाद्विकेन प्राह - **"उरलाऽऽइगाण"** इत्यादि, प्रागेव बन्धनशब्दो व्यावर्णित औदारिकमादि येषाम्, तानि औदारिकाऽऽदीनि, तेषाम् औदारिकाऽऽदीनाम् औदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणलक्षणानां प्रत्येकं 'स्वयुतानां' स्वेन युतानाम्, औदारिकेन युतम् औदारिकम्, वैक्रियेण युतं वैक्रियम्, आहारकेण युतम् आहारकम्, तैजसेन युतं तैजसम्, कार्मणेन युतं कार्मणमित्येतेषाम् 'पञ्च' पञ्चसङ्ख्याकानि बन्धनानि भवन्ति । **तद्यथा** - औदारिकौदारिकबन्धनं (१), वैक्रियवैक्रियबन्धनम् (२), आहारकाऽऽहारकबन्धनं (३), तैजसतैजसबन्धनं (४), कार्मणकार्मणबन्धनं (५) चेति पञ्च बन्धनानि, तथा 'कार्मणयुक्तानां चत्वारि' कार्मणेन युक्तानाम् औदारिकाऽऽदीनां चत्वारि बन्धनानि, **तथाहि** - औदारिककार्मणबन्धनं (१), वैक्रियकार्मणबन्धनम् (२), आहारककार्मणबन्धनं (३), तैजसकार्मणबन्धनं (४) चेति चत्वारि बन्धनानि, 'त्रीणि च तैजसयुतानाम्', औदारिकाऽऽदीनां त्रयाणां तैजसेन युतानां त्रीणि बन्धनानि भवन्ति । **तद्यथा** – औदारिकतैजसबन्धनं (१), वैक्रियतैजसबन्धनम् (२), आहारकतैजसबन्धनं (३) चेति 'तैजसकार्मणयुतानां त्रीणि' औदारिकाऽऽदीनां त्रयाणां तैजसकार्मणाभ्यां युतानां त्रीणि बन्धनानि भवन्ति, **तथाहि** - औदारिकतैजसकार्मणबन्धनं (१), वैक्रियतैजसकार्मणबन्धनम् (२), आहारकतैजसकार्मणबन्धनं (३) चेति 'इति' एवं दर्शितनीत्या सर्वसङ्ख्यया मिलितानि 'पञ्चदश बन्धनानि' पञ्चदश बन्धननामानि भवन्ति ।

**ननु** पञ्चानां शरीराणां द्विकाऽऽदिसंयोगप्रकारेण संयोगिका भङ्गाः षड्विंशतिर्भवन्ति, ततस्तावन्ति बन्धनानि कस्मान्नोक्तानी**ति, चेत्, उच्यते,** औदारिक-वैक्रिया-ऽऽहारकाणां परस्परविरुद्धाऽन्योन्यसम्बन्धाऽभावात्पञ्चदशैव भवन्ति, नाऽधिकानि ।

तत्र यदुदयात् पूर्वगृहीतैरौदारिकशरीरपुद्गलैः सह गृह्यमाणौदारिकपुद्गलानां बन्धः क्रियते तद् औदारिकौदारिकबन्धननाम (१), यदुदयाद् औदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च पूर्वगृहीतैर्गृह्यमाणैश्च तैजसशरीरपुद्गलैः सह सम्बन्धो विधीयते, तद् औदारिकतैजसनाम (२), यदुदयाद् औदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च पूर्वगहीतैर्गृह्यमाणैश्च कार्मणशरीरपुद्गलैः सह सम्बन्धः क्रियते, तद् औदारिककार्मणबन्धननाम (३), यदुदयात् पूर्वगृहीतानां गृह्यमाणानाञ्चौदारिकपुद्गलानां तैजसशरीरपुद्गलानां कार्मणशरीरपुद्गलानां च परस्परसम्बन्धो भवति, तद् औदारिकतैजसकार्मणबन्धननाम (४) चेति चत्वारि औदारिकौदारिकाऽऽदिबन्धननामाऽऽदि । एवं चत्वारि वैक्रियवैक्रियाऽऽदिबन्धननामानि वक्तव्यानि; एवमेव चत्वारि आहारकाऽऽहारकाऽऽदिबन्धननामान्यपि वाच्यानि ।

▲ 'तु पन्नरस" इत्यपि **पाठः** ।

एतानि च द्वादश । तथा यदुदयात् पूर्वगृहीतानां गृह्यमाणानाञ्च तैजसपुद्गलानां परस्परसम्बन्धो जायते, तद् तैजसतैजसबन्धननाम (१), यदुदयाद् पूर्वगृहीतानां गृह्यमाणानाञ्च तैजसपुद्गलानां पूर्वगृहीतैर्गृह्यमाणैश्च कार्मणपुद्गलैः सह सम्बन्धो निष्पद्यते, तद् तैजसकार्मणबन्धननाम (२), यदुदयात् कार्मणपुद्गलानां पूर्वगृहीतानां गृह्यमाणानामन्योन्यसम्बन्ध उपपद्यते, तत् कार्मणकार्मणबन्धननाम (३) चेति तैजसतैजसाऽऽदिबन्धननामानि त्रीणि । चैवं सर्वसङ्ख्यया बन्धननामानि पञ्चदश ।

तत्रौदारिकबन्धनचतुष्केणौदारिकौदारिकाऽऽदिबन्धननामानि चत्वारि गृह्यन्ते । एवं वैक्रियबन्धनचतुष्काऽऽहारकबन्धनचतुष्काभ्यामपि बोध्यम् । तैजसबन्धनत्रिकेण च तैजसतैजसप्रभृतिबन्धननामानि त्रीणि आदीयन्ते ।

**यद्वा** तैजसबन्धनद्वयं हि तैजसतैजसबन्धन-तैजसकार्मणबन्धनरूपं भवति ।

**इदन्त्विहाऽवधार्यम्** - औदारिकबन्धनचतुष्कञ्चोक्तेनौदारिकद्विकेन = औदारिकशरीरौदारिकाङ्गोपाङ्गरूपेण वक्ष्यमाणेन औदारिकसंघातनाम्ना च सहौदारिकसप्तकं भवति । एवं वैक्रियसप्तकमाहारकसप्तकञ्च । तैजससप्तकं पुनस्तैजसबन्धनत्रिक-तैजस-कार्मणशरीरद्विक-तैजस-कार्मणसंघातनद्वयलक्षणमवसेयम् । **यदा** तु बन्धनानि पञ्चैवाऽधिक्रियन्ते तदौदारिकाऽऽदिबन्धनमेकैकत्वेनौदारिकाऽऽदित्रये त्रयाणां त्रयाणां बन्धनानां हीयमानत्वादौदारिकाऽऽदिचतुष्कमित्यादि भवति । **तथाहि**-शरीराऽङ्गोपाङ्गबन्धनसंघातनभेदादौदारिकचतुष्कम् = औदारिकशरीरौ-दारिकाङ्गोपाङ्गौ-दारिकबन्धनौ-दारिकसंघातनरूपं भवति । एवं वैक्रियचतुष्कम्, आहारकचतुष्कम् । तैजसशरीर-तैजसबन्धन-तैजससंघातनाऽऽत्मकं तैजसत्रिकम्, एवं कार्मणत्रिकम् । **यद्वो**भयत्रिकलक्षणं तैजसषट्कम् ।

बन्धननामकर्मणः पञ्चविधत्वमङ्गीकुर्वतामभिप्रायेण पुनः पञ्चबन्धननामानीत्थं भवन्ति– (१) यदुदयाद् औदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानाञ्च परस्परं सम्बन्धः, तद् औदारिकौदारिकबन्धननाम, एवं वैक्रियवैक्रियाऽऽदीनि चत्वारि बन्धननामान्यपि बोध्यानि । **यदुक्तं श्रीपञ्चसंग्रहमूलटीकायाम्** – (द्वा.३, गा. ९/ भा. १,पत्र. ११८-१)

''औदारिकौदारिकबन्धनं वैक्रियवैक्रियबन्धनम् आहारकाऽऽहारकबन्धनं तैजसतैजसबन्धनं कार्मणकार्मणबन्धनम् औदारिकशरीरपुद्गलानाम् औदारिकैः पुद्गलैः सह संश्लेषः पाषाणयोर्वज्रलेपेनेवेति पञ्चधा बन्धनम् ।'' इति ।

एतानि च पञ्चदशबन्धननाममध्ये यथाव्याख्यातानि सर्वथा तथैव सन्ति । नाम्नाऽपि तथैव सन्ति । एवमेव केवलं नाम्ना औदारिकबन्धननाम वैक्रियबन्धननामाऽऽहारकबन्धननाम तैजसबन्धननाम कार्मणबन्धननामेत्येवंरूपाणि पञ्च बन्धनानि **नव्यकर्मविपाकवृत्त्यादिषु** भणितानि ।

**तथा चोक्तं नव्यकर्मविपाकवृत्तौ** - (गा. ३४/ पत्र. ४६-४७/५४)

''इह पूर्वगृहीतैरौदारिकपुद्गलैः सह परस्परं गृह्यमाणान् औरारिकाऽऽदिपुद्गलान् उदितेन येन कर्मणा बध्नाति = आत्माऽन्योऽन्यसंयुक्तान् करोति तद् औदारिकशरीरबन्धननाम दारुपाषाणाऽऽदीनां जतुरालाप्रभृतिश्लेषद्रव्यतुल्यम् १, पूर्वगृहीतैर्वैक्रियपुद्गलैः सह परस्परं गृह्यमाणान् वैक्रियपुद्गलान् उदितेन येन कर्मणा बध्नाति = आत्माऽन्योन्यसंयुक्तान् करोति, तद् जतुसमं वैक्रियशरीरबन्धननाम २। पूर्वगृहीतैराहारकशरीरपुद्गलैः सह परस्परं गृह्यमाणान् आहारकपुद्गलान् उदितेन येन कर्मणा बध्नाति = आत्माऽन्योन्यसंयुक्तान् करोति, तद् जतुसममाहारकशरीरबन्धननाम ३ । पूर्वगृहीतैस्तैजसपुद्गलैः सह परस्परं गृह्यमाणांस्तैजसपुद्गलान् उदितेन येन कर्मणा बध्नाति = आत्माऽन्योन्यसंयुक्तान् करोति, तद् जतुसमं तैजसशरीरबन्धननाम ४ । पूर्वगृहीतैः कार्मणपुद्गलैः सह परस्परं गृह्यमाणान् कार्मणपुद्गलान् उदितेन येन कर्मणा बध्नाति = आत्माऽन्योन्यसंयुक्तान् करोति, तद् जतुसमं कार्मणशरीरबन्धननाम ५ । यदि पुनरिदं शरीरपञ्चकपुद्गलानामौदारिकशरीरनाम्नः सामर्थ्याद् गृहीतानामन्योऽन्यसम्बन्धकारि बन्धनपञ्चकं न स्यात्, ततस्तेषां शरीरपरिणतौ सत्यामप्यसम्बन्धत्वात्पवनाऽऽहतकुण्डस्थितास्तीमितसक्तूनामिवैकत्र स्थैर्यं न स्यादिति ।'' इति ।

एतेषामभिप्रायेण हि स्वभिन्नतैजसाऽऽदिपुद्गलैः सह सन्नपि बन्धो नो विवक्षितः, तैरनधिकृतत्वात् । **यद्वा** यथा लोके स्वजातौ संयोगा भवन्ति त एव शुभाः, तथेहाऽपीत्यतस्तत्प्राधान्यख्यापनाऽर्थं पञ्चैव बन्धनानि भणितानि ।

**श्रीमन्मलयगिरिसूरिपादास्तु सप्ततिकावृत्तावेवं प्राहुः -** (गा.५/पत्र. १५१ / १७४)

''यदुदयाद् औदारिकपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च परस्परं तैजसाऽऽदिशरीरपुद्गलैश्च सह सम्बन्धः, तद् औदारिकबन्धनम् १ । एवं वैक्रियबन्धनम् २, आहारकबन्धनं ३ च भावनीयम् । यदुदयात् पुनस्तैजसपुद्गलानां पूर्वगृहीतानां गृह्यमाणानाञ्च परस्परं कार्मणपुद्गलैश्च सह सम्बन्धस्तत् तैजसबन्धनम् ४ । यदुदयात् कर्मपुद्गलानां पूर्वगृहीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत् कार्मणबन्धनम् ५ ।'' इति ।

अनया व्याख्यया तु यथोक्तपञ्चदशानां बन्धनानां पञ्चसु बन्धनेषु समावेशो जातः । **तद्यथा-** औदारिकबन्धननाम्नि औदारिकबन्धनचतुष्कस्य, वैक्रियबन्धननाम्नि वैक्रियबन्धनचतुष्कस्य, आहारकबन्धननाम्नि आहारकबन्धनचतुष्कस्य, तैजसकार्मणबन्धननामद्वये च तैजसबन्धनत्रिकस्य, **यद्वा** तैजसबन्धननाम्नि तैजसबन्धनद्वयस्य तैजसतैजसबन्धननाम-तैजसकार्मणबन्धननामरूपस्येति । **उक्तञ्च श्रीबृहत्कर्मविपाकवृत्तौ श्रीमत्परमानन्दसूरिभिरपि –**

''एवं चत्वार्यौदारिकबन्धनानि, चत्वारि वैक्रियबन्धनानि चत्वार्याहारकबन्धनानि, इत्येतानि द्वादश, तैजसतैजस-तैजसकार्मण-कार्मणकार्मणबन्धनत्रयसमन्वितानि पञ्चदशेति । **ननु** यत्र बन्धनपञ्चकमेवोपादीयते तत्र **कथ**मेतावतां ग्रहः?, **उच्यते**-तदेवमवगन्तव्यम् - गृहीतगृह्यमाणानामौदारिकपुद्गलानां तैजसकार्मणपुद्गलैश्च सह सम्बन्धकारि औदारिकबन्धनम् । एवं वैक्रियपुद्गलानां बद्धबध्यमानानां तैजसकार्मणपुद्गलैश्च सह सम्बन्धकारि वैक्रियबन्धनम् । एवमाहारकपुद्गलानां बद्धबध्यमानानां तैजसकार्मणपुद्गलैश्च सह सम्बन्धाऽऽधायकमाहारकबन्धनम् । एवं त्रिभिर्द्वादश संगृहीतानि । तथा तैजसपुद्गलानां बद्धबध्यमानानां कार्मणपुद्गलैश्च सह सम्बन्धहेतुस्तैजसबन्धनम् एवमनेन चतुर्थेन द्वयसंग्रहः । **यदुक्तं शतकबृहच्चूर्णौ बन्धनपञ्चकभणनप्रस्तावे-** *''गहियधिप्पमाणाणं पुग्गलाणं अन्नशरीरपुग्गलेहिं वा समं बंधो जस्स उदएणं भवइ, तं बंधननाम' इति । पञ्चमं तु कार्मणबन्धनमिति बन्धनपञ्चकपक्षेऽपि पञ्चदशसंग्रहः ।''* (गा. १०५/पत्र. ५७) इति ।

एतेषामभिप्रायेण पञ्चदशानां पञ्चसु समावेशः कृतः ।

अथ संघातननाम्न उत्तरप्रकृतीरभिधातुकामः शेषगाथापादं प्राह - **''तणुव्व''** इत्यादि, 'तनुवत्' शरीरवत् = शरीरनामव्यपदेश्यानि = औदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणाऽभिधानानि 'पञ्च' पञ्चसङ्ख्याकानि संघातनानि भवन्ति । **तथाहि -** औदारिकसंघातननाम वैक्रियसंघातननामाऽऽहारकसंघातननाम तैजससंघातननाम कार्मणसंघातननाम चेति पञ्चविधं संघातननाम । यदुदयादौदारिकशरीररचनाविशेषो जायते तद् औदारिकसंघातननाम । एवं वैक्रियाऽऽदीनि संघातननामान्यपि भावनीयानि ।

**ननु** बन्धननामवत्संघातननामान्यपि पञ्चदश कथं ? नोक्तानि सङ्घातितानामेव बन्धनभावात्, यथा पाषाणयुग्मस्य कृतसंघातस्यैवोत्तरकालं वज्रलेपरालाऽऽदिना बन्धनं क्रियत **इति चेत्, उच्यते-नाऽत्र** संघातननामकर्म पुद्गलसंहतिमात्रनिमित्तं भवति, पुद्गलसंहतिमात्रनिमित्तस्य शरीरनामकर्मनिमित्तकग्रहणमात्रेणैव सिद्धत्वात् । किन्तु शरीररचनाविशेषनिमित्तं संघातननामकर्म । तेन शरीरनामकर्मणः पञ्चविधत्वात्संघातननामकर्मणः पञ्चविधम् ।

**नव्यकर्मविपाकवृत्तिकारादय**स्त्वेवं समाधनं विदधु : - लोके ये स्वजातौ संयोगा भवन्ति त एव शुभाः, एवमिहाऽपि स्वशरीरपुद्गलानां स्वशरीरपुद्गलैः सह ये संयोगरूपाः सङ्घातास्ते शुभा इति प्राधान्यख्यापनाय पञ्चैव सङ्घाता अभिहिता इति ।

**अन्यैः पुनराचार्यपादैस्तु** बन्धननामानि पञ्चैव मन्यमानैः संघातननामान्यपि पञ्चोक्तानि ॥१६-१७॥

साम्प्रतं क्रमायातस्य संहनननाम्न उत्तरभेदानभिधित्सुराहैकगाथाम् –

**संघयणं छद्धा वज्जरिसहणाराय-रिसहणारायं ।**
**णाराय-ऽद्धणरायं , कीलिय-छेवट्ठगाणि त्ति ॥१८॥**

(प्रे०) "**संघयणं**" इत्यादि, 'संहननं' संहनननाम षोढा (षड्ढा) = षट्प्रकारं भवति । के ते षट्प्रकाराः? इत्यतः प्राह "**वज्ज०**" इत्यादि, 'वज्रर्षभनाराचर्षभनाराचम्' अत्र समाहारद्वन्द्वसमासनिर्देशात्संहनननाम्नः प्रस्तुतत्वाच्च, वज्रर्षभनाराचसंहनननाम ऋषभनाराचसंहनननाम च, "**णारायऽद्धणरायं**" ति, अत्र "वाऽव्ययोत्खातादावदातः" (सिद्धहेम०-८-१-६७) इत्यनेन प्राकृतसूत्रेण "**अद्धणरायं**" इत्यत्र प्राकृतशब्दे नाराचशब्दस्याऽऽद्यस्याऽऽकारस्याऽकारो जायते । 'नाराचाऽर्धनाराचं' नाराचसंहनननामाऽर्धनाराचसंहनननाम च 'कीलियछेवट्ठगाणि' इत्यत्र प्राकृत्वात्स्वार्थे कप्रत्ययः, कीलिकासंहनननाम सेवार्तसंहनननाम च, इतिशब्द इयत्तापरिच्छेदकः । तत्र वज्रं = कीलिका, ऋषभः = परिवेष्टनपट्टः, नाराचम् = उभयतो मर्कटबन्धः । **यदुक्तं प्राचीनकर्मविपाके –**

"रिसहो य होइ पट्टो, वज्जं पुण कीलिया मुणेयव्वा । उभओ मक्कडबंधो, नारायं तं वियाणाहि ॥१०९॥" इति ।

द्वयोरस्थ्नोरुभयतो मर्कटबन्धेन बद्धयोः पट्टाऽऽकृतिना तृतीयेनाऽस्थ्ना परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाऽऽख्यं= वज्रनामकमस्थि यत्र भवति तद् वज्रर्षभनाराचम्, तन्निबन्धनं नाम वज्रर्षभनाराचसंहनननाम । यथा हस्तयोरुभयतो मर्कटबन्धेन कलाचीग्रहणे मध्यदेशे लोहपट्टकेन वेष्टयित्वा पट्टबन्धनमध्यदेशे वेधं दत्त्वा कीलिका प्रक्षिप्यते, तस्यां प्रक्षिप्तायां यादृक् सञ्चयोऽचलः कालाऽन्तरथायी बलवान् भवति, तथा यत्संहननामोदयादस्थिसञ्चयोऽप्यचलो बलवान् कालाऽन्तरस्थायी भवति, तद् वज्रर्षभनाराचसंहनननाम (१) । **अन्ये तु केचन –** तादृक्सामर्थ्योपेतान्यस्थीनि, न पुनस्तादृग्रूपाण्येव, अन्यमतेन पुनरस्थ्नामेव कीलिकाऽऽदिमत्त्वम्' इति प्राहुः ।

**उक्तञ्च श्रीभगवतीसूत्रवृत्तौ –** "तत्र वज्रं च तत् कीलिकाकीलितकाष्ठसंपुटोपमसामर्थ्ययुक्तत्वात् ऋषभश्च = लोहाऽऽदिमयपट्टबद्धकाष्ठसंपुटोपमसामर्थ्याऽन्वितत्वाद् वज्रर्षभः स चाऽसौ नाराचं च = उभयतो मर्कटबन्धनिबद्धकाष्ठसंपुटोपमसामर्थ्योपेतत्वाद् वज्रर्षभनाराचम्, तत् संहननम् = अस्थिसञ्चयविशेषोऽनुपमसामर्थ्ययोगाद् यस्याऽसौ वज्रर्षभनाराचसंहननः । अन्ये तु कीलिकादिऽऽमत्त्वमस्थ्नामेव वर्णयन्ति ।" (श. १, उ. १, सू.७/अभय. भा. १, पत्र. १२-१) इति ।

यत्पुनः कीलिकारहितं संहननं भवति तद् ऋषभनाराचम्, तन्निबन्धनं नाम ऋषभनाराचसंहनननाम ।

**तथैव नव्य-प्राचीनकर्मविपाकाऽऽदिग्रन्थेषु** दर्शितम् । **यदुक्तं श्रीप्रज्ञापनासूत्रवृत्तौ -**

"एतन्निबन्धनं संहनननामाऽपि षोढा, **तद्यथा**-वज्रर्षभनाराचसंहनननाम ऋषभनाराचनाम" (प.२३, सू.२९३/भा.२ प्र. ४७२-२) इति ।

**श्रीबन्धशतकचूर्णिकारादयस्तु द्वितीयं संहननं कीलिकायुतं परिवेष्टनपट्टहीनं वज्रनाराचसंहनननाम पठन्ति ।**

**यदुक्तं श्रीबन्धशतकचूर्णौ-** "वज्जनाराय.......... । मर्कटकीलिकायुक्तं द्वितीयं ।" (गा. ३९/ पत्र. ५६) इति ।

**तथा सूक्ष्मार्थविचारसारप्रकरणेऽपि-** "छद्धा संघयणं वज्जरिसहनाराय-वज्जनारायं ।" (गा. १५) इति ।

**तथैव तत्त्वार्थभाष्यवृत्तावपि -** (अ.८. सू. १२ / भा. २, पत्र. १५४)

"**कर्मप्रकृति**ग्रन्थेषु वज्रनाराचनामैवं पट्टहीनं पठितम्,......... । अर्धग्रहणाद् वा ऋषभहीनं व्याख्येयम् " इति ।

**तत्त्वार्थभाष्यकृद्भिः** पुनर् 'अर्धवज्रर्षभनाराचसंज्ञकं द्वितीयं संहनननाम भण्यते । **उक्तञ्च श्रीतत्त्वार्थभाष्ये** - ''संहनननाम षड्विधम् । **तद्यथा**-वज्रर्षभनाराचनाम, अर्धवज्रर्षभनाराचनाम'' (अ. ८, सू. १२ / भा. २, पत्र. १५४) इति ।

**तेषाञ्चाऽयमभिप्रायः**-वज्राऽऽदित्रयस्याऽप्यर्धमर्धं यस्मिन् संहनने तद् अर्धवज्रर्षभनाराचसंहनननाम ।

**तथा चोक्तं श्रीतत्त्वार्थभाष्यवृत्तौ**— (अ. ८, सू. १२/ भा. २, पत्र. १५४)

''अर्धवज्रर्षभनाराचनाम तु वज्रर्षभनाराचानामर्धं किल सर्वेषां वज्रस्याऽर्धम् ऋषभस्याऽर्धं नाराचस्याऽर्धमिति भाष्यकारमतम् ।'' इति ।

यत्र पुनर्मर्कटबन्ध एव केवलो भवति, न पुनः कीलिका ऋषभाऽभिधः पट्टश्च तद् नाराचम्, तन्निबन्धनं संहनननाम नाराचसंहनननाम ।

यत्र त्वेकपार्श्वेन मर्कटबन्धो द्वितीयपार्श्वेन च कीलिका तद् अर्धनाराचम्, तन्निमित्तं नाम अर्धनाराचसंहनननाम । अत्र श्री**तत्त्वार्थभाष्यवृत्तौ** पुनः **कर्मप्रकृत्यभिप्रायेणा**ऽन्यथा दर्शितम् । **तथा च तद्ग्रन्थः**- (अ.८, सू.१२/ भा. २, पत्र.१५४)

''अर्धनाराचनाम्नि त्वेकापार्श्वे मर्कटबन्धः, द्वितीयपार्श्वे तु कीलिकैव मर्कटबन्धाः, अत्राऽपि **कर्मप्रकृतौ** नैवाऽस्ति ।'' इति ।

यत्र त्वस्थीनि कीलिकामात्रबद्धानि एव भवन्ति, तत् कीलिकासंहननम्, तन्निबन्धननाम कीलिकासंहनननाम ।

यत्र तु परस्परं पर्यन्तस्पर्शमात्रलक्षणां सेवामागतान्यस्थीनि भवन्ति, स्नेहाऽभ्यवहारतैलाऽभ्यङ्गविश्रामणाऽऽदिरूपां च परिशीलनां नित्यं प्रतीच्छन्ति, तत् सेवार्तम् । तन्निमित्तं संहनननाम सेवार्तसंहनननाम । **यद्वा ''छेवट्ठग०''** इत्यत्र प्राकृतत्वेन लुप्तस्य दकारस्य दर्शनात् 'छेदवृत्तक०' छेदानाम् = अस्थिपर्यन्तानां वृत्तं = परस्परसम्बन्धघटनालक्षणं वर्तनं यत्र तच्छेदवृत्तकं षष्ठं संहननं कीलिकापट्टमर्कटबन्धरहितमस्थिपर्यन्तमात्रसंस्पर्शि । यदुदयाच्छरीरे तद्भवति तत् सेवार्तसंहनननाम भवति । **उक्तञ्च नव्यकर्मविपाकस्वोपज्ञवृत्तौ** - (गा. ३८/ पत्र. ४९/५७)

''**यद्वा 'छेवट्ठं'** ति दकारस्य लुप्तस्येह दर्शनात् छेदानाम् = अस्थिपर्यन्तानां वृत्तं = परस्परसम्बन्धघटनालक्षणं वर्तनं वृत्तिर्यत्र तत् छेदवृत्तम्, कीलिकापट्टमर्कटबन्धरहितमस्थिपर्यन्तमात्रसंस्पर्शि षष्ठमित्यर्थः'' इति ।

**तत्त्वार्थभाष्यकारैस्तु** सृपाटिकानाम षष्ठं संहननमुच्यते । **तथाहि**- सृपाटिका = फलसंपटकम्, यथा फलानि परस्परस्पर्शमात्रवृत्त्या वर्तन्ते तथाऽस्थीनि कोटिद्वयसंस्पृशीनि चर्मस्नायुमांसाऽवबद्धानि यत्र संहनने तत् सृपाटिकासंहननमभिधीयते। तन्निबन्धनं नाम सृपाटिकासंहनननाम । **यदाह श्रीतत्त्वार्थभाष्यवृत्तौ** — (अ. ८, सू. १२ / भा. २, पत्र. १५४)

''सृपाटिकानाम कोटिद्वयसंगते ये अस्थिनी चर्मस्नायुमांसाऽवबद्धे तत्सृपाटिकानाम कीर्त्यते । सृपाटिका = फलसंपुटकम्, यथा तत्र फलकानि परस्परस्पर्शमात्रवृत्त्या वर्तन्ते एवमस्थीन्यत्र संहनने ।'' । इति ॥१८॥

अधुना षड्विधं संस्थाननाम पञ्चविधं वर्णनाम चैकगाथया व्याजिहीर्षुराह —

**समचउरंसं णिग्गोह-साइ-कुज्जाणि वामणं हुंडं।**
**संठाणा वण्णा किण्ह-नील-लोहिअ-हलिद्द-सिआ ॥१९॥**

(प्रे०) **''समचउरंसं''** इत्यादि, संस्थाननाम्नः प्रकृतत्वात्पदैकदेशे पदप्रयोगदर्शनाच्च 'समचतुरस्रम्' समचतुरस्रसंस्थाननाम १, 'न्यग्रोधसादिकुब्जानि' न्यग्रोधपरिमण्डलसंस्थाननाम २, सादिसंस्थाननाम ३, कुब्जसंस्थाननाम ४ च, 'वामनम्' वामनसंस्थाननाम ५, 'हुण्डम्' हुण्डसंस्थाननाम ६ चेति षट् **''संठाणा''** प्राकृतत्वात्पुंस्त्वम् 'संस्थानानि' संस्थाननामानि भवन्ति ।

तत्र समा: = शास्त्रोक्तलक्षणाऽविसंवादिन्यश्चतस्र: = चतु:सङ्ख्याका अस्रय: = पर्यङ्काऽऽसनोपविष्टस्य जानुनोरन्तरम्, आसनस्य ललाटोपरिभागस्य चाऽन्तरम्, दक्षिणस्कन्धस्य वामजानुनश्चाऽन्तरम्, वामस्कन्धस्य दक्षिणजानुनश्चाऽन्तरमिति चतुर्दिग्विभागोपलक्षिता: शरीराऽवयवा यत्र तत् समचतुरस्रम्, "सुप्रातसुश्वसुदिवशारिकुक्षचतुरस्रैणी-पदाऽजपदप्रोष्ठपदभद्रपदम्" (सिद्धहेम०- ७-३-१२९) इत्यनेन सूत्रेण समासान्तो डप्रत्यय:। समचतुरस्रं च तत्संथानं च समचतुरस्रसंस्थानम्, तुल्यारोहपरिणाह: सम्पूर्णलक्षणोपेताऽङ्गोपाङ्गाऽवयव: स्वाऽङ्गुलाऽष्टाऽधिकशतोच्छ्राय: सर्वसंस्थानप्रधान: पञ्चेन्द्रियजीवशरीराऽऽकारविशेष: समचतुरस्रसंस्थानम्। तन्निबन्धनं नाम समचतुरस्रसंस्थाननाम।

एवं **नव्यप्राचीनकर्मविपाक-सप्ततिकाऽऽदिग्रन्थेषु दर्शितम्**।

**यद्वा** समपादाऽङ्गुष्ठाऽग्रादारभ्य केशाऽन्तं यावत्स्थितमूर्द्ध्वं यत्प्रमाणसूत्रम्, तावन्मात्रमेव तिर्यक्प्रसारितयोर्भुजयो: प्रमाणसूत्रम्, एवंभूतं संस्थानं समचतुरस्रसंस्थानमुच्यते। तन्निबन्धनं नाम समचतुरस्रसंस्थाननाम।

एवञ्च **श्रीप्राचीनकर्मविपाकप्राचीनाऽऽचार्यप्रणीतवृत्तौ भणितम्।**

**बन्धशतकचूर्णिकारास्तु–** "मानोन्मानप्रमाणान्यन्यूनाऽतिरिक्तान्यङ्गोपाङ्गानि यस्मिच्छरीरसंस्थाने तत्संस्थानं समचतुरस्रम्, स्वाङ्गुलाऽष्टशतोच्छ्रायाऽङ्गोपाङ्गनिर्म्मितलेप्यकवत्।" (गा. ३९/ पत्र. ५६) इत्येवं पठन्ति।

**एवं तत्त्वार्थभाष्यवृत्तावपि। तथा च तद्ग्रन्थ:-** (अ. ८, सू. १२ / भा. २, पत्र.१५३)

"समं च तच्चतुरस्रं चेति समचतुरस्रम्। यतस्तत्र मानोन्मानप्रमाणमन्यूनमनधिकम् अङ्गोपाङ्गानि चाऽविकलानि उर्ध्वं तिर्यक्च तुल्यत्वात् समं चतुरस्रं चाऽविकलाऽवयवत्वात् स्वाङ्गुलाऽष्टशतोच्छ्रायाऽङ्गोपाङ्गयुक्तम् युक्तिनिर्मितलोप्यकवद् वा।" इति।

न्यग्रोधवत् परिमण्डलं यस्य तद् न्यग्रोधपरिमण्डलम्, यथा न्यग्रोध: = वटवृक्ष उपरि सम्पूर्णाऽवयवोऽधस्तु हीनस्तथा यत्संस्थानं नाभेरुपरि सम्पूर्णाऽवयवप्रमाणम् अधस्तु न तथा, तद् न्यग्रोधपरिमण्डलम्, तन्निबन्धनं नाम न्यग्रोधपरिमण्डलसंस्थाननाम्। **यद्वा** न्यग्रोधस्येव विस्तारो बहुर्दैर्ध्यं पुन: स्तोकं यस्मिन् संस्थाने तद् द्वितीयं न्यग्रोधपरिमण्डलसंस्थानम्, तन्निमित्तं नाम न्यग्रोधपरिमण्डलसंस्थाननाम।

**उक्तञ्च बृहत्कर्मविपाके–** "वित्थडबहुलं" (गा. ११२) इति।

**तथा चाऽस्य पूर्वाऽऽचार्यकृतवृत्ति:-** "विस्तारो बहुर्यस्मिन्, तद् विस्तरबहु प्राकृतत्वाद् बह्वर्थे लच्। यस्मिन् विस्तारो वटस्येव बहु दैर्ध्यं पुन: स्तोकं तद् विस्तरबहुलं न्यग्रोधमण्डलं संस्थानमुच्यते द्वितीयम्।" (पत्र. ६०) इति।

सह आदिना = नाभेरधस्तनभागरूपेण यथोक्तप्रमाणयुक्तेन वर्तत इति सादि, सर्वमपि हि शरीरं सादि, तत: सादित्वविशिष्टविशेषणाऽन्यथानुपपत्तेरादिरिह विशिष्टो गृह्यते, ततो यत्र नाभेरधो यथोक्तप्रमाणयुक्तमुपरि च हीनं तत् सादिसंस्थानम्। **यद्वा "साइ"** इति प्राकृतशब्दवशाद् 'साचि' इति वा 'साति' इति वाऽपि प्राप्यते, तत: सादीति वा साचीति वा शाल्मलीतरुमाचक्षते समयज्ञा:, तस्य स्कन्धो द्राघीयान् भवति, न तदनुरूपा उपरितना विशालता तथैव **यद्वा** साति: शक्तिरुच्यते, तद्वद्वाऽस्मिन् संस्थाने पुरुषस्य शिरोऽधो बाहुविस्तर: स्तोको भवति, तत् सादिसंस्थानं वा साचिसंस्थानं वा सातिसंस्थानं वेति। **उक्तञ्च श्रीतत्त्वार्थभाष्यवृत्तौ** - (अ. ८, सू. १२/भा. २, पत्र. १५४)

"सादीति शाल्मलीतरुमाचक्षते प्रवचनवेदिन:। तस्य हि स्कन्धो द्राघीयानुपरितना न तदनुरूपा विशालतेति।" इति।

**तथा प्राचीनबृहत्कर्मविपाकसत्कपरमानन्दसूरिकृतवृत्तावपि –** (गाथा ११२/ पत्र.६१)

"यत्र नाभेरध : सर्वाऽवयवा: समचतुरस्रलक्षणाऽविसंवादिन:, उपरि तु न तदनुरूपास्तत् [1]सादि उत्सेधबहु संस्थानम्, [2]सादीति शाल्मलीतरुमाचक्षते प्रावचनिका: तस्य हि स्कन्धो द्राघीयान् उपरि तु न तदनुरूपा विशालतेति ।" इति ।

**श्रीमदुपाध्याययशोविजयपादै: कर्मप्रकृतिवृत्तौ** - (गाथा १/पत्र. ६-२)

"अपरे तु साचीति पठन्ति तत्र साचीति समयविद: शाल्मलीतरुमाचक्षते तत: साचीव यत्संस्थानं तत्साचि, यथा शाल्मलीतरो: स्कन्धकाण्ड-मतिपुष्टमुपरि च न तदनुरूपा महाविशालता तद्वदस्याऽपि संस्थानस्याधोभाग: परिपूर्णो भवति उपरि भागस्तु न तथेति भाव: ।" इति ।

**श्रीबृहत्कर्मविपाक-पूर्वाऽऽचार्यरचितवृत्तौ च** — (गाथा ११२/पत्र. ६०)

"उत्सेधो बहुर्यस्मिन् तदुत्सेधबहु उच्चैस्त्वयुक्तं च सातिसंस्थानेनोपमीयते, साति: शक्तिरुच्यते, शक्तिवद् यस्मिन् पुरुषस्य शिरोऽधो बाहुविस्तरस्तोकस्तत्सातिसंस्थानं तृतीयम् " इति ।

यत्र पुन: शिरो ग्रीवं हस्तपादाऽऽदिकं च यथोक्तप्रमाणोपपन्नम् उरउदरादि च मडभं तत्कुब्जसंस्थानम्, तन्निबन्धनं नाम कुज्जसंस्थाननाम । एतल्लक्षणं वामनमित्य**न्ये ।**

यत्र पुनरुरउदराऽऽदि यथोक्तप्रमाणोपेतं हस्तपादाऽऽदिकं च हीनं तद् वामनसंस्थानम् । तन्निबन्धनं नाम वामनसंस्थाननाम । **अपरे** त्वेतत्स्वरूपं कुब्जमिति पठन्ति ।

यत्र सर्वेऽप्यवयवा: शास्त्रोक्तप्रमाणहीनास्तत् हुण्डसंस्थानम्, तत्कारणं नाम हुण्डकसंस्थाननाम ।

अथ वर्णनाम्न: पञ्चोत्तरभेदान् व्याचिख्यासुराह = "**वण्णा**" इत्यादि, 'कृष्ण-नील-लोहित-हारिद्र-सिता:' वर्णशब्दस्य विशेष्यवाचकत्वान्नाम्न: प्रस्तुतत्वाच्च कृष्णवर्णनाम नीलवर्णनाम लोहितवर्णनाम हारिद्रवर्णनाम सितवर्णनाम चेति पञ्चवर्णनामानि । तत्र यदुदयाज्जीवस्य शरीरं कृष्णं भवति राजपट्टाऽऽदिवत्, तत्कर्माऽपि कृष्णवर्णनाम[1] । यदुदयाज्जीवशरीरं मरकताऽऽदिवन्नीलं भवति, तन्नीलवर्णनाम[2] । यदुदयाज्जीवशरीरं लोहितं = रक्तं हिङ्गुलाऽऽदिवद् भवति, तद् लोहितवर्णनाम[3] । यदुदयाज्जीवशरीरं हारिद्रं = पीतं हरिद्रावद् भवति, तद् हारिद्रवर्णनाम[4] । यदुदयाज्जीवशरीरं सितं = श्वेतं शङ्खाऽऽदिवद् भवति, तत् सितवर्णनाम[5] । कपिशाऽऽदयस्त्वेतत्संयोगेनैवोत्पद्यन्ते, न पुन: सर्वथैतद्विलक्षणा इति हेतोस्ते पृथग् न वर्णनामत्वेन प्ररूपिता: ॥१९॥

एतर्हि गन्धनामाऽऽदीनामुत्तरभेदानाविश्चिकीर्षुराहैकगाथाम् —

**सुरहि-दुरही रसा पण ,तित्त-कडु-कसाय-अंबिला महुरो ।**
**फासा गुरु-लहु-मिउ-खर - सी-उण्ह-सिणिद्ध-रुक्खऽट्ठ ॥२०॥**

(प्रे०) "**सुरहि०**" इत्यादि 'सुरभिदुरभी' पिण्डप्रकृतिषु वर्णनाम्न: पश्चाद् गन्धनाम्न: प्रतिपादनेनेह प्रक्रमात्प्राग्वर्णितस्वरूपो गन्धशब्दो गम्यते प्रस्तुतत्वेन नामशब्दोऽपि तत: सुरभिगन्धनाम दुरभिगन्धनाम चेति द्विविधं गन्धनाम ।

तत्र सुष्ठु रमत इति सुरभि:, सुरभिश्चाऽसौ गन्धश्च सुरभिगन्ध:, सौमुख्यकृत् ।

यदुदयाज्जीवशरीरं कर्पूराऽऽदिवत् सुगन्धं भवति, तत् सुरभिगन्धनाम[1] । वैमुख्यकृद् दुरभिगन्ध:, यदुदयाज्जीवशरीरं लशुनाऽऽदिवद् दुरभिगन्धं भवति, तद्दुरभिगन्धनाम[2] ।

१-२ अत्र 'साचि' इत्यपि **पाठ:** ।

अत्राऽप्युभयसंयोगजाः पृथग्नोक्ताः, एतत्संसर्गजत्वादेव भेदाऽविवक्षणात् ।

अथ रसनाम्न उत्तरभेदान् प्रतिपादयति– **''रसा''** इत्यादि, रसाः पूर्वोक्तशब्दार्थाः 'पञ्च' पञ्चसङ्ख्याका भवन्ति के पुनस्ते ? इत्याह - **''तित्त०''** इत्यादि, 'तिक्तकटुकषायाऽम्लाः' एतेषां कृतेतरेतरद्वन्द्वानां प्रथमया निर्दिष्टत्वात् रसनाम्नः प्रकृतत्वाच्च तिक्तरसनाम कटुरसनाम कषायरसनामाऽम्लरसनाम च 'मधुरः' मधुररसनाम चेति पञ्चविधं रसनाम ।

तत्र तिक्तरसः श्लेष्माऽऽदिदोषहन्ता निम्बाद्याश्रितो भवति । **यदुक्तं भिषक्शास्त्रे -**

''श्लेष्माणमरुचिं पित्तं, तृषं कुष्ठं विषं ज्वरम् । हन्यात् तिक्तो रसो बुद्धेः, कर्ता मात्रोपसेवितः ॥ ॥'' इति ।

यदुदयाज्जीवशरीरं निम्बाऽऽदिवत्तिक्तं भवति, तत् तिक्तरसनाम[१] ।

कटुरसो गलाऽऽमयाऽऽदिप्रशमनो मरिचनागराऽऽद्याश्रितोऽस्ति । **यदुक्तम् –**

''कटुर्गलाऽऽमयं शोफं, हन्ति युक्त्योपसेवितः । दीपनः पाचको रुच्यो, बृंहणोऽतिकफावहः ॥ ॥'' इति ।

यदुदयाज्जीवशरीरं मरिचाऽऽदिवत् कटु भवति, तत् कटुरसनाम[२] ।

**अन्ये तु तिक्तकटुरसयोर्वैपरीत्यमाहुः ।**

कषायरसो रक्तदोषाऽऽद्यपहर्ता बिभीतका-ऽऽमलक-कपित्थाऽऽद्याश्रितः । **यदवाचि –**

''रक्तदोषं कफं पित्तं, कषायो हन्ति सेवितः । रूक्षः शीतो गुरुग्राही, रोषणश्च स्वरूपतः ॥ ॥'' इति ।

यदुदयाज्जीवशरीरं बिभीतकाऽऽदिवत्कषायं भवति, तत्कषायरसनाम[३] ।

अम्लरसोऽग्निदीप्तिकृत् अम्लीकाऽऽद्याश्रितः। **यदवादि –**

''अम्लोऽग्निदीप्तिकृत्स्निग्धः, शोफपित्तकफाऽपहः । क्लेदनः पाचनो रुच्यो, मूढ-वाताऽनुलोमकः ॥ ॥'' इति ।

यदुदयाज्जीवशरीरमम्लीकाऽऽदिवद् अम्लं भवति, तद् अम्लरसनाम[४]।

मधुररसः पित्ताऽऽदिप्रशमकः खण्डशर्कराऽऽद्याश्रितः । **यदभ्यधायि –**

''पित्तं वातं कफं हन्ति, धातुवृद्धिकरो गुरुः । जीवनः केशकृद् बाल- वृद्ध-क्षीणौजसां हितः ॥ ॥'' इति ।

यदुदयाज्जीवशरीरमिक्ष्वादिवद् मधुरं भवति, तद् मधुरनाम[५]।

अथ शेषगाथाऽर्द्धेन स्पर्शनाम्नोऽष्टोत्तरभेदान् प्राह- **''फासा''** इत्यादि, स्पर्शाः प्राग्व्याकृतशब्दाऽर्थाः 'अष्ट' अष्टसंख्याका भवन्ति । तानेव नामग्राहमाह – **''गुरु''** इत्यादि, 'गुरु-लघु-मृदु-खर-शीतो-ष्ण-स्निग्ध-रूक्षाः' एतेषां कृतेतरेतरद्वन्द्वानां निर्देशात् स्पर्शनाम्नः प्रकृतत्वाच्च । गुरुस्पर्शनाम लघुस्पर्शनाम मृदुस्पर्शनाम खरस्पर्शनाम शीतस्पर्शनामोष्णस्पर्शनाम स्निग्धस्पर्शनाम रूक्षस्पर्शनाम चेत्यष्टविधं स्पर्शनाम ।

तत्राऽधोगमनहेतुरयोगोलकाऽऽदिगतो गुरुः स्पर्शः । **यदुक्तम् -** ''अधोगतेर्गुरुः ।'' इति ।

यदुदयाज्जीवशरीरं वज्राऽऽदिवद् गुरु भवति, तद् गुरुस्पर्शनाम[१] ।

प्रायस्तिर्युगूर्ध्वगमनहेतुरर्कतूलाऽऽद्याश्रितो लघुः स्पर्शः, ''तिर्यगूर्द्धगतेर्लघुः'' इति **वचना**त् ।

यदुदयाज्जीवशरीरमर्कतूलाऽऽदिवत् लघु भवति, तद् लघुस्पर्शनाम[२] ।

सन्नतिकारणं तिनिसलताऽऽदिगतो मृदुः स्पर्शः । **यदाह** - ''सन्नतेर्मृदुः ।'' इति ।

यदुदयवशाज्जीवशरीरं मृणालाऽऽदिवद् मृदु भवति तद् मृदुस्पर्शनाम[३] ।

स्तब्धताऽऽदिकारणं दृषदादिगतः खरः कर्कशः स्पर्शः । **उक्तञ्च** - ''प्रायोऽनमनस्य हेतुः कठिनः ।'' इति ।

यदुदयाज्जीवशरीरं खरं = कर्कशं पाषाणाऽऽदिवद् भवति, तत् खरस्पर्शनाम[४] ।

देहस्तम्भाऽऽदिहेतुः प्रालेयाद्याश्रितः शीतः स्पर्शः, **यदाह** - ''काठिन्याऽऽपाकयोः शीतः ।'' इति ।

यदुदयाज्जीवशरीरं शीतं = शीतलं मृणालाऽऽदिवत् भवति, तत् शीतस्पर्शनाम ।[५]

आहारपाकाऽऽदिकारणं ज्वलनाऽऽद्यनुगत उष्णः स्पर्शः । **यदुक्तम्** - ''मार्दवपाकयोरुष्णः'' इति ।

**अन्ये केचन प्राहुः**-''यतो वस्तूनां मार्दवविक्लित्ती भवतः स स्पर्श उष्णः ।''(**प्राचीनकर्मविपाक**१९७ गा. **परमा.** वृ. पत्र. ६३) इति ।

यदुदयाज्जीवशरीरं ज्वलनाऽऽदिवद् उष्णं भवति, तद् उष्णस्पर्शनाम[६] ।

पुद्गलद्रव्याणां मिथः संयुज्यमानानां बन्धनिबन्धनं तैलाऽऽदिस्थितः स्निग्धः ।

यदुदयाद् जीवशरीरं घृताऽऽदिवद् स्निग्धं भवति, तत् स्निग्धस्पर्शनाम[७] ।

पुद्गलद्रव्याणां मिथोऽसंयुज्यमानानामबन्धनिबन्धनं भष्माऽऽद्याधारो रूक्षः ।

यदुदयाज्जीवशरीरं भृत्याऽऽदिवद् रूक्षं भवति, तद् रूक्षस्पर्शनाम[८] ।

**यदुक्तम्** - ''चिक्कणत्वाऽचिक्कणत्वे स्निग्धरूक्षौ ।'' इति ॥२०॥

अधुनाऽऽनुपूर्वीविहायोगतिनाम्नोर्गोत्रस्य चोत्तरभेदानभिधातुमना ग्रन्थकृदाहैकगाथाम्-

**णिरय-तिरिक्ख-मणुस-सुर-अणुपुव्वी होज्ज सुह-असुहखगई ।**
**छट्ठं तिजुअसयविहं, णीऽ-उच्चं सत्तमं दुविहं ॥२१॥**

(प्रे०) ''**णिरय०**'' इत्यादि, निरय-तिर्यङ्मनुष्य-सुराऽऽनुपूर्वी ''द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते'' इति **वचना**द् आनुपूर्वीशब्दः प्रत्येकमभियुज्यते तथा प्रकृतत्वान्नामशब्दोऽपि ततश्चा**ऽयमर्थः**- निरयाऽऽनुपूर्वीनाम तिर्यगानुपूर्वीनाम मनुष्याऽऽनुपूर्वीनाम सुराऽऽनुपूर्वीनाम चेति चतुर्धाऽऽनुपूर्वीनाम ।

तत्र नरकगत्या कर्मप्रकृत्या सहचरिताऽऽनुपूर्वी नरकाऽऽनुपूर्वी, तत्सहचरित्वन्तु तत्समकालमस्या वेद्यमानत्वात् । नरके द्विसमयाऽऽदिवक्रगत्या गच्छतो जीवस्य नरकाऽऽनुपूर्व्या वृषभस्याऽभीष्टदेशप्रापणे नासिकरज्जुकल्पाया उदयो भवति । तद्विपाकवेद्या कर्मप्रकृतिश्च नरकाऽऽनुपूर्वी नाम एवं तिर्यगानुपूर्वीनाम मनुष्याऽऽनुपूर्वीनाम सुराऽऽनुपूर्वीनाम च वाच्यानि । ऋजुगत्या गच्छतो जीवस्याऽऽनुपूर्व्या उदयो नाऽस्ति । **उक्तञ्च बृहत्कर्मविपाके** –

नरयाऽऽउअस्स उदए , नरए वक्केण गच्छमाणस्स। नरयाऽऽणुपुव्वियाए , तहिँ उदओ अन्नहिं नत्थि ॥१२२॥
एवं तिरि-मणु-देवे , तेसु वि वक्केण गच्छमाणस्स। तेसिमणुपुव्वियाणं , तहिँ उदओ अन्नहिं नत्थि ॥१२३॥'' इति ।

साम्प्रतं विहायोगतिनाम्न उत्तरभेदौ प्राह - **''सुह०''** त्ति ''शुभाऽशुभखगतिः' द्वन्द्वात्परत्वात् खगतिशब्दो द्वाभ्यामप्यभिसम्बध्यते तथा नामशब्दोऽपि, प्रकृतत्वात् । **ततश्चाऽयमर्थः**:- शुभखगतिनाम = प्रशस्तविहायोगतिनाम, अशुभखगतिनाम = अप्रशस्तविहायोगतिनाम चेति द्विविधं विहायोगतिनाम ।

यदुदयाज्जीवस्य गज-कलभ-राजहंसाऽऽदिवत्प्रशस्ता विहायोगतिर्भवति, तत्प्रशस्तविहायोगतिनाम । यदुदयाज्जीवस्य खराऽऽदिदवद् अप्रशस्ता विहायोगतिर्भवति, तद् अप्रशस्तविहायोगतिनाम ।

अथ षष्ठं नामकर्म निगमयन्नाह - **''छट्ठं''** इत्यादि, तदेवं दर्शितनीत्या 'षष्ठं' ग्रन्थोपन्यस्तज्ञानाऽऽवरणाऽऽदिक्रमप्रामाण्याद् नामकर्म 'त्रियुतशतविधम्' त्र्युत्तरशतप्रकारमस्ति ।

इदानीं गोत्रकर्मण उत्तरभेदद्वयं वक्तुकामो गाथायाश्चरमं चतुर्थचरणमाह - **''णीउच्चं''** इत्यादि, 'नीचोच्चं' नीचमुच्चं च 'सप्तमं' ग्रन्थक्रमप्रामाण्यात् गोत्रकर्म द्विविधम् ।

**अयम्भावः**:- गोत्रकर्म द्विप्रकारं समस्ति, उच्चैर्गोत्रं नीचैर्गोत्रं चेति । तत्र यदुदयाद् देश-जाति-कुल-स्थान-मान-सत्कारै-श्वर्याद्युत्कर्षमासाद्यते तथा निर्धनः कुरूपो बुद्ध्यादिपरिहीणोऽपि पुरुषः सुकुलजन्ममात्रादेव लोकात् पूजां लभते तद् उच्चैर्गोत्रम् । एतद्विपरीतं नीचैर्गोत्रम्, **तद्यथा**-यदुदयात् चण्डाल-मुष्टिक-व्याध-मत्स्यबन्ध-दास्याऽऽदिभावमाप्यते तथा महाधनोऽप्रतिरूपो बुद्ध्यादिसमन्वितोऽपि पुमान् विशिष्टकुलाऽभावाद् लोकाद् निन्दां प्राप्नोति तद् नीचैर्गोत्रम् ।

**यदभ्यधायि सप्ततिकावृत्तौ श्रीमन्मलयगिरिपादैः**:- (गा. ५/पत्र. १५५ / १७९)

''यदुदयादुत्तमजातिकुलप्राप्तिः सत्काराऽभ्युत्थानाऽञ्जलिप्रग्रहाऽऽदिरूपपूजालाभसम्भवश्च तदुच्चैर्गोत्रम्, तद्विपरीतं नीचैर्गोत्रम् ।'' इति ।

**उक्तञ्च श्रीतत्त्वार्थभाष्यवृत्तौ** - (अ. ८, सू. १३/भा. २, पत्र. १६४)

''यदुदयाज्जीवो गच्छत्युच्चैर्नीचैश्च जातीरुच्चावचास्तद् गोत्रं द्विविधम् - उच्चैर्नीचैश्चेति उच्चैर्गोत्रं नीचैर्गोत्रम् । चशब्दोऽवधारणाऽर्थः । द्विभेदं द्विप्रकारमेवेति । तत्रोच्चैर्गोत्रमित्यादिना गोत्रकर्मणः कार्यमावेदयते । कार्यलिङ्गं हि कारणं तयोर्द्वयोः प्रकृत्योर्यदुच्चैर्गोत्रं तस्येदं कार्यमिति दर्शयति । आर्यदेशे मगधा-ऽङ्ग-वङ्ग-कलिङ्गाऽऽदिके सम्भवः । जातिः पितुरन्वयो हरिवंशेक्ष्वाकुप्रभृतिः । कुलं मातुरन्वयः, सोऽप्येवंप्रकार एवोग्रभोगाऽऽदिलक्षणः । स्थानमिति, प्रभोः समीपे प्रत्यासन्ननिवेशित्वम् । मानः पूजा स्वहस्तेन ताम्बूलप्रदानाऽऽदिः । सत्कारोऽभ्युत्थानाऽऽसनाऽञ्जलिप्रग्रहाऽऽदिः क्रियते तस्याऽसौ उच्चैर्गोत्रोदयः । ऐश्वर्यमिभाऽश्वरथपदातिप्रभृतेः प्राभूत्यम् । उत्कर्षाऽपकर्षभावत्वादनेकविधम् । एषां देशाऽऽदिसम्भवानां निर्वर्तकमुच्चैर्गोत्रम् । विपरीतं नीचैर्गोत्रमिति । चण्डालाः प्रसिद्धा एव मातङ्गाः । चण्डालग्रहणं च प्रदर्शनं बहूनां वरुडकमुरुक्ककाऽऽदीनाम् । मौष्टिकाः = शौरिकाऽऽदयः । व्याधाः = मृगयवो लुब्धकाः, । मत्स्यबन्धाः = प्राणातिपातहेतुभिरानायाऽऽदिभिर्जीवन्ति ये । दासभावो दास्यम्, तन्निर्वर्तकं नीचैर्गोत्रमिति । आदिशब्दादवस्करशोधकाऽऽदिपरिग्रह इति ।'' इति ।

**तथा बृहत्कर्मविपाकेऽपि** -

''अघणी बुद्धिविउत्तो, रूवविहूणो वि जस्स उदएणं । लोयम्मि लहइ पूयं, उच्चागोयं तयं होइ ॥१५४॥
सघणो रूवेण जुओ, बुद्धो निउणो वि जस्स उदएणं । लोयम्मि लहइ निन्दं, एयं पुण होइ णीयं तु ॥१५५॥ इति ॥२१॥

एतर्हि चरमस्याऽष्टमस्याऽन्तरायकर्मणः पञ्चोत्तरभेदानभिधित्सुर्ग्रन्थकृदाहैकगाथाम् -

**तह दाण-लाह-भोगो - वभोग-विरियंतरायगं चरमं ।**
**पंचविहं इइ एआ , सव्वा अडवण्णजुत्तसयं ॥२२॥**

(प्रे०) **''तह''** इत्यादि, तथा 'दान-लाभ-भोगो-पभोग-वीर्या-ऽन्तरायकम्' इह स्वार्थे कप्रत्ययः, ''द्वन्द्वाऽन्ते श्रूयमाणपदं प्रत्येकमभिसम्बध्यते'' इति **न्यायेना**ऽन्तरायशब्दः प्रत्येकं योज्यते, **ततश्चाऽयमर्थः** - दानाऽन्तरायं लाभाऽन्तरायं भोगाऽन्तरायम् उपभोगाऽन्तरायं वीर्याऽन्तरायं चेति 'पञ्चविधं' पञ्चप्रकारं 'चरमम्' अन्त्यम् = क्रमप्रामाण्यादष्टमम् अन्तरायकर्म भवति ।

तत्र दीयते इति दानम्, तस्याऽन्तरायं दानाऽन्तरायम्, यदुदयात् सत्यपि दातव्ये वस्तुनि, समागते च गुणवति पात्रे, 'दत्तमस्मै बहु बहुफलम्' इति जानन्नपि दातुं नोत्सहते, तद् दानाऽन्तरायम् १ । **उक्तञ्च श्रीबन्धशतकचूर्णौ-** ''दव्वपडिग्गाहकसन्निज्झे वि दिन्नं महफलं ति जाणंतो वि दायव्वं ण देइ जस्स कम्मस्स उदएणं तं दाणंतराइगं ।'' (गा.३९/पत्र.५९) इति ।

**तथा श्रीतत्त्वार्थभाष्यवृत्तावपि -**

''द्रव्ये प्रतिग्राहके च सन्निहितेऽस्मै दत्तं महाफलमिति जानानोऽपि दातव्यं न ददाति'' (अ.८,सू.१४/भा.२,पत्र.१६४) इति ।

लभ्यत इति लाभः, तस्याऽन्तरायं लाभाऽन्तरायम्, यदुदयाद् विशिष्टे प्रसिद्धेऽपि दातरि, विद्यमानेऽपि देयवस्तुनि याञ्चाकुशलो गुणवानपि याचको न लभते, तद् लाभाऽन्तरायम् २ । **ननु** यदि दातुः सकाशाद्याचको न प्राप्नोति, तर्हि दातुरेव दानाऽन्तरायं कुतो नोच्यते, याचकस्य लाभाऽन्तरायभणने किं कारण**मिति चेत्** ? **उच्यते** – यदि दाता यथा विवक्षिताय याचकाय न ददाति, तथाऽन्यस्मै कस्मैचिदपि याचकाय न दद्यात्, तर्हि दातुरेव दानाऽन्तरायं स्यात्, यदि पुनरयं दाता सर्वस्मै प्रयच्छति, विवक्षिताय मार्गणाय केवलं न ददाति तदा याचकस्यैव लाभाऽन्तरायम् । दानाऽन्तरायं दायकविषयं लाभाऽन्तरायं तु मार्गणविषयमित्यनयोर्भेदः । **यदुक्तं श्रीतत्त्वार्थभाष्यवृत्तौ -**

तथा कश्चिद्वदान्यः सर्वदा दानाऽऽर्द्रकरः समस्ताऽर्थिभ्यो यथाप्रार्थनं स्वशक्त्या निर्विशेषमूर्जितचेता यस्मै याचतेऽपि नो विसृजति प्रदेयमल्पमपि तस्य लाभाऽन्तरायकर्मोदयः ।'' (अ. ८, सू. १४/ भा. २, पत्र. १६४) इति ।

**तथा बन्धशतकचूर्णावपि–** ''सव्वकालं सव्वेसिं देन्तो वि जस्स ण देइ तस्स तं लाभाऽन्तराइगोदओ ।'' (गा. ३९/पत्र. ५९) इति ।

भुज्यते = सकृदुपभुज्य यस्त्यज्यते पुनरुपभोगाऽसहं भवति, स भोगः, कर्मणि घञ्प्रत्ययः, स च माल्य-चन्दना-ऽगुरु-पुष्पा-ऽऽहारादिः, यदुदयात्तु सति विभवाऽऽदौ सम्पद्यमाने चाऽऽहार-माल्याऽऽदौ प्रत्याख्यानपरिणामहीनोऽपि केवलकार्पण्या-ऽशक्तिप्रमुखकारणवशाद् न भुङ्क्ते तद् भोगाऽन्तरायम् ।

**यदाह श्रीतत्त्वार्थभाष्यवृत्तौ** – ''तथा सकृदुपभुज्य यत् त्यज्यते पुनरुपभोगाऽक्षमं माल्य-चन्दना-ऽगुरुप्रभृति, तच्च सम्भवादपि यस्य कर्मण उदयाद् यो न भुङ्क्ते तस्य भोगाऽन्तरायकर्मोदयः ।'' (अ. ८, सू. १४/भा. २, पत्र. १६४) इति ।

उपशब्दः पौनःपुन्याऽर्थको वर्तते, उप = पुनः पुनर्भुज्यते यः स उपभोगः स्त्री-शय्या-भवना-ऽऽसना-ऽऽदिरूपः ।

**उक्तञ्च बृहत्कर्मविपाके –**

"सइ भुज्जइत्ति भोगो, सो पुण आहार-पुष्फ[1]माईओ । उवभोगो [2]य पुणो पुण, उवभुज्जइ भवण-विलयाऽऽई ॥१६५॥" इति ।

उपभोगस्याऽन्तरायम् उपभोगाऽन्तरायम्, यदुदयवशाद् विद्यमानमपि स्त्री-वस्त्र-शयना-ऽऽसन-भाजनाऽऽदिकं नोपभुङ्क्ते, तद् उपभोगाऽन्तरायम् । **बन्धशतकचूर्णौ** पुनर्भोगोपभोगाऽन्तराययो: स्थाने क्रमश उपभोग-परिभोगाऽन्तराये भणिते । **तथा च तद्ग्रन्थ:**— "एक्कसिं भोत्तूण छड्डिज्जइ तं उवभोगं मल्लाऽऽइगं, तं विज्जमाणं पि जस्स कम्मस्स उदएणं ण भुंजइ **जहा**-सुबन्धू, तं उवभोगन्तराइगं । परिभुंजइ पुणो पुणो भुज्जति तं परिभोगं स्त्रीवस्त्राऽऽदिकं सन्निहयं पि जस्स कम्मस्स उदएणं ण भुंजइ जहा सुबन्धू एतं परिभोगन्तराइगं ।" (गा. ३९/ पत्र. ५९) इति ।

वि = विशेषेण ईर्यते = चेष्टतेऽनेनेति वीर्यम्, **यद्वा** वि = विविधम् अनेकप्रकारमीरयति यत्प्राणिनं क्रियासु तद् वीर्यं = सामर्थ्यं = शक्तिर् = उत्साह: = पराक्रम: = चेष्टा इत्यादय: पर्याया: । **तथा चोक्तम्-**

"जोगो विरियं थामो, उच्छाह परक्कमो तहा [3]चिट्ठा । सत्ती सामत्थं [4]ति य, जोगस्स भवंति पज्जाया ॥ ॥" इति ।

तच्च मिथ्यादृष्टिप्रभृतिक्षीणकषायमोहगुणस्थानकपर्यन्तानां जीवानां क्षयोपशमजनितं भवति, क्षयोपशमस्य वैचित्र्यात्तज्जनितं वीर्यमपि विचित्रतारतम्यभाग्भवति । केवलज्ञानिनां निश्शेषत: क्षीणत्वात्सर्वेषां निरतिशयं भवति ।

**उक्तञ्च कर्मप्रकृतौ** - (बं. क. पत्र. १९-२) (१२)

"विरियंतरायदेस-क्खएण सव्वक्खएण वा लद्धी । अभिसंधिजमियरं वा, तत्तो विरियं सलेसस्स ॥ ॥" इति ।

**तथा चाऽत्र चूर्णि:**- "तत्थ निमित्तं वीरियंतराइयस्स कम्मस्स खओवसमेणं वीरियलद्धी छउमत्थाणं उप्पज्जइ, खयतो केवलीणं वीरियलद्धी उप्पज्जइ । तं च दुविहं - बादरसुहमएयणासहितं इयरं च..." (बं. क. पत्र.१९-२) (१२) इत्यादि ।

**तथा च श्रीमदुपाध्याययशोविजयपादैरप्यत्र प्रोक्तम् –**

"वीर्यान्तरायस्य देशक्षयेण सर्वक्षयेण वा लब्धिर्भवतीति शेष: । तत्र देशक्षयेण छद्मस्थानां सर्वक्षयेण च केवलिनां वीर्यलब्धिराविर्भवति । '**तत्तो**' त्ति-तस्या: क्षायिक-क्षायोपशमिकरूपाया वीर्यलब्धे: सकाशादुपजायमानं यत्सलेश्यस्य वीर्यम्.... ।" इत्यादि ।

वीर्यस्याऽन्तरायं वीर्याऽन्तरायम्, यदुदयवशाद् बलवान् नीरुजो वय:स्थोऽपि जनस्तृणकुब्जीकरणेऽप्यसमर्थो भवति, तद् वीर्याऽन्तरायम् ५।

**उक्तञ्च प्राचीनकर्मविपाकाऽऽख्यप्रथमकर्मग्रन्थे –**

"बलवं रोगविउत्तो, वयसंपण्णो वि जस्स उदएणं । विरिएण होइ हीणो, वीरियविग्धं तु पंचमयं ॥१६६॥" इति ।

**यदुक्तं श्रीबन्धशतकचूर्णावपि** - "वीर्यं, शक्ति:, चेष्टा, उत्साह:, जो समत्थो वि णिरूजो वि तरूणो वि अप्पबलो भवइ जस्स कम्मस्स उदएणं एतं वीरियन्तराइगं । तस्स सव्वोदओ एगिन्दिएसु तओ तरतमेण खओवसमविसेसेण बेइंदियाणं वीरियवुड्ढी ताव जा दुचरिमसमयछउमत्थो त्ति, केवलम्मि सव्वक्खओ ।" (गा. ३९/पत्र. ५९) इति ।

१. "माईसु" इत्यपि । २ "उ" इत्यपि । ३ "चेट्ठा" इत्यपि पाठ: । ४ "चिय" इत्यपि ।

"**इइ**" इत्यादि, 'इति' दर्शितरीत्या = उक्तप्रकारेण 'एताः सर्वाः' अष्टानां मूलप्रकृतीनां समस्ता उत्तरप्रकृतयः 'अष्टपञ्चाशयुक्तशतम्' अष्टपञ्चाशदधिकशतसंख्याकाः (१५८) भवन्ति, न पुनरधिकाः ।

**यदुक्तं बृहत्कर्मविपाके -**

"मूलपयडीउ अट्ठ उ, उत्तरपयडीण अट्ठवन्नसयं । तासिं सभावभेया, हुंति हु भेया इमे सुणह ॥४॥" इति ।

एताश्च प्रकृतयः सत्तामाश्रित्याऽष्टापञ्चाशदुत्तरशतं भवन्ति ।

**उक्तञ्च लोकप्रकाशग्रन्थे दशमसर्गे –** (द्र. लो. पत्र. १२२-१२३) (पु. भा. १, पत्र. ५०८)

"नाम्नस्त्र्याढ्यं शतं पञ्च-पञ्चाशत् शेषकर्मणाम् । सत्तायामष्टपञ्चाढ्य-मेवं प्रकृतयः शतम् ॥२०८॥" इति ।

बन्धननाम्नः पञ्चविधमङ्गीकुर्वतामाचार्याणामभिप्रायेण पुनरष्टचत्वारिंशदुत्तरशतं मूलकर्मणां सर्वोत्तरप्रकृतयो भवन्ति । बन्धनानां पञ्चदशस्थाने पञ्चानामेव सद्भावेन प्रागुक्तसर्वोत्तरप्रकृतिसङ्ख्यातो दशसङ्ख्याया हीयमानत्वात् ।

**उक्तञ्च नव्यकर्मस्तवे -** "संते अडयालसयं " इति । (गाथा २५)

**तथा लोकप्रकाशे दशमसर्गेऽपि- (द्रव्यलोकप्रकाश.** प्रत पत्र. १२३-१) (पु. भा. १, पत्र. ५०८)

"चेद् बन्धनानि पञ्चैव, विवक्ष्यन्ते तदा पुनः । अष्टचत्वारिंशशतं, सत्तायां कर्मणां भिदः ॥२०९॥" इति ।

बन्धोदययोः पुनर्बन्ध-संघातनानि स्वशरीरेष्वन्तर्भवन्ति, वर्णाऽऽदिचतुष्कस्याऽवान्तरभेदा न सन्ति, तथैव **पूर्वमहर्षि**भिर्विवक्षितत्वाद्, तथा बन्धे सम्यक्त्व-मिश्रमोहनीयप्रकृती अपि न स्तः तेन बन्धे विंशत्यधिकशतं भवन्ति, उदये च द्वाविंशत्युत्तरशतं सन्ति । तथोपलक्षणाददीरणायामपि द्वाविशं शतं स्युः ।

**उक्तञ्च लोकप्रकाशग्रन्थे द्रव्यलोके दशमसर्गे** (द्र. लो. प्रत. पत्र. १२२-२) (पु. भा. १, पत्र. ५०७-५०८)

"बन्धनसंघातननाम्नामिह पञ्चदशपञ्चसंख्यानाम् । सह बन्धसजातीय- त्वाभ्यां न स्वाङ्गतः पृथग्गणनम् ॥२०१॥ (गीतिः)
कृष्णाऽऽदिभेदभिन्नाया , वर्णादिविंशतेः पदे । सामान्येनैव वर्णादि - चतुष्कमिह गृह्यते ॥२०२॥
पूर्वोक्तत्र्युत्तरशता - देषां षड्विंशतस्ततः । कृतेऽपसारणे सप्त- षष्टिर्भेदा भवन्ति ते ॥२०३॥
बन्धे तथोदये नाम्नः, सप्तषष्टिरियं मता । षड्विंशतिश्च मोहस्य, बन्धे प्रकृतयः स्मृताः ॥२०४॥
सम्यक्त्व-मिश्रमोहौ य- ज्जातु नो बन्धमर्हतः । एतौ हि शुद्धा-ऽर्धशुद्ध- मिथ्यात्वपुद्गलाऽऽत्मकौ ॥२०५॥
त्रिपञ्चाशत्प्रकृतय - स्तदेवं शेषकर्मणाम् । नाम्नश्च सप्तषष्टिः स्युः, शतं विशं च मीलिताः ॥२०६॥
अधिक्रियन्ते बन्धे ता, उदयोदीरणे पुनः । सम्यक्त्वमिश्रसहिता - स्ता द्वाविंशं शतं खलु ॥२०७॥ इति ॥२२॥

## ॥ इत्युत्तरकर्मप्रकृतयः ॥

इत्येतदेव प्रसङ्गवशाद् गाथाद्वयेन प्राह –

**सत्तं पडुच्च एआ , णेया बंधम्मि वीसजुत्तसयं ।**
**उत्तरपयडी उदए , बावीसाऽहियसयं जम्हा ॥२३॥**
**ससरीरऽन्तरभूया , बंधण-संघायणा उ बंधु-दए ।**
**वण्णाऽऽइचऊ गेज्झा , बंधे णो सम्म-मीसाइं ॥२४॥**

(प्रे०) ''**सत्तं**'' इत्यादि, भावाऽर्थो गताऽर्थः । अक्षरार्थोऽपि सुगमः । **तथाहि–** 'एताः' मूलाऽष्टकर्मसत्का अनन्तरोदिता अष्टपञ्चाशदुत्तरशतप्रकृतयो हि सत्तां प्रतीत्य ज्ञेयाः ।

**उक्तञ्च लोकप्रकाशे दशमसर्गे-** (द्र. लो. प्रत. पत्र. १२२-१२३) (पु. भा. १, पत्र. ५०८)

''नाम्नस्त्र्याढ्यं शतं पञ्च-पञ्चाशत् शेषकर्मणाम् । सत्तायामष्टपञ्चाढ्य-मेवं प्रकृतयः शतम् ॥२०८॥'' इति ।

बन्धे पुनरुत्तरप्रकृतयो हि विंशतियुक्तशतमुदये च द्वाविंशत्यधिकशतं भवन्ति, कुत एवम् ? इत्यत आह 'यस्मात्' यस्मात्कारणात् 'बन्धोदये' बन्धे उदये च विचार्यमाणे 'बंधणसंघायणा' त्ति प्राकृतत्वात् पुंस्त्वम् 'बन्धन-संघातनानि' पञ्चदश बन्धनानि पञ्च संघातनानि च स्वशरीराऽन्तर्भूतानि स्वशरीराऽन्तर्गतानि विवक्ष्यन्त इति शेषः । **तद्यथा-**औदारिकशरीरग्रहणेनौदारिकौदारिकौ-दारिकतैजसौ-दारिककार्मणौ-दारिकतैजसकार्मणरूपौदारिकबन्धनचतुष्क-मौदारिकसंघातनञ्च गृह्येते, एवं वैक्रियशरीरेणाऽऽहारकशरीरेण च । तैजसशरीरेण तैजसतैजस-तैजसकार्मणबन्धनद्वय-तैजससंघातनानि गृहीतानि सन्ति । कार्मणशरीरेण च कार्मणकार्मणबन्धनं कार्मणसंघातनञ्च गृहीते स्तः ।

**उक्तञ्च प्राचीनकर्मविपाके –** बंधणसंघाया वि च, शरीरगहणेण इह गहिया ॥८०॥'' इति ।

**तथा नव्यकर्मविपाकेऽपि-** ''बंधणसंघायगहो तणूसु' (गा.३० / पत्र.४२) इति ।

'वर्णाऽऽदयः' वर्णगन्धरसस्पर्शाऽऽख्याः 'चत्वारः' चतुःसङ्ख्याकाः सामान्येनैव ग्राह्याः, न तु कृष्णाऽऽदिभिः स्वोत्तरभेदैः पञ्च-द्वि-पञ्चा-ऽष्टसङ्ख्याकैर्विंशतिसङ्ख्याकाः ।

**उक्तञ्च नव्यकर्मविपाके–** ''सामन्नवन्नचऊ'' (गा. ३०/पत्र. ४२) इति ।

एवं च पञ्चदशबन्धनानि पञ्चसंघातनानि षोडशवर्णाऽऽदिसत्कभेदान् च त्र्यधिकशतनामप्रकृतिभ्योऽपनीय शेषाः सप्तषष्टिप्रकृतयो नाम्न उदए बन्धे च गृह्यन्ते । तेनोदये सर्वसङ्ख्यया द्वाविंशत्युत्तरशतमुत्तरप्रकृतयो भवन्ति, उपलक्षणत्वादुदीरणायामपि ।

बन्धे तु सम्यक्त्वमोहनीय-मिश्रमोहनीययोरप्यपनयनाद् विंशत्युत्तरशतमुत्तरप्रकृतयो भवन्ति, एतदेव प्रकटयति- ''**बंधे**'' इत्यादि, बन्धे 'सम्यक्त्व-मिश्रे' सम्यक्त्वमोहनीयं मिश्रमोहनीयं चाऽपि 'नो' नोशब्दस्य निषेधाऽर्थकत्वाद् न भवतः, मिथ्यात्वमोहनीयपुद्गलानामेव पुञ्जत्रयकरणद्वारा संक्रमेण च सम्यक्त्व-मिश्रमोहनीययोः सम्पादनान्न तयोर्बन्धोऽधिकृतः ।

**उक्तञ्च नव्यकर्मविपाके -**

''इय सत्तट्ठी बंधो-दए य न य सम्ममीसया बंधे । बंधुदए सत्ताए, वीसदुवीसऽट्ठवन्नसयं ॥३१॥'' (पत्र. ४२/४९) इति ।

॥२३-२४॥

**॥ इति कर्मप्रकृतयः ॥**

## ॥ अथ ग्रन्थसमाप्त्याद्युपसंहारः ॥

एतर्हि प्रकृतग्रन्थमुपसंजिहीर्षुस्तदर्थगर्भामिकां पथ्याऽऽर्यामुपदिशति ग्रन्थकारः--

**सिरिवीरसेहरविजय- मुणिणा सिरिपेमसूरिसामज्जे ।**
**जिणसिद्धंतपहावा , कम्मपयडिकित्तणं विहियं ॥२५॥ (पथ्याऽऽर्या)**

(प्रे०) "**सिरि०**" इत्यादि, 'श्रीप्रेमसूरिसाम्राज्ये' श्रिया = सम्यग्रत्नत्रयादिलक्ष्म्या समन्विताश्च ते प्रेमसूरयः = प्रेमनामान आचार्यभगवन्तो गच्छाधिपतयः प्रगुरोर्गुरवः श्रीप्रेमसूरयः, तेषां साम्राज्ये = साधुसमुदायरूपे गच्छराज्ये = **इदमत्र हृदयम्**-पुण्यनामधेयानामस्मदीयानां प्रपितामहगुरुवर्याणां श्रीमद्विजय**प्रेमसूरीश्वरा**णां पार्श्ववर्तिना 'श्रीवीरशेखरविजयमुनिना' श्रिया = तत्कृपालब्धज्ञानादिलक्ष्म्याऽन्वितश्चासौ वीरशेखरविजयः = तत्संज्ञकस्तत्प्रशिष्यलवः श्रीवीरशेखरविजयः स चासौ मुनिः = संयतः श्रीवीरशेखरविजयमुनिः तेन श्री**वीरशेखरविजयमुनिना** 'जिनसिद्धान्तप्रभावात्' जिनानां = सर्वज्ञानामर्हतां सिद्धान्तस्य = आप्तोक्तेः प्रभावात् = माहात्म्यात् जिनसिद्धान्तप्रभावात् = तीर्थकृदागमपरमसामर्थ्यात् 'कर्मप्रकृतिकीर्तनं' कर्मणां = ज्ञानावरणाऽऽदिमूलोत्तरकर्मणां प्रकृतीनां = स्वभावानां कीर्तनं = प्रतिपादनं कर्मप्रकृतिकीर्तनं विहितं = कृतम् ॥२५॥

## ॥ अथ क्षमायाचना-ऽशुद्धिप्रमार्जनप्रार्थनाऽऽदि ॥

सम्प्रति मतिजडताऽऽदिकारणेन शास्त्रविरुद्धं किमपि यदि स्यात्तच्छुद्धिमिच्छुरात्मस्वच्छन्दतां परिहरन् विनतिं दर्शयन् श्रुतशालिनो बहुमानसूचिकां विज्ञापनां कुर्वंश्चाऽऽह ग्रन्थकारः पथ्याऽऽर्याम्—

**किं पि जमागमअसहं, मइजडया - छाउमत्थमुहदोसा ।**
**एत्थ सिआ सुउदहिणो, तं सोहन्तु मइ करिअ किवं ॥२६॥ (पथ्याऽऽर्या)**

## ॥ इति मूलग्रन्थः समाप्तः ॥

(प्रे०) "**किं**" इत्यादि, 'अत्र' अमुस्मिन् कर्मप्रकृतिकीर्तनाभिधे प्रकरणे यत्किमप्यागमासहं = शास्त्रापक्रान्तं 'मतिजडता छाद्मस्थ्यमुखदोषात्' मतेः = बुद्धेर्जडता = मान्द्यं मतिजडता = प्रज्ञामूढता, छाद्मस्थ्यं = परिपूर्णज्ञानाभावता = केवलज्ञानविरहत्वं, मतिजडता च छाद्मस्थ्यं च मतिजडता-छाद्मस्थ्ये, ते मुखे = आदौ येषां ते मतिजडता-छाद्मस्थ्यमुखाः, अत्र मुखपदेना-ऽनुपयोग-दृष्टिदोषादयो ग्राह्याः, तेषां दोषाद् = अपराधाद् मतिजडता-छाद्मस्थ्यमुखदोषात्स्यात् = भवेत् तद् = सिद्धान्तातिक्रान्तं मयि = ममोपरि कृपाम् = अनुग्रहं कृत्वा = विधाय श्रुतोदधयः = श्रुतातिशायिनः शोधयन्तु = अशुद्धपदापसारेण शुद्धपदसंयोजनेन संस्कुर्वन्तु ॥२६॥

कृतं प्रेमप्रभावृत्त्या, वीरशेखरसाधुना । श्रीप्रेमसूरिसान्निध्ये, कर्मप्रकृतिकीर्तनम् ॥१॥ (अनुष्टुब्)
कुशलं तया यदाप्तं, तेन कुशलमस्तु समजगतः । यत्किमपीहाऽशुद्धं, करुणार्द्रैः शोध्यमागमज्ञैस्तत् ॥२॥ (पथ्योद्गीतिः)

## ॥ इति प्रेमप्रभावृत्तिः समाप्ता ॥

॥ इति स्वोपज्ञप्रेमप्रभावृत्तिराजितं

# आचार्यश्रीविजयवीरशेखरसूरिकृतं

# कर्मप्रकृतिकीर्तनं

समाप्तम् ॥

# अथ

# दश

# परिशिष्टानि

# ॥ अथ प्रथमं परिशिष्टम् ॥

## ॥ मूलगाथाः ॥

### ॥ कर्मप्रकृतिकीर्तनम् ॥

णमिऊणं कम्मपयडि - विणासिपावापुरित्थसिरिवीरं । कित्तेमि कम्मपयडी, सपरहियत्थं गुरुकिवाए ॥१॥
णाणस्स दंसणस्स य , आवरणं वेअ-मोह-आऊणि । णामं गोअं विग्घं, एआ मूलपयडी अट्ठ ॥२॥
तेसिं उत्तरपयडी , कमसो पंच णव दोण्णि अडवीसं । चउरो तिजुअसयं दो, पणऽत्थि सव्वाऽडवण्णसयं ॥३॥
मइ-सुअ-ऽवहि-मण-केवल- णाणावरणं ति पंचहा पढमं । णय-णेय-रोहि-केवल- दंसणआवरणगं णेयं ॥४॥
णिद्दा णिद्दाणिद्दा , पयला पयलपयला य थीणद्धी । एवं नवहा वीअं, सायमसायं दुहा तइअं ॥५॥
होएज्ज मोहणीयं , दुविहं दंसण-चरित्तभेआओ । दंसणमोहो तिविहो, सम्मं मीसं च मिच्छत्तं ॥६॥
दुविहो चरित्तमोहो , सोलकसाय-णवणोकसायेहिं । तहि कोह-माण-माया- लोहक्खा चउविहकसाया ॥७॥
चउहा पत्तेगमण-अ - पच्चक्खा-णियर-संजलणभेआ । हुन्ति णवणोकसाया, हस्स-रई-अरइ-सोग-भय-कुच्छा ॥८॥ (गीतिः)
थी-पुरिस-णपुमवेआ , इह होइ चउत्थमट्ठवीसविहं । णरय-तिरि-णर-सुराउग- भेएहिं पंचमं चउहा ॥९॥
गइ-जाइ-तणु-उवंगा , वंधण-संघायणाणि संघयणं । संठाण-वण्णा-गंध-रस-फास-अणुपुव्वि-विहयगई ॥१०॥
पिंडपयडित्ति चउदस , तह अगुरुलहू-वधाय-परघाया । उस्सास-आय-वुज्जोअ-निमिण-तित्थमड पत्तेया ॥११॥
तस-वायर-पज्जत्तं , पत्तेअ-थिरं सुहं च सुभगंच । सुस्सर-आइज्जाणि य, जसकित्ती होइ तसदसगं ॥१२॥
थावरदसगं थावर - सुहम-अपज्जत्तगाणि साहारं । अथिर-असुह-दुभगाणि य, दुस्सर-ऽणाइज्ज-अजसं ति ॥१३॥
पिंडपयडीण चउ-पण - पण-त्तिग-पणरस-पंच-छग-छक्कं । पण-दु-पण-ऽट्ठ-चउ-दुगं, पणसयरी उत्तरा भेआ ॥१४॥
णिरय-तिरि-णर-सुरगई , इग-विअ-तिग-चउ-पणिंदिजाईओ । उरल-विउव्वा-ऽऽहारग- तेअग-कम्मणसरीरा य ॥१५॥
पढमतितणूणुवंगा , होज्जा उरलाऽऽइगाण सजुआणं । पणवंधणाणि हुन्ते, कम्मणजुत्ताण चत्तारो ॥१६॥
तिण्णि य तेअजुआणं , तेअस-कम्मणजुआण तिण्णि त्ति । पण्णरहवंधणाइं , तणुव्व संघायणाणि पण ॥१७॥
संघयणं छद्धा वज्जरिसहणाराय-रिसहणारायं । णाराय-ऽद्धणरायं , कीलिय-छेवट्ठगाणि त्ति ॥१८॥
समचउरंसं णिग्गोह-साइ-कुज्जाणि वामणं हुंडं । संठाणा वण्णा किण्ह- नील-लोहिअ-हलिद्द-सिआ ॥१९॥
सुरहि-दुरही रसा पण , तित्त-कडु-कसाय-अंविला महुरो । फासा गुरु-लहु-मिउ-खर-सी-उण्ह-सिणिद्ध-रुक्खऽट्ठ ॥२०॥
णिरय-तिरिक्ख-मणुस-सुर- अणुपुव्वी होज्ज सुह-असुहखगई । छट्ठं तिजुअसयविहं, णीऽ-उच्चं सत्तमं दुविहं ॥२१॥
तह दाण-लाह-भोगो - वभोग-विरियंतरायगं चरमं । पंचविहं इइ एआ, सव्वा अडवण्णजुत्तसयं ॥२२॥
सत्तं पडुच्च एआ , णेया वंधम्मि वीसजुत्तसयं । उत्तरपयडी उदए, वावीसाऽहियसयं जम्हा ॥२३॥
ससरीरऽन्तरभूया , वंधण-संघायणा उ वंधु-दए । वण्णाऽऽइचऊ गेज्झा, वंधे णो सम्म-मीसाई ॥२४॥
सिरिवीरसेहरविजय - मुणिणा सिरिपेमसूरिसामज्जे । जिणसिद्धंतपहावा , कम्मपयडिकित्तणं विहियं ॥२५॥
किं पि जमागमअसहं , मइजडया - छाउमत्थमुहदोसा । एत्थ सिआ सुउदहिणो, तं सोहन्तु मइ करिअ किवं ॥२६॥

॥ इत्याचार्यश्रीविजयवीरशेखरसूरिकृतं कर्मप्रकृतिकीर्तनम् ॥

# ॥ अथ द्वितीयं परिशिष्टम् ॥

## ।। मूलगाथाऽऽद्यांशाः ।।

अकाराऽऽदिक्रमेण मूलगाथाऽऽद्यांशाः

| अनु. | गाथाऽऽद्यांशाः | गाथाऽङ्काः |
|---|---|---|
| | क | |
| १. | किं पि जमागमअसहं, | २६ |
| | ग | |
| २. | गइ-जाइ-तणु-उवंगा, | १० |
| | च | |
| ३. | चउहा पत्तेगमण-अ० | ८ |
| | ण | |
| ४. | णमिऊणं कम्मपयडि० | १ |
| ५. | णाणस्स दंसणस्स य, | २ |
| ६. | णिद्दा णिद्दाणिद्दा, | ५ |
| ७. | णिरय-तिरिक्ख-मणुस-सुर० | २१ |
| ८. | णिरय-तिरि-णर-सुरगई, | १५ |
| | त | |
| ९. | तस-बायर-पज्जत्तं, | १२ |
| १०. | तह दाण-लाह-भोगो० | २२ |
| ११. | तिण्णि य तेअजुआणं, | १७ |
| १२. | तेसिं उत्तरपयडी, | ३ |
| | थ | |
| १३. | थावरदसगं थावर० | १३ |
| १४. | थी-पुरिस-णपुमवेआ, | ९ |
| | द | |
| १५. | दुविहो चरित्तमोहो, | ७ |
| | प | |
| १६. | पढमतितणुवंगा, | १६ |
| १७. | पिंडपयडित्ति चउदस, | ११ |
| १८. | पिंडपयडीण चउ-पण० | १४ |
| | म | |
| १९. | मइ-सुअ-ऽवहि-मण-केवल० | ४ |
| | स | |
| २०. | संघयणं छद्धा वज्ज० | १८ |
| २१. | सत्तं पडुच्च एआ, | २३ |
| २२. | समचउरंसं णिग्गोह० | १९ |
| २३. | ससरीरऽन्तरभूया, | २४ |
| २४. | सिरिवीरसेहरविजय० | २५ |
| २५. | सुरहि-दुरही रसा पण, | २० |
| | ह | |
| २६. | होएज्ज मोहणीयं, | ६ |

# ॥ अथ तृतीयं परिशिष्टम् ॥

## ।। साक्षिग्रन्थाः ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्ति-टिप्पणाऽन्तर्गतसाक्षितयोद्धृतानां ग्रन्थानां नामसूचिः-

| अनु. | ग्रन्थनाम | पृष्ठाऽङ्काः |
|---|---|---|
| १. | अनुयोगद्वारसूत्रलघुवृत्तिः– | ८६ |
| २. | अन्यत्र– | ३,३७,३९,४०,४८,५०,५१,५२,६८,६९, ७०$^{२}$,७१,७२,७५,७९,८६,८७ |
| ३. | अभिधानचिन्तामणिकोशः– | १५-१६,८४ |
| ४. | अमरकोशः– | १६ |
| ५. | आकरः– | ६ |
| ६. | आचाराङ्गसूत्रनिर्युक्तिगाथा– | (७८) |
| ७. | आवश्यकनिर्युक्तिः– | ३०,४९, ५०$^{२}$ |
| ८. | आह च– | ५ |
| ९. | उक्तञ्च– | ४$^{२}$,५,८,१०,१०-११,✿ |
| १०. | उपदेशमाला– | ४५,४७,४८ |
| ११. | उपदेशमालारामदेवगणिवृत्तिः– | ४५,४६,४७,४८ |
| १२. | कर्मप्रकृतिः– | १६,१७,१०१ |
| १३. | कर्मप्रकृतिचूर्णिः– | ८५,१०१ |
| १४. | कर्मप्रकृतिमुनिचन्द्रसूरिटिप्पनकम्– | ७१ |
| १५. | कर्मप्रकृतिमलयगिरिसूरिवृत्तिः– | १७ |
| १६. | कर्मप्रकृतियशोविजयोपाध्यायवृत्ति | ६१-६२,६७,६९,८५,९५,९६,१०१ |
| १७. | कर्मविपाकदेवेन्द्रसूरिस्वोपज्ञवृत्तिः- | १६ |
| १८. | कल्पसूत्रसुबोधिकावृत्तिः– | ७२ |
| १९. | कषायप्राभृतचूर्णिः– | ४५$^{२}$,४६,४७ |
| २०. | तत्त्वार्थसूत्रभाष्यम्-- | ३८,४३,४५,४५-४६, ❀ |
| २१. | तत्त्वार्थसूत्रभाष्यवृत्तिः-- | ३१,५५,५६,६१,६३$^{२}$✳ |
| २२. | तत्त्वार्थसूत्रभाष्यसिद्धसेनगणिवृत्तिः- | १५,३६,३७,३८, ❋ |
| २३. | तत्त्वार्थसूत्रभाष्यहरिभद्रसूरिवृत्तिः- | ३६ |
| २४. | तत्त्वार्थसूत्रम्– | २८,३१,३४$^{२}$,३८ |
| २५. | तत्त्वार्थसूत्रवृत्तिः– | १६$^{२}$,२१,२२$^{३}$,२३$^{२}$,२४,२५,३८ |
| २६. | तथा चोक्तम्– | ३,४,४२,७९,१०१ |

✿१४,१८$^{२}$,२७,३३,३७,४१,४२,४३,४४,४९$^{२}$,५१,५६,५७,६०,८१,८२,९८ ❀ ४७,५२,५३,५४,६४,६५$^{२}$,६६,६६-६७,७०$^{२}$,७२,७६,७७,७९,८१,८२

✳६४$^{२}$,६५,६८$^{२}$,६९,७०,७७,७८,७९,८०,८१,८२$^{३}$,८४,८५,८५-८६,८६$^{३}$,८७$^{३}$,९३,९४$^{३}$,९८$^{२}$,९९,१००$^{३}$ ❋४९$^{२}$,६२,६४,६५,७३,७५

| अनु. | ग्रन्थनाम | पृष्ठाऽङ्काः |
|---|---|---|
| २७. | नन्दीसूत्रचूर्णि:– | २९,३१,३४,७५ |
| २८. | नन्दीसूत्रम्– | २६,२७[२],२९,३३ |
| २९. | नन्दीसूत्रवृत्ति:– | (७५) |
| ३०. | नवपदशतकम्– | ४० |
| ३१. | नव्यकर्मग्रन्थ:– | ५१,६८ |
| ३२. | नव्यकर्मविपाकप्रथमकर्मग्रन्थ:– | ५१,५२,६७,६८,६९,७०[२], ७१[२],७२,७९[२],१०३ |
| ३३. | नव्यकर्मविपाकप्रथमकर्मग्रन्थस्वोपज्ञवृत्ति:– | १६,५१,५१-५२,५९,६३,६७,७०,८०,९१,९४ |
| ३४. | नव्यकर्मस्तव:– | १०२ |
| ३५. | नव्यशतकपञ्चमकर्मग्रन्थस्वोपज्ञवृत्ति:– | १६ |
| ३६. | नास्तिकदर्शनम्– | ४१ |
| ३७. | पञ्चसंग्रह:– | १६,६७ |
| ३८. | पञ्चसंग्रहमलयगिरिसूरिवृत्ति:– | ५९,६७[२],६९,७३ |
| ३९. | पञ्चसंग्रहस्वोपज्ञ(मूल)टीका– | ९१ |
| ४०. | पाठान्तरम्– | (९)[२],(१०),(११)[२],(१२),(२८)[३]✤ |
| ४१. | प्रज्ञापनासूत्रचूर्णि:– | ८५ |
| ४२. | प्रज्ञापनासूत्रम्– | ३१,७८[२],८१ |
| ४३. | प्रज्ञापनासूत्रवृत्ति:– | ३६,९३ |
| ४४. | प्रज्ञापनासूत्रहरिभद्रसूरि(प्रदेशव्याख्या)वृत्ति:– | (८६), ८७,८८ |
| ४५. | प्रशमरति:– | ३५ |
| ४६. | प्राचीनकर्मग्रन्थ:– | ५० |
| ४७. | प्राचीनकर्मविपाकप्रथमकर्मग्रन्थ:– | २२,२३[२],३९[२],४०,५५[२],५७,६१,७०[२], ७४,७९,८२,९३,१०१,१०३ |
| ४८. | प्राचीनकर्मविपाकप्रथमकर्मग्रन्थ-पूर्वाचार्यव्याख्या– | ६२ |
| ४९. | प्राचीनबृहत्कर्मविपाकप्रथमकर्मग्रन्थ-परमानन्दसूरिवृत्ति:– | ९६ |
| ५०. | प्राचीनषडशीतिचतुर्थकर्मग्रन्थ:– | ४० |
| ५१. | प्राचीनषडशीतियशोभद्रसूरिवृत्ति | ५५ |
| ५२. | बन्धशतकचूर्णि:– | १७,५९[२],६१,६२,६३[२],६५ ✱ |
| ५३. | बन्धशतकचूर्णिटिप्पनकम्– | ६०,६६ |
| ५४. | बृहच्छतकबृहच्चूर्णि:– | ३९ |
| ५५. | बृहत्कर्मग्रन्थ:(प्राचीनकर्मग्रन्थ:) | ३९ |
| ५६. | बृहत्कर्मविपाक:(प्राचीनप्रथमकर्मग्रन्थ:)– | २१,२२,२३,२४,२५,३९,५६,५७,६१, ६२,६८,६९,७१,७२,७६,७७,७८,७९,✱ |
| ५७. | बृहत्कर्मविपाकपरमानन्दसूरिवृत्ति: | ६२,८८,९२ |
| ५८. | बृहत्कर्मविपाक (प्राचीनप्रथमकर्मग्रन्थ) पूर्वाऽऽचार्यवृत्ति:– | ६२,९५,९६ |

| अनु. | ग्रन्थनाम | पृष्ठाऽङ्काः |
|---|---|---|
| ५९. | बृहत्कल्प:– | ६८ |
| ६०. | बृहद्विपाक:(प्राचीनकर्मविपाकप्रथमकर्मग्रन्थ:)– | ७८ |
| ६१. | भगवती(व्याख्याप्रज्ञप्ति)सूत्रम्– | ७२,७६ |
| ६२. | भगवती(व्याख्याप्रज्ञप्ति)सूत्रवृत्ति:– | ९३ |
| ६३. | भिषक्शास्त्रम्– | ९७ |
| ६४. | यदभ्यधायि | ९७ |
| ६५. | यदवाचि – | ९७ |
| ६६. | यदवादि- | ६०,९७ |
| ६७. | यदाह– | १८[२],२७,४२,५०,५६,७४[२],९८ |
| ६८. | यदुक्तम्– | १६,१७,१८,३३,३७,३९[२],४०,४२,४८, ४९,५१,५५,५५-५६,७४,७७, |
| ६९. | लोकप्रकाश:– | ४१,५७,६७,७७[३],१०२,१०३ |
| ७०. | वचनम्– | ३,१९,२५,३०,५९,६१,८४,९८ |
| ७१. | विशेषावश्यक:(भाष्यम्)– | २७[२],४२,४३-४४ |
| ७२. | विशेषावश्यकभाष्यम्– | ३,५,६,७,८,१२,१३,१४,१५,२८, २९,३२,३३,३४,३५,४१,५०,५१ |
| ७३. | विशेषावश्यकभाष्यवृत्ति:– | ७६ |
| ७४. | व्याख्याप्रज्ञप्ति: (भगवती):– | ४४ |
| ७५. | शतकचूर्णि:– | ४१,६३,६३-६४,६९ |
| ७६. | शतकदेवेन्द्रसूरिस्वोपज्ञवृत्ति:– | १६ |
| ७७. | शतकवृत्ति: | १६ |
| ७८. | शास्त्रवार्त्तासमुच्चय:– | ९,९-१०[४],१०[२],११,१२,१४,१५ |
| ७९. | श्राद्धदिनकृत्यटीका– | १२ |
| ८०. | श्रावकप्रज्ञप्तिवृत्ति:– | ७७ |
| ८१. | षट्खण्डागम:– | (५७) |
| ८२. | सप्ततिकामलयगिरसूरिवृत्ति:– | ५९[२],६६,७३,९२,९९ |
| ८३. | समवायाङ्गम्– | ४५ |
| ८४. | सम्मतितर्क्क:– | १५,४२ |
| ८५. | सूक्ष्मार्थविचारसारप्रकरणम्– | ९३ |
| ८६. | सूक्ष्मार्थविचारसारप्रकरणरामदेव-गणिटिप्पनकम्– | ६७ |
| ८७. | सूक्ष्मार्थविचारसारप्रकरणवृति:– | (७०), (७१)[२], ७२ |
| ८८. | सूत्रलक्षणम्– | १८ |
| ८९. | स्थानाङ्गसूत्रम्– | ५५ |
| ९०. | स्थानाङ्गसूत्रवृत्ति:– | ५२-५३ |

▼एतच्चिह्न (कौंस) गताङ्का: टिप्पनसत्का: पृष्ठाङ्का अवगन्तव्या: एवमग्रेऽपि

✤(३४)[३],(३५),(४०),(४४),(४८),(५०),(५९),(७०),(७२)[२],(७५),(९०),(९६),(१०१)[४] ✱६६[२],६८,६९,७०,७३,७४[२],७८[२],७९,८०,८१[२],८५, ८६[२],८७[४],९०,९३,१००[२],१०१[२] ✲८०,८२[३],९०,९५,९८-९९,९९,१०१,१०२ ८१,८६,९७[२],९८[२] ● ५२,५३,६०,६९,७०

# ॥ अथ चतुर्थं परिशिष्टम् ॥

## ।। साक्षिग्रन्थकाराः ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्ति-टिप्पणाऽन्तर्गतानां साक्षितया गृहीतानां ग्रन्थकृतां क्रमसूचिः-

| अनु. | ग्रन्थकारनाम | पृष्ठाऽङ्काः | अनु. | ग्रन्थकारनाम | पृष्ठाऽङ्काः |
|---|---|---|---|---|---|
| १. | अन्ये आचार्याः- | ९२ | १८. | प्रज्ञाकरगुप्तः- | ८८ |
| २. | अन्ये केचन - | ९८ | १९. | प्रज्ञापनामूलटीकाकारः- | ६१ |
| ३. | अभयदेवसूरिः- | ५२-५३ | २०. | प्राचीनकर्मविपाकग्रन्थकारः- | ७१ |
| ४. | आर्यश्यामाऽऽचार्यः- | ७८[२] | २१. | बन्धशतकचूर्णिकारः- | ६९,९५ |
| ५. | गर्गमहर्षिः- | ६२,७६,९० | २२. | बौद्धाः- | १४ |
| ६. | गन्धहस्तिसूरिः- | ३८ | २३. | भाष्यकृत्- | २५,३३ |
| ७. | चूर्णिकृत्- | १६ | २४. | मलयगिरिसूरिः- | ५९[२],६६,६७[२],६९,७३[२],९२,९९ |
| ८. | जिनभद्रगणिक्षमाश्रमणः- | ३,५२ | २५. | महोपाध्यायशोविजयगणी- | ६१-६२,६७,६९,८५,९६,१०१ |
| ९. | तत्त्वार्थभाष्यकारः- | ४६,५४,६९,७५,७८,९४ | २६. | मुनिचन्द्रसूरिः- | ७१ |
| १०. | तत्त्वार्थराजवार्त्तिककारः- | (७७) | २७. | यशोभद्रसूरिः- | ५५ |
| ११. | देवर्धिवाचकः- | २७ | २८. | राजवार्त्तिककारः- | (७२),(७८)[२],(७९),(८२)[३] |
| १२. | देवेन्द्रसूरिः- | १२,१६,५१,५१-५२,६१,६३,६४,७० | २९. | रामदेवगणिः- | ४५,४६,४७,४८,६७ |
| १३. | धर्मदासगणिः- | ४६,४७ | ३०. | विशेषावश्यकभाष्यकारः- | ३५ |
| १४. | धवलाकारः- | (५७),(७७),(८७) | ३१. | शतकचूर्णिकारः- | ३८ |
| १५. | परमानन्दसूरिः- | ६२,८८,९२,९६ | ३२. | सर्वार्थसिद्धिकारः- | (५८) |
| १६. | पूर्वाचार्यः- | ६२,९६ | ३३. | सिद्धसेनगणिः- | १५,१६,३७,३८,४९[२],६२,६४,६५,७३,७५ |
| १७. | पौराणिकाः- | १४ | ३४. | हरिभद्रसूरिः- | ७७,(८६),८७,८८ |

# ॥ अथ पञ्चमं परिशिष्टम् ॥

## ।। अतिदिष्टग्रन्था: ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्ति-टिप्पणकान्तर्गतानामतिदिष्टानां ग्रन्थानां सूचि:-

| अनु. | ग्रन्थनाम | पृष्ठाऽङ्का: |
|---|---|---|
| १. | अनुयोगद्वारसूत्रवृत्ति:- | ४ |
| २. | अन्यत्र- | ५६,७६,९० |
| ३. | अन्याऽभिप्राय:- | ८५ |
| ४. | आवश्यकनिर्युक्ति:- | ५२ |
| ५. | आवश्यकवृत्ति:- | ४ |
| ६. | उपदेशमाला- | ४५,४७ |
| ७. | एवमग्रेऽपि- | ५४ |
| ८. | कर्मप्रकृति:- | १७,७२ |
| ९. | कर्मप्रकृतियशोविजयोपाध्यायवृत्ति:- | ६९,८० |
| १०. | कर्मप्रकृतिवृत्ति:- | १७,५९,७२ |
| ११. | कविसमय:- | ५८ |
| १२. | कषायप्राभृतचूर्णि:- | ४५[२] |
| १३. | तत्त्वार्थवृत्ति:- | ३५,६६ |
| १४. | तत्त्वार्थसूत्रभाष्यम्- | ३८,४३,६४,७५,७६[३],८०,८१,८२,९० |
| १५. | तत्त्वार्थसूत्रभाष्यवृत्ति:- | ३१,३८,४३,४५,४७,५६,६६,८०,९४,९५ |
| १६. | तत्त्वार्थसूत्रभाष्यसिद्धसेनगणिवृत्ति:- | ३६,४६ |
| १७. | तत्त्वार्थसूत्रम्- | ३८,४३ |
| १८. | धर्मसंग्रहणीवृत्ति:- | १९ |
| १९. | नन्दीसूत्रचूर्णि:- | ७४,७७ |
| २०. | नन्दीसूत्रम्- | ३१ |
| २१. | नन्दीसूत्रवृत्ति:- | ३५ |
| २२. | नन्दीसूत्रहरिभद्रसूरिवृत्ति:- | ७५ |
| २३. | नव्यकर्मग्रन्थ:- | ७२ |
| २४. | नव्यकर्मग्रन्थवृत्ति:- | ७२ |
| २५. | नव्यकर्मविपाकप्रथमकर्मग्रन्थ:- | ५३,६४,६७,९०,९३,९५ |
| २६. | नव्यकर्मविपाकप्रथमकर्मग्रन्थवृत्ति:- | ३२,५६,५९,(७२),७४,९१ |
| २७. | नव्यषडशीतिचतुर्थकर्मग्रन्थवृत्ति:- | ७४ |
| २८. | निशीथवृत्ति:- | ४ |
| २९. | निश्चयनय:- | ६८ |
| ३०. | पञ्चसंग्रहमलयगिरिसूरिवृत्ति:- | ८० |
| ३१. | पञ्चसंग्रहवृत्ति:- | ५९,७२ |
| ३२. | प्रकृत(कर्मप्रकृतिकीर्तन)ग्रन्थ:- | ८९ |
| ३३. | प्रज्ञापनासूत्रवृत्ति:- | (७२), ७४ |
| ३४. | प्रवचनम् | ३७ |
| ३५. | प्राचीनकर्मविपाकप्रथमकर्मग्रन्थ:- | ५२,६४,९३,९५ |
| ३६. | प्राचीनकर्मविपाकप्रथमकर्मग्रन्थप्राचीनाऽऽचार्यवृत्ति:- | ९५ |
| ३७. | प्राचीनकर्मविपाकप्रथमकर्मग्रन्थवृत्ति:- | ६४,७४ |
| ३८. | प्राचीनषडशीतिचतुर्थकर्मग्रन्थवृत्ति:- | ७४ |
| ३९. | बन्धशतकचूर्णि:- | ५६,६१,६६,७२,१०१ |
| ४०. | मतान्तरम्- | ८५ |
| ४१. | लौकिकशास्त्रम्- | ५८ |
| ४२. | विशेषावश्यक:- | ४२ |
| ४३. | विशेषावश्यकभाष्यम्- | ३०,३१,३२,३५,४४ |
| ४४. | विशेषावश्यकभाष्यवृत्ति:- | ४,३२,३३ |
| ४५. | व्यवहारनय:- | ६८ |
| ४६. | श्रावकप्रज्ञप्ति:- | ७७ |
| ४७. | सप्ततिका- | ९५ |
| ४८. | सप्ततिकाविवरणम्- | ५६,७२,७४ |
| ४९. | समवायाङ्गम्- | ४५ |
| ५०. | सूक्ष्मार्थविचारसारप्रकरणम्- | ६७ |
| ५१. | सूक्ष्मार्थविचारसारप्रकरणवृत्ति:- | (७०), ७४ |
| ५२. | सूत्रकृदङ्गवृत्ति:- | ४२ |

# ।। अथ षष्ठं परिशिष्टम् ।।

## ।। अतिदिष्टग्रन्थकारा: ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्ति-टिप्पणाऽन्तर्गतानामतिदिष्टानां ग्रन्थकृतां नामसूचि:

| अनु. | ग्रन्थकारनाम | पृष्ठाऽङ्का: |
|---|---|---|
| १. | अन्य आचार्यपादा:– | ९२ |
| २. | अन्ये– | ७०,८५,९३,९६,९७,९८ |
| ३. | अपरे– | ६,९६ |
| ४. | केचन– | ९३,९८ |
| ५. | केचनाऽऽचार्या:– | ६५ |
| ६. | केचित्– | ६४,६९,७० |
| ७. | गर्गर्षि:– | ९० |
| ८. | तत्त्वार्थसूत्रभाष्यकार:– | ४६,५४,६५,७५,७६,७८[३],९४ |
| ९. | तत्त्वार्थसूत्र-भाष्यवृत्तिकार:– | ६५,७५ |
| १०. | तद्विद: | ८५ |
| ११. | देवेन्द्रसूरि:– | ३२ |
| १२. | धर्मदासगणि:– | ४६, ४७ |
| १३. | नव्यकर्मग्रन्थकार:– | ४९ |
| १४. | नव्यकर्मग्रन्थवृत्तिकार:– | ४९ |
| १५. | नैरुक्ता: | ८ |
| १६. | नव्यकर्मविपाकवृत्तिकार:– | ९२ |

| अनु. | ग्रन्थकारनाम | पृष्ठाऽङ्का: |
|---|---|---|
| १७. | पूर्ववैयाकरण: | ८ |
| १८. | परे– | ६ |
| १९. | पूर्वसूरय:– | ८ |
| २०. | पौराणिका: | १४ |
| २१. | प्राचीनकर्मग्रन्थकार:– | ४९,७० |
| २२. | प्राचीनकर्मग्रन्थवृत्तिकार:– | ४९ |
| २३. | बन्धशतकचूर्णिकार:– | ६९,७०,९०,९३ |
| २४. | बृहत्कर्मविपाककार:– | ६२ |
| २५. | बौद्धा: | १४ |
| २६. | भद्रबाहुस्वामी– | ५२ |
| २७. | मलयगिरिसूरि:– | ८०,९० |
| २८. | महोपाध्याययशोविजय:– | ६९,८०,८५ |
| २९. | सिद्धसेनगणी– | ४६ |
| ३०. | सूक्ष्मार्थविचारसारवृत्तिकार:– | (७१)[२] |
| ३१. | सौगत: | १४ |
| ३२. | हरिभद्रसूरि:– | ७३,७५,७७ |

# ।। अथ सप्तमं परिशिष्टम् ।।

## ।। न्याया: ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्तिगतानां न्यायानां नामसूचि:

| अनु. | न्याया: | पृष्ठाङ्का: |
|---|---|---|
| १. | अनुमानव्यस्थानात् तत्संयुक्तं प्रमाणं स्यात् (जैमि० १-३-१५)– | ६ |
| २. | अपवादविषयं परिहृत्योत्सर्गा: प्रवर्तन्ते– | ४० |
| ३. | कारणे कार्योपचार:– | २९ |
| ४. | घण्टालाला– | २५ |
| ५. | तात्स्थ्यात्तद्व्यचार:– | ५८ |
| ६. | तुष्यन्तु दुर्जना:– | ७ |
| ७. | द्वन्द्वात्पर: प्रत्येकमभिसम्बध्यते– | ३६,५६,८३,८५,८६,९८ |
| ८. | द्वन्द्वादौ द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते– | २६ |

| अनु. | न्याया: | पृष्ठाङ्का: |
|---|---|---|
| ९. | द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते– | १७ |
| १०. | नाम-नामवतोरभेदोपचार:– | ३ |
| ११. | भामा सत्यभामा– | ६०,८० |
| १२. | मञ्चा आक्रोशन्ति | ३२,५८ |
| १३. | यथोद्देशं निर्देश:– | २१ |
| १४. | सर्वं वाक्यं साऽवधारणम्– | २५ |
| १५. | सर्वे गत्यर्था ज्ञानार्था:— | ३ |
| १६. | सविशेषणे विधिनिषेधौ– | ५ |
| १७. | सामान्यनिष्ठं हि वच: सामान्यं प्रतिपादयति विशेषनिष्ठं विशेषम्– | १९ |

# ॥ अथाऽष्टमं परिशिष्टम् ॥

## ॥ व्याकरणसूत्राणि ॥

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनवृत्त्यन्तर्गतानां व्याकरणसूत्राणां सूचि :--

| अनु. | व्याकरणसूत्रम् | पृष्ठाऽङ्का: |
|---|---|---|
| १. | अ: (सि०-उणा०-२)- | ५८ |
| २. | अघञ् क्यबलच्यजेर्वी (सि०-४-४-२)- | ३ |
| ३. | अच् (सि०-५-१-४९)- | ३,५८,७१,७३,८४ |
| ४. | अणञेयेकण्.. (सि०-२-४-२०)- | ६४ |
| ५. | अतोऽनेकस्वरात् (सि०-७-२-६)- | ३० |
| ६. | अधिकं तत्सङ्ख्यमस्मिन् शत् सहस्रे शति शद् दशाऽन्ताया ड: (सि०-७-१-१५४)- | २५ |
| ७. | अनट् (सि०-५-३-१२४)- | २१[२],६३ |
| ८. | अभ्रादिभ्य: (सि०-७-२-४६)- | ५८[२],७४ |
| ९. | अर्शआदिभ्योऽच् (पाणिनीयसूत्रम् ५-२-१२७)- | ७४ |
| १०. | आत् (सि०-२-४-१८)- | ४६ |
| ११. | आतो डो-ऽह्वा-वा-म: (सि०-५-१-७६)- | ३,८,२३ |
| १२. | इणो णित् (सि०-उणा०-९९८)- | २२ |
| १३. | उपसर्गादात: (सि०-५-३-११०)- | २९,४७ |
| १४. | उपसर्गाद् द: कि: (सि०-५-३-८७)- | ३०,४६ |
| १५. | ऋज्यजि.... (सि०-उणा०-३८८)- | ३ |
| १६. | ऋवर्ण-व्यञ्जनाद् घ्यण् (सि०-५-१-१७)- | ५५ |
| १७. | करणाऽऽधारे (सि०-५-३-१२९)- | २१[४],३६,६३,७२ |
| १८. | कर्मणोऽण् (सि०-५-१-७२)- | ३२,३९,४३,६९ |
| १९. | कुलि-लुलि-कलि-कषिभ्य: काय: (सि०-उणा०-३७२)- | ४३ |
| २०. | कृते (सि०-६-३-१९२)- | ८६ |
| २१. | कृ पृ कटि (सि०-उणा०-५८९)- | ४४ |
| २२. | क्तेटो.... (सि०-५-३-१०६)- | ४८ |
| २३. | क्रियाविशेषणात् (सि०-२-२-४१)- | १७ |
| २४. | क्रुध्-संपदादिभ्य: क्विप् (सि०-५-३-११४)- | ४४ |
| २५. | क्वचित् (सि०-५-१-१७१)- | ४४,४५,५८ |
| २६. | क्विप् (सि०-५-१-१४८)- | ५८ |
| २७. | गम्ययप: कर्माऽऽधारे (सि०-२-२-७४)- | ४३ |
| २८. | गौणाऽऽदय: (सि०-८-२-१७४)- | ३७ |
| २९. | ङ्यापो बहुलं नाम्नि (सि०-२-४-९९)- | ४४ |
| ३०. | छोर्डग्गादिर्वा (सि०-उणा०-४७१)- | ४७ |
| ३१. | ञ्णिति घात् (सि०-४-३-१००)- | ६९ |
| ३२. | तव्याऽनीयौ (सि०-५-१-२७)- | २२[२] |
| ३३. | तिरसस्तिर्यति (सि०-३-२-१२४)- | ५८ |
| ३४. | तुदादि-विषि-गृहिभ्य: कित् (सि०-उणा०-५)- | ३२,५८ |
| ३५. | ते लुग्वा (सि०-३-२-१०८)- | ६० |
| ३६. | दीर्घ-ह्रस्वौ मिथो वृत्तौ (सि०-८-१-४)- | ३७,५५ |
| ३७. | दृ-कृ-नृ-सृ-भृ-धृ-वृ..(सि०-उणा०-२७)- | ५८ |
| ३८. | नखाऽऽदय: (सि०-३-२-१२८)- | ५७ |
| ३९. | नन्द्यादिभ्योऽन: (सि०-५-१-५२)- | ४४,४९,५० |
| ४०. | नाम्युपान्त्य-प्री-कृ-गृ-ज्ञ: क: (सि०-५-१-५४)- | ५८ |
| ४१. | नी-नू-रमि-त -तुदि.. (सि०-उणा०-२२७)- | ७२ |
| ४२. | पति-राजान्त-गुणाङ्ग-राजादिभ्य: कर्मणि च (सि०-७-१-६०)- | ६४ |
| ४३. | पुन्नाम्नि घ: (सि०-५-३-१३०)- | ८,७१ |
| ४४. | पृषोदराऽऽदय: (सि०-३-२-१५५)- | २२ |
| ४५. | प्रज्ञादिभ्योऽण् (सि०-७-२-१६५)- | ३८[२] |
| ४६. | प्रवचनीयाऽऽदय: (सि०-५-१-८)- | २२,३८ |
| ४७. | बहुलम् (सि०-५-१-२)- | २२,२६,८६ |
| ४८. | भवे (सि०-६-३-१२३)- | ४७ |
| ४९. | भावा-ऽकर्त्रो: (सि०-५-३-१८)- | १६[२],२२,२६,४४,४५,४७,५६[२],६३[२],६९ |
| ५०. | भावे त्व-तल् (सि०-७-१-५५)- | ३९ |
| ५१. | भिदादय: (सि०-५-३-१०८)- | ३७,४४ |
| ५२. | भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोलिभ्य: (सि०-५-३-१०९)- | ४८,५६ |
| ५३. | भू-श्र्य-दो-ऽल् (सि०-५-३-२३)- | ४५ |
| ५४. | भृ-मृ-तॄ-त्सरि-तनि..(सि०-उणा०-७१६)- | ६० |
| ५५. | मयूरव्यंसकेत्यादय:(सि०-३-१-११६)- | ३७ |
| ५६. | मुरलो-रल-विरल-केरल..(सि०-उणा०-४७४)- | ८ |
| ५७. | मृगयेच्छा....... (सि०-५-३-१०१)- | ४७[२] |
| ५८. | मृदि-कन्दि... (सि०-उणा०-४६५)- | ८ |
| ५९. | य एच्चाऽत: (सि०-५-१-२८)- | २२ |
| ६०. | यजि-शुन्धि.... (सि०-उणा०-८०१)- | ४५ |
| ६१. | युवर्ण०.... (सि०-५-३-२८)- | ३२,५६ |
| ६२. | रम्यादिभ्य: कर्तरि (सि०-५-३-१२६)- | २१[३],२९ |
| ६३. | लटि-खटि-खलि-नलि-कण-यशौ-सृ-शृ-कृ-गृ-दृ-पृ-शपि-श्या-शा-ला-पदिह्लसीणभ्यो व: (सि०-उणा०-५०५)- | ४५ |
| ६४. | लिङ्गमतन्त्रम् (सि०-८-४-४४५)- | ८९ |
| ६५. | लिहादिभ्य: (सि०-५-१-५०)- | ३,२२,२६,७१,७३ |

| अनु. | व्याकरणसूत्रम् | पृष्ठाऽङ्का: |
|---|---|---|
| ६६. | लू-धू-सू-खनि-चर-सहार्त्ते (सि०-५-२-८७)- | ३८ |
| ६७. | वाऽव्ययोत्खातादावदात:(सि०-८-१-६७)- | ९३ |
| ६८. | विकारे (सि०६-२-३०)- | ५४ |
| ६९. | विदि-पृभ्यां कित् (सि०-उणा०-५५८)- | ५७ |
| ७०. | विनयाऽऽदिभ्य: (सि०-७-२-१६९)- | २६[२],८५ |
| ७१. | विभक्ति-समीप.... (सि०-३-१-३९)- | ६४ |
| ७२. | व्यञ्जनाद् घञ् (सि०-५-३-१३२)- | ७१ |
| ७३. | व्यध-जप-मद्भ्य: (सि०-५-३-४७)- | ४५ |
| ७४. | श्वादिभ्य: (सि०-५-३-९२)- | ४४ |
| ७५. | षितोऽङ् (सि०-५-३-१०७)- | ४४ |
| ७६. | सात्मन्नात्मन्..... (सि०उणा०९१६)- | २३ |
| ७७. | सुप्रात-सुश्व-सुदिवशारिकुक्ष-चतुरस्त्रैणी-पदा-ऽजपद-प्रोष्ठपद-भद्रपदम् (सि०-७-३-१२९)- | ९५ |
| ७८. | स्त्रियां क्ति: (सि०-५-३-९१)- | १६,२६,४४,५५,५८ |
| ७९. | स्त्री (सि०-उणा०-४५०)- | ५६[२] |
| ८०. | स्था-छा-मा-सासूमन्यनिकनिषसिपलिकलि-शलिशकीर्ष्यिसहिबन्धिभ्यो य: (सि०-उणा०-३५७)- | ४६ |
| ८१. | स्थादिभ्य: क: (सि०-५-३-८२)- | २४ |
| ८२. | स्था-पा-स्ना-त्र: क: (सि०-५-१-१४२)- | २ |
| ८३. | स्थेस-भास-पिस-कसो वर: (सि०-५-२-८१)- | ८० |
| ८४. | स्यादावसङ्ख्येय: (सि०-३-१-११९)- | ६१ |
| ८५. | हेतुतच्छीलाऽनुकूले....(सि०-५-१-१०३)- | ७२ |

# ।। अथ नवमं परिशिष्टम् ।।

## ।। धातुपाठा: ।।

अकाराऽऽदिक्रमेण कर्मप्रकृतिकीर्तनग्रन्थवृत्तिगतानां धातुपाठानां नामसूचि:-

| अनु. | धातुपाठ: | पृष्ठाऽङ्का: |
|---|---|---|
| १. | अज् क्षेपणे च — | ३ |
| २. | अञ्जौप् व्यक्ति-म्रक्षण-गतिषु— | ६० |
| ३. | ईर् गति-प्रेरणयो: (प्राणिनीयघातु:)— | २ |
| ४. | ईरण् क्षेपे— | २ |
| ५. | ईरिक् गति-कम्पनयो:— | २ |
| ६. | उख,नख....अगु, वगु,....गतौ— | ८ |
| ७. | कष् हिंसायाम्-- | ४३ |
| ८. | कुत्सिण् अवक्षेपे— | ५६ |
| ९. | गन्धिण् अर्दने— | ६३ |
| १०. | गुङ् शब्दे— | २३ |
| ११. | ज्ञांश् अवबोधने— | २१ |
| १२. | डुकृंग् करणे— | १५ |
| १३. | णींग् प्रापणे— | ३६ |
| १४. | तनूयी विस्तारे— | ६० |
| १५. | त प्लवन-तरणयो:— | ७२ |
| १६. | दिशींत् अतिसर्जने | १६ |
| १७. | दृ विदारणे— | ३ |
| १८. | दृशृं प्रेक्षणे— | २१ |
| १९. | द्रांक् कुत्सितगतौ— | ३७ |
| २०. | बुधि मनिंच् ज्ञाने— | २६[२] |
| २१. | मकुङ् मण्डने— | ८ |
| २२. | मडु भूषायाम्— | ८ |
| २३. | मदुङ् स्तुति-मोद-मद-स्वप्न-गतिषु— | ८ |
| २४. | मदैच् हर्षे— | ८ |
| २५. | मनिंच् ज्ञाने— | ८ |
| २६. | मनूयि बोधने— | २६ |
| २७. | महीङ् वृद्धौ पूजायाञ्च— | ८ |
| २८. | रस आस्वादने— | १६ |
| २९. | रसण् आस्वादन-स्नेहयो:— | ६३ |
| ३०. | रांक् दाने— | ३ |
| ३१. | राजृग् टुभ्राजि दीप्तौ— | ३ |
| ३२. | राजृग् दीप्तौ— | ५८ |
| ३३. | लांक् आदाने— | ८ |
| ३४. | शुच् शोके— | ५६ |
| ३५. | शूर वीरणि विक्रान्तौ— | २ |
| ३६. | शूर वीर विक्रान्तौ(पाणिनीय.)— | ३ |
| ३७. | षूङौक् पाणिगर्भविमोचने— | ५६ |
| ३८. | षोंच् अन्तकर्मणि— | ५६ |
| ३९. | ष्ठां गतिनिवृत्तौ— | १६ |
| ४०. | सुरत् एश्वर्य-दीप्त्यो:— | ५८ |
| ४१. | स्पृशंत् संस्पर्शे— | ६४ |

## ॥ अथ दशमं

### ॥ ८ मूलोत्तरकर्मप्रकृति-

**८ मूलकर्म**

१ ज्ञानावरणम् — ५
- १. मतिज्ञानावरणम्
- २. श्रुतज्ञानावरणम्
- ३. अवधिज्ञानावरणम्
- ४. मनःपर्यवज्ञानावरणम्
- ५. केवलज्ञानावरणम्

२ दर्शनावरणम् — ९
- १. चक्षुर्दर्शनावरणम्
- २. अचक्षुर्दर्शनावरणम्
- ३. अवधिदर्शनावरणम्
- ४. केवलदर्शनावरणम्
- ५. निद्रा.
- ६. प्रचला.
- ७. निद्रानिद्रा.
- ८. प्रचलाप्रचला.
- ९. स्त्यानर्द्धि.

३ वेदनीयम् — २
- १. सातावेदनीयम्
- २. असातावेदनीयम्

४ मोहनीयम् — २८
- १ दर्शनमोहनीयम् — ३
  - १. मिथ्यात्व.
  - २. सम्यग्मिथ्यात्व.
  - ३. सम्यक्त्व.
- २ चारित्रमोहनीयम् — २५
  - १ कषाय. — १६
    - १. क्रोध. २. मान. ३. माया. ४. लोभ. — ४
      - १. अनन्तानुबन्धि.
      - २. अप्रत्याख्यानावरण.
      - ३. प्रत्याख्यानावरण.
      - ४. संज्वलन.
  - २ नोकषाय. — ९
    - १. हास्य.
    - २. रति.
    - ३. अरति.
    - ४. शोक.
    - ५. भय.
    - ६. जुगुप्सा.
    - ७ स्त्रीवेद.
    - ८. पुरुषवेद.
    - ९. नपुंसकवेद.

१ गति. — ४
- १. नरक.
- २. तिर्यग्.
- ३. मनुष्य.
- ४. देव.

२ जाति. — ५
- १. एकेन्द्रिय.
- २. द्वीन्द्रिय.
- ३. त्रीन्द्रिय.
- ४. चतुरिन्द्रिय.
- ५. पञ्चेन्द्रिय.

३ शरीर. — ५
- १. औदारिक.
- २. वैक्रिय.
- ३. आहारक.
- ४. तैजस.
- ५. कार्मण.

४ अङ्गोपाङ्ग. — ३
- १. औदारिक.
- २. वैक्रिय.
- ३. आहारक.

५ बन्धन. — १५
- १. औदारिकौदारिक.
- २. औदारिकतैजस.
- ३. औदारिककार्मण.
- ४. औदारिकतैजसकार्मण.
- ५. वैक्रियवैक्रिय.
- ६. वैक्रियतैजस.
- ७. वैक्रियकार्मण.
- ८. वैक्रियतैजसकार्मण.
- ९. आहारकाऽऽहारक.
- १०. आहारकतैजस.
- ११. आहारककार्मण.
- १२. आहारकतैजसकार्मण.
- १३. तैजसतैजस.
- १४. तैजसकार्मण.
- १५. कार्मणकार्मण.

६ संघातन. — ५
- १. औदारिक.
- २. वैक्रिय.
- ३. आहारक.
- ४. तैजस.
- ५. कार्मण.

७ संहनन. — ६
- १. वज्रर्षभनाराच.
- २. ऋषभनाराच.
- ३. नाराच.
- ४. अर्धनाराच.
- ५. कीलिका.
- ६. सेवार्त.

# परिशिष्टम् ॥

## भेदप्रदर्शियन्त्रम् ।। (गाथा: २ त: २४/पत्र. २१ त: १०३

**प्रकृतय:**

- ५ आयुष्यम् — ४
  - १. नरकायुष्यम्
  - २. तिर्यगायुष्यम्
  - ३. मनुष्यायुष्यम्
  - ४. देवायुष्यम्
- ६ नाम — १०३
  - १ पिण्डप्रकृतय: — ७५
  - २ प्रत्येकप्रकृतय: — २८
    - १ अप्रतिपक्षा: — ८
      - १. अगुरुलघु.
      - २. उपघात.
      - ३. पराघात.
      - ४. उच्छ्वास.
      - ५. आतप.
      - ६. उद्योत.
      - ७. निर्माण.
      - ८. तीर्थकर.
    - २ सप्रतिपक्षा: — २०
      - १ त्रसदशकम् — १०
        - १. त्रस.
        - २. बादर.
        - ३. पर्याप्त.
        - ४. प्रत्येक.
        - ५. स्थिर.
        - ६. शुभ.
        - ७. सुभग.
        - ८. सुस्वर.
        - ९. आदेय.
        - १०. यश:कीर्ति.
      - २ स्थावरदशकम् — १०
        - १. स्थावर.
        - २. सूक्ष्म.
        - ३. अपर्याप्त.
        - ४. साधारण.
        - ५. अस्थिर.
        - ६. अशुभ.
        - ७. दुर्भग.
        - ८. दु:स्वर.
        - ९. अनादेय.
        - १०. अयश:कीर्ति.
- ७ गोत्रम् — २
  - १. उच्चैर्गोत्रम्
  - २. नीचैर्गोत्रम्
- ८ अन्तरायम् — ५ = १५८
  - १. दानाऽन्तरायम्
  - २. लाभाऽन्तरायम्
  - ३. भोगाऽन्तरायम्
  - ४. उपभोगाऽन्तरायम्
  - ५. वीर्याऽन्तरायम्

(पिण्डप्रकृतय: ७५)

- ८ संस्थान. — ६
  - १. समचतुरस्र.
  - २. न्यग्रोध-परिमण्डल.
  - ३. सादि.
  - ४. कुब्ज.
  - ५. वामन.
  - ६. हुण्ड.
- ९ वर्ण. — ५
  - १. कृष्ण.
  - २. नील.
  - ३. लोहित.
  - ४. हारिद्र.
  - ५. शुक्ल.
- १० गन्ध. — २
  - १. सुरभि.
  - २. दुरभि.
- ११ रस. — ५
  - १. तिक्त.
  - २. कटु.
  - ३. कषाय.
  - ४. अम्ल.
  - ५. मधुर.
- १२ स्पर्श. — ८
  - १. गुरु.
  - २. लघु.
  - ३. मृदु.
  - ४. खर.
  - ५. शीत.
  - ६. उष्ण.
  - ७. स्निग्ध.
  - ८. रूक्ष.
- १३ आनुपूर्वी. — ४
  - १. निरय.
  - २. तिर्यग्.
  - ३. मनुष्य.
  - ४. देव.
- १४ विहायोगति. — २ = ७५
  - १. शुभविहायोगति.
  - २. अशुभविहायोगति.

पञ्चबन्धनपक्षे १४८, बन्धोदययोर्बन्धन-संघातनानां स्वशरीरसमावेशाच्चतुर्वर्णाऽऽदीनामवान्तरभेदाऽविवक्षणात्सम्यक्त्व-मिश्रमोहनीययोर्बन्धाऽभावाच्चोदये १२२, उपलक्षणादुदीरणायामपि १२२, बन्धे च १२० भवन्ति । (गाथे २३-२४)

इति

आचार्यश्रीविजयवीरशेखरसूरिकृतं

# स्वोपज्ञ-

# प्रेमप्रभावृत्तिराजितं

# कर्मप्रकृति-

# कीर्तनं

# दशपरिशिष्टयुतं

# समाप्तम्

ACHARYA SRI KAILASSAGARSURI GYANMANDIR
SRI MAHAVIR JAIN ARADHANA KENDRA
Koba, Gandhinagar-382 009
Phone : (079) 23276252, 23276204-05